वैष्णवकुलचूड़ामणि-प्रभुपाद-श्रीमत्कृष्णदास-कविराज-गोस्वामि-

प्रणीत-वङ्गवाङ्मय-पद्यात्मकस्य

श्रीचैतन्यचरितामृतग्रन्थस्य संस्कृतपद्यानुवादः।

(आदिलीला)

बर्द्धमानमण्डलान्तर्गत-कालनानगरावस्थितानन्दाश्रमाश्रित-

श्रीमत्स्वामि-भास्करानन्द-सरस्वती-विरचितः।

Vrindavan Das
Govind Kund, Vrindavan
Nityanand Baba Ashram

(प्रथमसंस्करणम्)

वैष्णवकुलचूड़ामणि-प्रभुपाद-श्रीमत्कृष्णदास-कविराज-गोस्वामि-

प्रणीत-वङ्गवाङ्मय-पद्यात्मकस्य

श्रीचैतन्यचरितामृतग्रन्थस्य संस्कृतपद्यानुवादः ।

(आदिलीला)

वर्द्धमानमण्डलान्तर्गत-कालनानगरावस्थितानन्दाश्रमाश्रित-

श्रीमत्स्वामि-भास्करानन्द-सरस्वती-विरचितः ।

(प्रथमसंस्करणम्)

प्रकाशकः वि,ए. वि,एल् इत्युपाधिकः
श्रीद्वैतनाथ-डाङ्गाली घोषः ।
७बि, गोराचाँद वसु रोड्
कलिकाता ६ ।

१८७८ शकाब्दीय-
श्रीश्रीरासपूर्णिमायाम्

सर्वं स्वत्वं प्रकाशकेन संरक्षितम् ।

मूल्यं रूप्यकपञ्चकमात्रम् ।

मुद्राकरः श्रीयोगेशचन्द्र-सरखेलः,
कलिकाता ओरियेण्टाल प्रेस, (प्राइभेट्) लिः ।
६न० पञ्चानन घोष लेन,
कलिकाता—६ ।

श्रीचैतन्यचरितामृतसंस्कृतानुवाद-

भूमिका

श्रीचैतन्यचरितामृतग्रन्थः सुविदित एव सुधियां विशेषतो गौड़ीयवैष्णवसमाजस्य। एष ग्रन्थः श्रीकृष्णचैतन्यकालप्रभवः श्रीगौड़ीयवैष्णवसमाजे सुतरां प्रामाण्यमर्हति। अद्वितीयं दर्शनशास्त्रमिदं तत्समाजस्य। श्रीकृष्णचैतन्यप्रवर्त्तितमपूर्वं गौड़ीयवैष्णवधर्मस्य निगूढं रहस्यमत्र काव्यमार्गमधिकृत्य वैष्णवशिरोरत्नेन श्रीकृष्णदासकविराजेनोपनिबद्धं वङ्गभाषामयपद्यच्छन्दसा।

केवलमत्रैव ग्रन्थरत्ने श्रीचैतन्यदेवस्य तथा तदीयपार्षदवर्गस्य जीवनवृत्तानि गौड़ीयवैष्णवानामाचारपरम्परा भागवतप्रेमभक्तिमधिकृत्य पवित्राण्याध्यात्मिकानि विबिधानि तत्त्वानि रहस्यान्तराणि च गौड़ीयवैष्णवदर्शनादिसम्वन्धीनि महता चातुर्य्येणैकत्रैव साकल्येन समुपनिबद्धानि। अत्र किलैकत्रैव समन्वयः समजनि श्रीकृष्णचैतन्यकालीनधर्मदर्शनकाव्येतिहासादितत्त्वानां समेषाम्। श्रीकृष्णद्वैपायनप्रोक्तप्रमाणशिरोरत्नभूत-श्रीमद्भागवतादिग्रन्थप्रमाणानि पदे पदे समुपन्यस्य सुदृढतां नीतं प्रामाण्यमस्य वश्यवाचा ग्रन्थकारेण। एतद्ग्रन्थवर्णितानि बहूनि वस्तूनि ग्रन्थकारेण श्रीमद्भागवत-चैतन्यभागवत-चैतन्यचन्द्रोदयनाटक-मुरारिगुप्तकड़चा-स्वरूपदामोदरकड़चाप्रभृतिग्रन्थेभ्यः संगृहीतानि।

श्रीचैतन्यचरितामृतनामधेयो महाग्रन्थोऽयं खण्डत्रयेण परिसमाप्तः। तत्र सप्तदशपरिच्छेदात्मके प्रथमखण्डे श्रीचैतन्यमहाप्रभोरादिलीला, पञ्चविंशतिपरिच्छेदात्मके द्वितीयखण्डे मध्यलीला, विंशतिपरिच्छेदात्मके तृतीयखण्डे च तदीयान्त्यलीला सविस्तरं वर्णिता।

कविः किलास्य महाग्रन्थस्य सुप्रसिद्धः श्रीकृष्णदासकविराजगोस्वामी नाम वैष्णवकाव्यवर्णित-कण्टकनगरापराख्य काँटोयानगरस्यानतिदूरे बर्द्धमानमण्डलान्तर्गतझामटपुरग्रामे वैद्यान्ववाये जन्म परिजग्राह। अस्य पिता भगीरथो माता च सुनन्दा नाम। दीनः खल्वस्य पिता रोगचिकित्सा-

Bhaja Nitai Gour Radhe Shyam, Japa Hare Krishna Hare Ram.

व्यापारेण सक्लेशं परिवारपरिपोषणमकरोत्। श्रीकृष्णदासस्य नवमवर्षे वयसि वर्त्तमानस्य तातः पञ्चत्वमगमत्। कियद्दिनानन्तरञ्च मातापि। ततस्तस्य विधवा पितृष्वसा श्रीकृष्णदासं तदीयमनुजं श्रीश्यामादासञ्च प्रतिपालितवती। श्रीकृष्णदासः शैशवे स्वल्पया शिक्षया विनीत एव संस्कृतशास्त्रं पठितुमारेभे लेभे च तत्र व्युत्पत्तिवैचित्र्यं, यत्प्रभावेण सोऽयं गोविन्दलीलामृतं नाम महाकाव्यं कृष्णकर्णामृतटिप्पनी भागवतगूढ़रहस्यम् वृन्दावनध्यानमित्यादीनि संस्कृतभाषामयग्रन्थरत्नानि विरचय्य विद्वत्समाजे सुविपुलां प्रतिष्ठामध्यतिष्ठत्। श्रीकृष्णदासेन स्वभाववैराग्याद् गृहस्थाचारो नाध्यकारि। यौवने नित्यानन्द-शिष्यप्रवररामदासमीनकेतनप्रभावमुग्धो गृहात् प्रवव्राज। श्रीवृन्दावनधाम्नि च श्रीरूप-सनातन-रघुनाथभट्ट-श्रीजीव-गोपालभट्ट-रघुनाथदासाख्यसुप्रसिद्धगोस्वामिषट्कसमीपतो विनयेन भक्तिशास्त्रमधीत्य तत्र गभीरमनितरसाधारणं वदुष्यमासादयामास। यत्प्रसादप्रदीप्तप्रज्ञो वङ्गभारत्यापि अद्वैतसूत्रकड़चा-स्वरूपवर्णन रागमयीकणा-प्रभृतिग्रन्थान् श्रीचैतन्यचरितामृतं महाग्रन्थञ्चेमं निबध्य श्रद्धावतां वैष्णवविबुधानामध्यकार्षीन्मध्यं हृदयस्य।

एवमनुश्रूयते यदस्य महाकवेः श्रीचैतन्यचरितामृतस्यास्य लोकातीत-प्रशस्तिजुषो महाग्रन्थस्य निर्माणे श्रीचैतन्यदास-मुकुन्दानन्दचक्रवर्त्ति-शिवानन्द-चक्रवर्त्तिप्रमुखानां वैष्णवशिरोमणीनामाग्रहातिशयः प्रेरणा च प्राधान्येन हेतुतामध्यासाते।

इदमुदाह्रियते तावदत्र केषाञ्चित् प्रत्नतत्त्वविदां संवादेन यत् श्रीचैतन्य-चरितामृतमहाग्रन्थस्य निर्माणे सुष्ठु समवसिते श्रीनिवासो नाम वैष्णवमणि-स्तमिमं महाग्रन्थमुपादाय गौड़मण्डलं प्रति प्रतस्थे। प्रस्थितस्य चास्य पथि गच्छतो बाँकुड़ामण्डलान्तर्गत-वनविष्णुपुराधीश्वरवीरहाम्बीरानुचरा बलात्कारेण तद्ग्रन्थमपजह्रुः। वृन्दावनमधिवसन्नासादिततत्सन्देशः श्रीकृष्णदासः सुतरां विषादमाससाद। केचिदाहुस्तदुपजातं शोकमसह्यं सोढ़ुमसमर्थः कृष्णदासः प्राणानेव परितत्याजेति। केचित् पुनरिदमामनन्ति यत् अपूर्वदैवप्रभावेण तद् ग्रन्थोद्धारवार्त्ताश्रवणानन्तरमस्य प्राणपरीहार इति।

तदिदं ग्रन्थरत्नं वङ्गभाषया ग्रथितमिति नालं भवन्ति वङ्गभाषाया-मनिष्णातास्तदीयमाधुर्य्यगाम्भीर्य्ये सम्यक्तया समनुभवितुम्। वञ्चितास्तेन भाषान्तरधुरीणास्तत्प्रसूतप्रशस्ततमविज्ञानलाभसौभाग्येन। महतीयमेषामनर्थ-विभूतिः। अत्यूर्जितमैश्वर्य्यमिदं वङ्गभाषाया विशेषतो गौड़ीयवैष्णवसमाजस्य। तदिदमनास्वादिततत्त्वञ्चेदखिलया वसुन्धरया, तदा परिहीयते महतो मानात्त-दुभयम्। एतत् सर्वमालोच्य मदीयमित्रशिरोमणिना स्वभावकविना प्रदीप्त-प्रतिभाशालिना श्रीभास्करानन्दस्वामिना कालनामण्डलान्तर्गतानन्दाश्रमाधि-नायकेन सुगमया मधुरया च गीर्वाणवाणीमयपद्यमालया व्यधायि समग्रस्यास्य सम्यगनुवादः। यत्रास्य सुतरां प्रकाशमाससाद गीर्वाणवाण्यामनन्यसामान्यं वैचक्षण्यम्, स्वभावसिद्धकवित्वप्रतिभानं सावलीला च विलक्षणा भाषानुवाद-शैली। सुकरः खलु संकल्पस्तादृशमहाग्रन्थानुवादगोचरो नाम, सुकरश्च वाङ्मात्रेण तदनुवादसाधनमुपन्यस्य मृषैवात्मगौरवप्रकटनम्, परं सुदुष्करस्ता-दृशमहाग्रन्थस्य समग्रस्य निपुणया गत्या सुरसरस्वत्या निरवद्यपद्यपद्धत्या मनोरमानुवादसंसाधनव्यापारः। तमिमं सुदुष्करं व्यापारं निरवशेषमनु-ष्ठाय निपुणेनानुवादकेन श्रीमद्भास्करानन्दयतिना प्रतिष्ठां नीतः सुमहानात्मनो बहुमानः कल्पान्तकालं यावदस्यां वसुन्धरायामत्युज्ज्वलज्योतिषा सम-वस्थास्यमानः।

सुचिरात् पूर्वं कौमारे सुप्रसिद्धमूलाजोडसंस्कृतमहाविद्यागारे विद्या-मधिगच्छतानुवादकवरेण सहैव सौभाग्यादस्माभिरुषितं, सहैव स्नातं, सहैव भुक्तं, सहैव प्रायेण शयितं, सहैव परिभ्रमणं कृतं, सहैव रूपकमभिनीतम्, सहैव च नर्मसंवादेन समतिक्रान्तः सुखमविदितव्यतीतः समयसङ्घातः। यद् यदनु-स्मरन्तोऽपि वयमद्य वृद्धे वयसि महान्तमानन्दमभिविन्दामः। ततः प्रभृत्येव सुहृद्भिः सुविदितमस्य महत् प्रतिभानम्।

यदा पुनरेकदा पाठसमाप्त्यनन्तरमध्यापकभूमिकामारूढ़ः सोऽयं दैवदुर्गत्या कौक्षनाडिकाच्छेदेन कृतान्तमुखं विशन्निव वैद्यकुलललामभूतस्य श्रीकालीकिङ्कर-सेनगुप्तस्य मैत्रीमूलेन महतानुकूल्येन कलिकातामुख्यचिकित्सानिलये चिकित्सितः

कृतान्तमुखात् प्रतिनिवृत्तः, तदैव सम्भावितं सुहृद्भिरनेन नूनं भाविनि काले किमपि सत्यं महत् कृत्यं सम्पादयितव्यमिति। सम्प्रति सैव सम्भावनावल्ली रूपकमहिम्ना विचित्राध्यात्मिकतत्त्वपिशुनेन द्विपत्रिता मनोहरेण 'तरणीविहार' खण्डकाव्येन पल्लविता फलवती च संवृत्ता श्रीचैतन्यचरितामृतस्यानेन गौरविते-नानुवादरत्नेनेति स्वान्ते वयमतिमहान्तं सन्तोषमासादयामः। कुपित-दैवादकाण्डे समापतितेन पत्नीवियोगेन दृढं वैराग्यमुपेयुषो यतिधर्ममाश्रित-स्यापि तस्य कालपरिपाकेण नास्मासु मात्रयापि मैत्री कौमारप्रभवा विशीर्णेति भूयसीं कृतवेदितामप्यस्य निवेदयामः।

ततकृतः श्रीचैतन्यचरितामृतस्यादिलीलानुवादः साकल्येनास्माभिस्तदीयेन महता सौजन्येन संस्कृतसाहित्यपरिषत्पत्रिकायां क्रमेण प्रकाशं नीतो ग्रन्था-कारेण संगृहीतश्च प्रचारार्थमवतिष्ठते। स एष काव्यप्रियाणामतिप्रमोदहेतुर्विशेषतो गौरतत्त्वमधिजिगमिषूणाम्। प्रकाशयिष्यते च तत्र नातिचिरेण तथैवा-वशिष्टो भागः, यः किल पूर्ववदेव विदध्याद् विद्यावतामनवद्यमानन्दसन्दोहम्।

तदिदानीं तदीयानुवादपरितृप्तास्तदीयमहिम्ना समावर्जिताश्च वयमाशास्महे,—

कृष्णदासकविराजनिर्मितं
गौरचन्द्रचरितामृतं महत्।
भास्करेण सुरवाङ्मयीकृतं
भारते रतिमतां श्रुतीयताम्॥

जीव्यादव्याजचारित्रं मित्रं नः कविभास्करः।
आकल्पान्तं स्वकृत्योत्थयशोभिर्यतिभास्करः॥ इति

तदीयमित्रम्मन्य—
श्रीकालीपदतर्काचार्य्यदेवशर्मणः
(महामहोपाध्यायस्य)

CHAITANYA CHARITAMRITAM

Lord Buddha was the first rebel child of India, who rose against the sanguinary sacrifices of vedic jajnas and also certain prejudices and practices that divided man from man in ancient India. He preached the doctrine of equality, fraternity and liberty from the ethical, humanitarian and spiritual plane,—long before men became politically conscious and precipitated bloody revolutions. His 'liberty' was synonymous with 'Nirvana'—or freedom from 'Transmigration'.

He has been acclaimed as an Avatar or an incarnation of God.

Lord Gouranga (alias Sri Chaitanya Mahapravu)—came about two thousand years after him with a similar mission. He was born at Nabadwip (Bengal) in 1486 A. D. on the day of vernal full moon and renounced the world similarly at the prime of his youth. He preached the message of Devotion and Divine Love,—as the panacea to heal and salve humanity from the cankers of schism and separatism engendered by the sneering arrogance of people enjoying places of vantage in our caste-ridden society under the hegemony of pelf and power.

He has also been hailed as an Avatar for his bewitching personality, deep erudition, humility of demeanour, affection for the downtrodden and his intense and infinite love of God. To him salvation is synonymous with love of God.

He was an embodiment of love or love-incarnate. While under inspiration of love,—he has been likened to a tempest-tossed ocean,—sometime shaking and vibrating through

Bhaja Nitai Gour Radhe Syam, Japa Hare Krishna Hare Ram.

every fibre of his being, and sometime its very opposite lying limp and immobile like a lump of flesh, when even his breathing became imperceptible and signs of life were all but extinct.

His contribution has been myriad-headed and has inspired India from the Himalayas to the cape Comorin right down to the present day.

He set up a new pattern of religious worship, sought to remove untouchability, and succeeded very considerably in eliminating social ostracism of the so-called 'sinners' out-casted by the then bigoted society.

He absorbed them all into the fold of his liberal Vaishnavism and resisted successfully the inroads of Islamic proselytization.

He ushered in a flood-tide of literary works in Sanskrit, Maithilee and Bengali, Ooriya and Assamese, contributed not only by Hindus but also by a large number of Muslim writers, some of whom even embraced Vaishnavism of their own accord.

Chaitanya Charitamrita, meaning literally the elysium of Sri Chaitanya's character and teaching,—is an epitome of his life and philosophy. He established a new school of Vedanta. He solved the riddles of Monism and Dualism and reconciled some of their differences in his famous version of Vedanta known as Achintya-Veda-Aveda-Baad, —a catholic amalgam of the doctrines of Nimbarka and Ramanuja. He ruled out the 'Dream'-theory or the Maya-Baad of Shankar. He rejected also his doctrine that Jiva was equal to Shiva,—on the very simple analogy of the absurdity of the 'part' being equal to the 'whole', 'Jiva' being an infinitesimal particle of the infinity that is Shiva—

Bhaja Nitai Gour Radhe Syam, Japa Hare Krishna Hare Ram.

or Brahma or Vishnu or whatever other name might be given to God. He laid the entire emphasis on the love of God,—meditation of God and the sacred Name of God. The Name of God was identical with God Himself. Compassion for all creatures,—looked upon as temples of God, company of saints and godly persons and the reading of sacred books, (Bhagabat, Geeta etc.) were also considered indispensable measures by him for 'sadhana' or means of attaining bliss.

The attainment of divine love alone was the summum bonum of every man and woman in this fickle and fast-changing world.

His conception of God is that of the Supreme Being, who is, at the same time both personal cum transcendental (पुरुषोत्तमः) and impersonal cum immanent (ब्रह्म). He created Himself out of Himself and yet remained Himself unspent and unaffected in the process of creation.

His nonviolent conquest of the Kazi (popularly called Chand Kazi alias Moulana Serajuddin) and his spiritual transformation of Jagai and Madhai constituted the first weapon of nonviolent warfare, which was activised and re-applied by Mahatmaji in his War of India's Independence.

This holy book,—the gospel of Sri Chaitanya and Sri Nityananda his spiritual twin, was written by kaviraj Sri Krishnadas Goswami at the ninth decade of his saintly life, in Bengali verse, under divine inspiration. Krishnadas was born in 1517 (circ). He started writing the work in 1606 and completed it in 1615 A. D. when he was of about 98 years of age. It has been translated into English in the past,—but it has not been possible to preserve and convey in English the power and

subtilty of the original text. It was therefore that His Holiness Swami Vaskarananda Saraswati dedicated himself, for a number of years, to this great task of translating it into Sanskrit verses, so that it might come within the reach of all, who are conversant with this most ancient and classical language. Fortunately, for all concerned, Sanskrit has been admitted, as a guest of honour, through the portals of many important universities of the world.

I have read the translation and can vouch for its great qualities of elegance and simplicity. It has appeared to me, in many places,—that it has almost dissolved the difference between Bengali and Sanskrit.

It is not an easy thing to translate the highly metaphysical expressions of the original work into their precise and elegant Sanskrit equivalents. One cannot fail to be struck with surprise, therefore, to find that the bulk of Swamiji's slokas may be understood by any one possessing a good knowledge of Rashtrabhasha or Bengali. It has the additional advantage of the rhythm and mellifluous music of classical Sanskrit.

A word must be said about Swamiji,—the author himself. Brahmin and Goswami by birth,—he is also a direct descendant (being ninth in the line) of a great Vaishnaba saint and yogi *Sri* Ghanashyam Goswami, who lived about 300 years ago. Swamiji was born in the year 1891, on Saturday, the 21st Ashar 1298 B. S. and his pre-sannyasa name was Sri Satya Kinkar Goswami.

Sri Ghanashyam had the vision and catholicity,—to combine and commingle the two great streams of Hindu worship—the Shākta cult and the Vaishnaba cult. In commemoration of him, even today, an annual fair is held

on the ground sanctified by his hermitage at Konda (Dt. Burdwan, W. Bengal) on the southern bank of the river Ajai about a mile to the east of Pandaveshvar Ry. Station—near where, on the western side, an annual fair is also held to commemorate the Pandavas' visit to the place.

He had his schooling, first at home, under his father Pandit Dolgobinda Goswami, then at the Sanskrit chatuspathi at Ukhra, our own village,—about 6 miles to the south of Konda, under Pandit A hutosh Smrititirtha and finally at the renowned Sanskrit College at Mulajore near Calcutta. He studied at the feet of Pandit Haripada Vidyaratna Kavya-smriti-tirtha, Pandit Biresh Nath kavyatirtha and Mahamahopadhya Pandit Shib Chandra Sarbabhouma,—the latter was one of the brightest luminaries of Sanskrit learning at the time, in Bengal, both in Sahitya and Darshan. He topped the list of successful candidates in the Kavyatirtha examination in the year 1911.

There was a major crisis, in his life, on the 5th January 1918. His intestine (duodenum) was perforated at the site of an old peptic ulcer of about an inch in diameter.

He had to be carried, post haste, in that very desperate condition from Ukhra to the Calcutta Medical College, and an emergency laparotomy was performed upon him, at least 48 hours after the actual perforation by Major Arthur Denham White I. M. S. We were led to believe that there was a mighty purpose for the fulfilment of which his life was saved so miraculously by merciful Providence.

He had everything worth having in one's wordly life,—a large number of devoted students and disciples, an affectionate

family,—and a host of friends and admirers to boot. He had properties and income quite adequate for a decent living. But,—when the urge for renunciation came from within, he forsook everything and took sannyasa at Ananda Ashram, Kalna (Burdwan) in the year, 1946 (1st Ashwin 1353 B. S.), at the mature age of 55 yrs, from the Holy Mother Paramhansa Shree Shree Jnanananda Saraswati. She was a nonagenarian saint and divinity, who dedicated the last fifty years of her austere and meditative life to the spiritual upliftment of Bengal's womanhood. She could plunge at will into a state of Samadhi or Divine bliss and yet used to overflow with the milk of devotion of Vaishnavic love for Lord Sri Krishna the Purushottama. The Mother showered her choicest benedictions upon Swamiji before she passed into immortality.

We have always expected great things from Swamiji and his translation of Chaitanya Charitamrita is certainly a rich contribution towards his fulfilment of the same.

He has written other works in Sanskrit and his 'Tarani-Bihar' is a little masterpiece of lyrical technique, where Sri Krishna is playfully plying a ferry-boat—over the Jamuna and,—since the wind is high,—holds the shy and frightened maidens of Brindaban, under his charge of boatmanship, for the time being, and the poet utilizes the opportunity to weave and introduce an amatory conversation in that exquisite setting.

His bīography of Sri Sri Mä, including a record of her teachings in her own simple words in Bengali, was certainly a noble forerunner of the present great work. It will amply repay the toils of any reader

and dish out to him a unique course of spiritual victuals,—savoury and sweet, and provide him with an inexhaustible source of peace and bliss for all time to come.

His 'five gems' of 'Sri Sri Gurupäda pancharatnam' could stand a favourable comparison with any similar classical composition, both in point of significance and grandeur,—music and melody.

We entreat our readers to read the work with receptive sympathy. Let them keep before them the picture of Lord Gouranga, who is looked upon as the incarnation of Sri Krishna. He incarnāted Himself,—with the complexion of,—and the very yearning and longing of Sri Radha for Himself (i.e., Sri Krishna) to demonstrate,—as it were,—the acme and intensity of Divine Love in this desert world burning with lust and thirst. At the very outset the author (Krishnadas Kaviraj) bows down to Him as:—"राधाभाव-द्युतिसुवलितं नौमि तं कृष्णरूपम्" ।

This great work shows us the way, how we can, without undergoing any severe austerity and self-mortification, sublimate our carnal propensities by turning them Godwards,—for God, like the Ocean, is the only goal and confluence of all rivers and aqueducts. Hindus do not look upon Sita-Ram,—Radha-Krishna,—Shiva-Durga,—etc., either as idols or images or as human beings in flesh and blood, subject to birth and death. They are all one and the same. They are worshipped as finite symbols of the infinite God,—the Supreme Being,—just as we make use of a small radio-set, as a medium to receive and transmit sound from and to infinite distances.

He is identified with God,— incarnated in the temple

of the body, for the convenience of comprehension and meditation and is not looked upon as an idol of limited dimensions.

Terms such as Krishna and Radha,—'He' and 'She' are like two in one—like fire and its burning power,—as if the Mighty and His might, the Powerful and His power are shown and seen separately in Leela or Divine Dalliance. All these names may be symbolized as 'Aum' (ओँ—or Pranaba) or any other denomination of the human vocabulary. He may be called even as 'x' of the algebraic terminology that cannot be solved, except in so far as it solves and manifests itself at its own pleasure.

Let us cut short our preface now and close it with the last Sloka of the 'five gems' of Swami ji referred to above :—

ओँ शुद्धज्ञानतनुर्महारसमयी राधा परा देबता
नित्यानन्दवपू रसैकनिलयः कृष्णः परः पूरुषः ।
द्वैताद्वैत-विभूतियोग-युगपद्भावावतारस्तयो
र्ज्ञानानन्द-सरस्वती विजयतामन्तर्बहिः श्रीगुरुः ॥

Kalikinkar Sengupta

M.A., B.Sc., M.B.B.S., D.T.M.

सूचीपत्रम्

परिच्छेदः	विषयः	पत्रपृष्ठसंख्या
प्रथमः	मङ्गलाचरणम्	१—११
द्वितीयः	श्रीकृष्णचैतन्यस्य तत्त्वनिरूपणम्	११—२१
तृतीयः	तस्यावतरणे सामान्यलक्षणम्	२२—३२
चतुर्थः	तत्र च मूलप्रयोजन-कथनम्	३३—५९
पञ्चमः	नित्यानन्द-तत्त्वनिरूपणम्	६०—७९
षष्ठः	अद्वैततत्त्व-निरूपणम्	८०—९०
सप्तमः	पञ्चतत्त्व-व्याख्यानम् नाम-प्रेमप्रचार-वर्णनञ्च	९०—१०३
अष्टमः	श्रीकृष्णचैतन्यलीलावर्णनम्	१०४—१११
नवमः	भक्तिकल्पवृक्षवर्णनम्	११२—११५
दशमः	मूलस्कन्धस्य शाखागणना	११६—१२४
एकादशः	नित्यानन्द-स्कन्धस्य शाखावर्णना	१२५—१३०
द्वादशः	अद्वैतस्कन्धस्य शाखावर्णना	१३०—१३७
त्रयोदशः	श्रीकृष्णचैतन्यस्यजन्म-विवरणम्	१३८—१४८
चतुर्दशः	तस्य बाल्यलीला वर्णनम्	१४९—१५६
पञ्चदशः	तस्य पौगण्डलीला-वर्णनम्	१५७—१५९
षोड़शः	तस्य कैशोरलीलावर्णनम् दिग्-विजयिपण्डितविजय-वर्णनञ्च	१६०—१६८
सप्तदशः	तस्य यौवनलीला वर्णनम्	१६९—१९३

श्रीश्रीगुरुपादपञ्चरत्नम् ।

यो ब्रह्माणमबोधयच्छ्रुतिगुहाम्वोङ्कारमापूरयन
यो गोपी-हृदयान्यकर्षदनिशं वेणुं वने वादयन ।
तत्त्वं शोकविमूढमर्जुनमशाद् यः पाञ्चजन्यं धमन
ज्ञानानन्दसदात्मकाय गुरवे कृष्णाय तस्मै नमः ॥१॥

या ज्ञानप्रभया भयावह-महामोहान्धतां निघ्नती
स्वानन्दामृतधारयात्यशमयत पार्थस्य शोकानलम् ।
शब्दब्रह्ममयी सुधा भगवतो या श्रीमुखान्निर्गता
ज्ञानानन्दसरस्वतीं भगवतीं गीतां गुरुं तां भजे ॥२॥

या हन्तुं मधुकैटभौ विधिनुना प्राबोधयन्माधवं
भित्त्वा या महिषासुरं द्विविभवानानन्दयल्लीलया ।
कृत्वा शुम्भनिशुम्भदैत्यमथनं यैकाद्वितीयाभवज्
ज्ञानानन्दसरस्वती जयति सा श्रीचण्डिका श्रीगुरुः ॥३॥

ज्ञानं निर्विषयं हरेस्तनुरुचिज्योतस्ना हि गङ्गासरि-
दानन्दो घनमाधुरी च यमुना कालप्रभा शाम्भवी ।
व्यक्ताव्यक्तसदात्मिका-सुरसरिद्-ब्राह्मीति वेणीत्रयी
ज्ञानानन्दसरस्वती भवतु नः संशुद्धये श्रीगुरुः ॥४॥

शुद्धज्ञानतनुर्महारसमयी राधा परा देवता
नित्यानन्दवपुरसैकनिलयः कृष्णः परःपुरुषः ।
द्वैताद्वैतविभूतियोगयुगपद्भावावतारस्तयो-
र्ज्ञानानन्दसरस्वती विजयतामन्तर्बहिः श्रीगुरुः ॥५॥

श्रील-कृष्णदासकविराजगोस्वामिप्रणीत-

श्रीचैतन्यचरितामृतस्य संस्कृतानुवादः ।

अनुवादक-निवेदनम्

श्रीकृष्णदास-कविराज-महासमुद्रा-
च्चैतन्य-चन्द्र-चरितामृतमुद्धृतं यत् ।
वङ्गीयवागविदुषां सुरवाग्बुधानां
तद्भास्करः सुरगिरानुकरोति तृप्त्यै ॥
नेशानुरागान्न कवित्वदम्भा-
न्नान्यानुरोधान्न च वित्तलोभात् ।
आस्वाद्यतां मूलरसो रसज्ञै-
रित्याग्रहादेव कृतोऽनुवादः ॥
माधुर्यं स्वयमास्वाद्य स्वात्मीयैस्तदलम्भयन् ।
न कश्चिल्लभते तृप्तिमेष धर्मः स्वभावजः ॥

—:o:—

ग्रन्थारम्भः

श्रीचैतन्यचरितामृत आदिलीलायां

प्रथमः परिच्छेदः

"वन्दे गुरूनीशभक्तानीशमीशावतारकान् ।
तत्प्रकाशांश्च तच्छक्तीः कृष्णचैतन्यसंज्ञकम्" ॥१॥
"वन्दे श्रीकृष्णचैतन्य-नित्यानन्दौ सहोदितौ ।
गौड़ोदये पुष्पवन्तौ चित्रौ शन्दौ तमोनुदौ" ॥२॥
"यदद्वैतं ब्रह्मोपनिषदि तदप्यस्य तनुभा
य आत्मान्तर्यामी पुरुष इति सोऽस्यांशविभवः ।

षड़ैश्वर्यैः पूर्णो य इह भगवान् स स्वयमयं
न चैतन्यात् कृष्णाज्जगति परतत्त्वं परमिह" ॥३॥
"अनर्पितचरीं चिरात् करुणयावतीर्णः कलौ
समर्पयितुमुन्नतोज्ज्वलरसां स्वभक्तिश्रियम् ।
हरिः पुरटसुन्दर-द्युति-कदम्ब-सन्दीपितः
सदा हृदय-कन्दरे स्फुरतु वः शचीनन्दनः" ॥४॥
"राधा कृष्ण-प्रणय-विकृतिर्ह्लादिनी शक्तिरस्मा-
देकात्मानावपि भुवि पुरा देहभेदं गतौ तौ ।
चैतन्याख्यं प्रकटमधुना तद्द्वयं चैक्यमाप्तं
राधा-भाव-द्युति-सुवलितं नौमि कृष्णस्वरूपम्" ॥५॥
"श्रीराधायाः प्रणयमहिमा कीदृशो वानयैवा-
स्वाद्यो येनाद्भुतमधुरिमा कीदृशो वा मदीयः ।
सौख्यं चास्या मदनुभवतः कीदृशं वेति लोभा-
त्तद्भावाढ्यः समजनि शची-गर्भसिन्धौ हरीन्दुः" ॥६॥
"सङ्कर्षणः कारणतोयशायी गर्भोदशायी च पयोब्धिशायी ।
शेषश्च यस्यांशकलाः स नित्यानन्दाख्यरामः शरणं ममास्तु" ॥७॥
"मायातीते व्यापि-वैकुण्ठलोके पूर्णैश्वर्ये श्रीचतुर्व्यूहमध्ये ।
रूपं यस्योद्भाति सङ्कर्षणाख्यं तं श्रीनित्यानन्दरामं प्रपद्ये" ॥८॥
"मायाभर्त्ताजाण्ड-सङ्घाश्रयाङ्गः शेते साक्षात् कारणाम्भोधिमध्ये ।
यस्यैकांशः श्रीपुमानादिदेवस्तं श्रीनित्यानन्दरामं प्रपद्ये" ॥९॥
"यस्यांशांशः श्रीलगर्भोदशायी यन्नाभ्यब्जं लोकसङ्घातनालम् ।
लोकस्रष्टुः सूतिकाधाम धातुस्तं श्रीनित्यानन्दरामं प्रपद्ये" ॥१०॥
"यस्यांशांशांशः परात्माखिलानां पोष्टा विष्णुर्भाति दुग्धाब्धिशायी ।
क्षौणीभर्त्ता यत्कला सोऽप्यनन्तस्तं श्रीनित्यानन्दरामं प्रपद्ये" ॥११॥
"महाविष्णुर्जगत्कर्त्ता मायया यः सृजत्यदः ।
तस्यावतार एवायमद्वैताचार्य्य ईश्वरः" ॥१२॥

"अद्वैतं हरिणाद्वैतादाचार्य्यं भक्तिशंसनात ।
भक्तावतारमीशं तमद्वैताचार्य्यमाश्रये" ॥१३॥
"पञ्चतत्त्वात्मकं कृष्णं भक्तरूप-स्वरूपकम् ।
भक्तावतारं भक्ताख्यं नमामि भक्त-शक्तिकम् " ॥१४॥
"जयतां सुरतौ पङ्गोर्मम मन्दमतेर्गती ।
मत्-सर्वस्वपदाम्भोजौ राधामदनमोहनौ" ॥१५॥
"दीव्यद्‌वृन्दारण्य-कल्पद्रुमाधः श्रीमद्रत्नागारसिंहासनस्थौ ।
श्रीमद्राधा-श्रील-गोविन्ददेवौ प्रेष्ठालीभिः सेव्यमानौ स्मरामि" ॥१६॥

"श्रीमान रासरसारम्भी वंशीवट-तट-स्थितः ।
कर्षन वेणुस्वनैर्गोपीर्गोपीनाथः श्रियेऽस्तु नः" ॥१७॥
भूयो जयति चैतन्यो नित्यानन्दस्तथा प्रभुः ।
जयत्यद्वैतचन्द्रश्च गौरभक्तगणस्तथा ।
मम नाथास्त्रयो देवा य एते गौड़वैष्णवान ।
अकुर्वन्नात्मसात्तेषां कुर्वे श्रीपादवन्दनम् ॥
ग्रन्थारम्भे करोम्यत्र मङ्गलाचरणं यथा ।
श्रीगुरुं वैष्णवान् श्रीमद्भगवन्तश्च चिन्तये ॥
त्रयाणां चिन्तयैवैषां भवेद्विघ्नविनाशनम् ।
आयासेन विनैव स्याद्वाञ्छितस्य प्रपूरणम् ॥
आशीर्वादो नमस्कारो वस्तुनिर्देश इत्ययम् ।
त्रिधा स्यान्मङ्गलाचारस्तमेवादौ करोम्यहम् ॥
प्रथमं श्लोकयुग्मेन स्वेष्टदेव-नमस्क्रियाम् ।
सामान्येन विशेषेण द्विधैव विदधाम्यहम् ॥
श्लोकेन च तृतीयेन वस्तु निर्दिश्यते मया ।
उद्देशः परतत्त्वस्य विज्ञातुं येन शक्यते ॥
आशीर्वादं चतुर्थेन जगतो रचयाम्यहम् ।
याचित्वा कृष्णचैतन्यप्रसादं विश्ववासिषु ॥

वाह्यावतारहेतुश्च तच्‌ श्लोकेन वदाम्यहम्‌ ।
पञ्चमेन च षष्ठेन वच्‌मि मूलप्रयोजनम्‌ ॥
षड्भिस्तैः कृष्णचैतन्यतत्त्वं श्लोकैः प्रकाशये ।
महत्त्वं पञ्चभिः श्लोकैर्नित्यानन्दस्य वर्णये ॥
अद्वैत-तत्त्वमाख्यातं मया श्लोकद्वयेन च ।
श्लोकेन कृतमेकेन पञ्चतत्त्व-निरूपणम्‌ ॥
एवं चतुर्दशश्लोक्या मङ्गलाचरणं कृतम्‌ ।
तयैव विहितं सम्यक्‌ सर्ववस्तुनिरूपणम्‌ ॥
अथ भक्त्या नमस्कृत्य श्रोतॄन्‌ सर्वांश्च वैष्णवान्‌ ।
तत्तच्‌ श्लोकस्थतात्पर्यं व्याख्यास्यामि विचारतः ॥
चैतन्यकृष्णतत्त्वस्य यथाशास्त्रनिरूपणम्‌ ।
करिष्याम्यत्रधानेन सर्वे शृण्वन्तु वैष्णवाः ॥
कृष्णो गुरुद्वयं भक्ताः प्रकाशा अवतारकाः ।
शक्तिश्चेत्याश्रयन्‌ षोढ़ा रूपाणि स्फुरति प्रभुः ॥
एतस्य तत्त्वषट्कस्य कृत्वा श्रीपादवन्दनम्‌ ।
सामान्येन करोम्यादौ मङ्गलाचरणक्रियाम्‌ ॥
"तथाहि"—"वन्दे गुरूनीशभक्तानीशमीशावतारकान्‌ ।
तत्प्रकाशांश्च तच्छक्तीः कृष्णचैतन्यसंज्ञकम्‌" ॥१॥
मन्त्रदातुर्गुरोः शिक्षा-गुरूणां मम तावताम्‌ ।
आदौ पदेषु सर्वेषां वन्दनं विदधाम्यहम्‌ ॥
श्रीरूपदेवश्च सनातनश्च, श्रीजीवदेवो रघुनाथभट्टः ।
गोपालभट्टो रघुनाथदासः, षड़ेव शिक्षागुरवो ममैते ॥
तत्सर्वपादपद्मेषु कोटिकृत्वो नतिर्मम ।
यावन्तो भगवद्भक्ताः श्रीवासाद्याश्चकासति ।
तावतां पादपद्मानि नमस्यामि सहस्रशः ॥
श्रीमानद्वैत आचार्य्यः प्रभोरंशाऽवतारकः ।

तस्य श्रीचरणाम्भोजे कोटिः प्रणतयो मम ॥
श्रीनित्यानन्दरायः स्वरूपप्रकाश ईशितुः ।
यस्याहमधमो दासो वन्दे तस्य पदाम्बुजम् ॥
गदाधरपण्डिताद्याः प्रभोर्मे निजशक्तयः ।
सर्वेषां चरणे तेषां सहस्रं नतयो मम ॥
कृष्णचैतन्यदेवस्तु भगवान स्वयमीश्वरः ।
तस्य श्रीपादपद्मे मेऽनन्ताः सन्तु नमस्क्रियाः ॥
भूयो भूयो नमस्कृत्य श्रीलं सावरणं प्रभुम ।
स यथा तत्त्वषट्कं स्यात् सविचारं तथोच्यते ॥
श्रीचैतन्यस्य दासो हि यद्यपि मद्गुरुः स्वयम् ।
तथापि तत्प्रकाशं तं जानाम्यहमसंशयम् ॥
गुरुः श्रीकृष्णरूपो हि व्यक्तः शास्त्रप्रमाणतः ।
गुरुरूपेण भक्तानां श्रीकृष्णो दयते स्वयम् ॥

"तथाहि श्रीमद्भागवते (११।१७।२२)—
"आचार्य्यं मां विजानीयान्नावमन्येत कर्हिचित् ।
न मर्त्यबुद्धयासूयेत सर्वदेवमयो गुरुः" ॥१८॥
शिक्षागुरुन्तु जानामि स्वयं कृष्णस्वरूपकम् ।
अन्तर्यामीति भक्ताग्र इति रूपद्वयं विभोः ॥
"तत्रैव (११।२९।६)—
"नैवोपयन्त्यपचितिं कवयस्तवेश
ब्रह्मायुषापि कृतमृद्धमुदः स्मरन्तः ।
योऽन्तर्बहिस्तनुभृतामशुभं विधुन्व-
न्नाचार्य्यचैत्त्यवपुषा स्वगतिं व्यनक्ति" ॥१९॥

"तथाहि श्रीभगवद्गीतायाम् (२०।१०)
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते" ॥२०॥

"यथा ब्रह्मणे भगवान् स्वयमुपदिश्यानुभावितवान्।
तथाहि (श्रीमद्भागवते २।९।३०—३५)

ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम्।
सरहस्यं तदङ्गञ्च गृहाण गदितं मया ॥२१॥
यावानहं यथाभावो यद्रूपगुणकर्मकः।
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात ॥२२॥
अहमेवासमेवाग्रे नान्यद् यत् सदसत्परम्।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥२३॥
ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि।
तद्विद्यादात्मनो मायां यथाभासो यथा तमः ॥२४॥
यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥२५॥
एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः।
अन्वयव्यतिरेकाभ्यां यत् स्यात सर्वत्र सर्व्वदा ॥२६॥

"तथाहि श्रीकृष्णकर्णामृते प्रथमश्लोके—

चिन्तामणिर्जयति सोमगिरिर्गुरुर्मे
शिक्षागुरुश्च भगवान शिखिपिच्छमौलिः।
यत्पादकल्पतरुपल्लवशेखरेषु
लीलास्वयंवररसं लभते जयश्रीः" ॥२७॥
अन्तर्यामिणमीशं तु न जीवो द्रष्टुमर्हति।
स हि भक्ताग्ररूपेण तस्य शिक्षागुरुर्भवेत ॥

"तथाहि श्रीमद्भागवते (११।२६।२६)—

ततो दुःसङ्गमुत्सृज्य सत्सु सज्जेत बुद्धिमान।
सन्त एवास्य छिन्दन्ति मनोव्यासङ्गमुक्तिभिः ॥२८॥

तथाहि (भाः ३।२५।२२)—

सतां प्रसङ्गान्मम वीर्य्यसंविदो
भवन्ति हृत्कर्णरसायनाः कथाः ।
तज्जोषणादाश्वपवर्गवर्त्मनि
श्रद्धारतिर्भक्तिरनुक्रमिष्यति" ॥२९॥
भक्त ईशस्य रूपं हि तस्याधिष्ठानमुच्यते ।
भक्तस्य हृदये कृष्णो विश्रामं लभते सदा ॥

"तथाहि (भाः ९।४।६८)—

साधवो हृदयं मह्यं साधूनां हृदयन्त्वहम् ।
मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि" ॥३०॥

तत्रैव (१।१३।८)—

"भवद्विधा भागवतास्तीर्थीभूताः स्वयं प्रभो ।
तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृता" ॥३१॥
भक्तास्ते द्विविधाः प्रोक्ताः पार्षदाः साधकास्तथा ।
ईश्वरस्यावताराः स्युरंशेन च गुणेन च ॥
शक्त्यावेशेन चातस्तेऽवतारास्त्रिविधा मताः ।
पुरुषा अंशावतारा मत्स्यकूर्मादयः स्मृताः ॥
गुणावतारत्रितयं ब्रह्मविष्णुशिवात्मकम् ।
शक्त्यावेशावताराश्च पृथुव्यासस्सनादयः ॥
मुख्यो विलास इत्येवं प्रकाशः स्याद्विधा प्रभोः ।
वपुः स्वरूपतो ह्येकं यद्योति बहुरूपताम् ॥
आकारे तु न भेदोऽस्ति स्वरूपेणैकमेव तत् ॥
महिषीणां विवाहे च यथा वा रासमण्डले ।
मुख्यः प्रकाश एवायं कृष्णस्येति निगद्यते ॥

तथाहि (भाः १०।६९।२)—

"चित्रं बतैतदेकेन वपुषा युगपत् पृथक् ।
गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत्" ॥३२॥

तत्रैव (भाः १०।३३।३)—

"रासोत्सवः सम्प्रवृत्तो गोपीमण्डलमण्डितः ।
योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ॥३३॥
प्रविष्टेन गृहीतानां कण्ठे स्वनिकटं स्त्रियः ।
यं मन्येरन् नभस्तावद्विमानशतसङ्कुलम् ॥३४॥
दिवौकसां सदाराणामत्यौत्सुक्यभृतात्मनाम् ।
ततो दुन्दुभयो नेदुर्निपेतुः पुष्पवृष्टयः" ॥३५॥

तथाहि लघुभागवतामृते पूर्वखण्डे (आवेशकथने ९ श्लोकः ।)—

"अनेकत्र प्रकटता रूपस्यैकस्य यैकदा ।
सर्वथा तत्स्वरूपैव स प्रकाश इतीर्य्यते" ॥३६॥
एकस्यैव तु देहस्य विभिन्नाकाररूपतः ।
अनेकधा प्रकाशश्चेत् स विलास उदाहृतः ॥

तत्रैव तदेकात्मरूपकथने (५म-श्लोकः ।)—

"स्वरूपमन्याकारं यत्तस्य भाति विलासतः ।
प्रायेणात्मसमं शक्त्या स विलासो निगद्यते" ॥३७॥
नारायणः परव्योम्नि बलदेवो यथा व्रजे ।
वासुदेवादयो यद्वद् यथा सङ्कर्षणादयः ॥
शक्तयस्तिस्र ईशस्य महिष्यो द्वारकापुरि ।
लक्ष्मीगणश्च वैकुण्ठे गोप्यः श्रेष्ठा यथा व्रजे ॥
व्रजेन्द्रनन्दनः कृष्णो भगवान् यासु वर्त्तते ।
साक्षात् कृष्णस्य ताः कायव्यूहास्ततसदृशश्च ताः ॥
एतैर्भक्तादिभिः सर्वैः प्रभुः सावरणः सदा ।
अनुक्रमेण भक्तादीन् वन्दे, तत् सर्वमङ्गलम् ॥

कृत्वा श्लोकेन सामान्यं मङ्गलाचारमादिना ।
द्वितीयेन करिष्यामि वन्दनं तद्विशेषतः ॥
"वन्दे श्रीकृष्णचैतन्यनित्यानन्दौ सहोदितौ ।
गौड़ोदये पुष्पवन्तौ चित्रौ शन्दौ तमोनुदौ" ॥२॥
कोटिसूर्य्येन्दुधामानावास्तां कृष्णबलौ व्रजे ।
यौ पुरा कृष्णचैतन्यनित्यानन्दाभिधौ हि तौ ॥
अनुकम्पागुणोपेतौ कृपया जगति प्रभू ।
इदानीमुदितौ गौड़देशरूपोदयाचले ॥
यत्प्रकाशेन सर्वेषां जगतां मोदभागिता ।
सूर्य्याचन्द्रमसौ यद्वद् दूरीकृत्य तमो घनम् ।
प्रकाश्य वस्तुनो रूपं लोके धर्मं प्रयच्छतः ॥
तद्वद् द्वौ भ्रातरावेतौ जीवस्याज्ञानरूपकम् ।
तमो विनाश्य भक्ताय वस्तुतत्त्वं प्रयच्छतः ॥
अज्ञानार्थस्तमःशब्दस्तततात्पर्य्यन्तु कैतवे ।
धर्मार्थकाममोक्षादिवाञ्छा कैतवमुच्यते ॥

तथाहि (भाः १।१।२)—

"धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्" ॥३८॥
धर्मार्थकामवाञ्छातो मोक्षेच्छाधिककैतवम् ।
यतस्तस्याः प्रभावेण कृष्णभक्तिः प्रलीयते ॥

व्याख्यातञ्च स्वामिचरणैः—

"प्रशब्देन मोक्षाभिसन्धिरपि निरस्त इति" ॥३९॥
सदसच्चाखिलं कर्म कृष्णभक्तेः प्रबाधकम् ।
अज्ञानतमसो धर्मो जीवस्येति निगद्यते ॥

तत्तमो यत्प्रसादेन नाशमाप्नोति निश्चितम् ।
तमो विधूय तत्तत्त्वं तौ प्रकाशयतः प्रभू ॥
कृष्णश्च कृष्णभक्तिश्च प्रेमा च नामकीर्त्तनम् ।
आनन्दरूपाण्येतानि तत्त्ववस्त्विति चोच्यते ॥
सूर्य्याचन्द्रमसौ बाह्यं दूरीकृत्यैव तामसम् ।
बाह्यं घटादिवस्त्वेव प्रकाशयितुमर्हतः ॥
द्वावेतौ भ्रातरौ किन्तु भक्तानामान्तरं तमः ।
प्रक्षाल्येक्षयतः शीघ्रं श्रीभागवतयुग्मकम् ।
आद्यं भागवतं वस्तु श्रीभागवतसंहिता ।
अन्यद् भक्तिरसाधारो भगवद्भक्त उच्यते ॥
तद्भागवतयुग्मेन सिञ्चन भक्तिरसं हृदि ।
भक्तस्य वशमाप्नोति तत्प्रेम्णा स्वयमीश्वरः ॥
आश्चर्य्यं प्रथमं तावत् प्रकाशो युगपद्द्वयोः ।
द्वितीयं निहतश्चित्तगुहायामपि यत्तमः ॥
दिष्ट्येमौ सूर्यराकेशौ कृपापरवशौ विभू ।
उदितौ गौडदेशेऽस्मिंस्तयोर्वन्दे पदाम्बुजम् ॥
यतो विघ्नविनाशः स्यात्तथाभीष्टप्रपूरणम् ॥
एतच् श्लोकद्वयेनैव कृतं मङ्गलवन्दनम् ।
श्लोकस्य च तृतीयस्य व्याख्यानं श्रूयतामतः ।
किन्तु वक्तव्यबाहुल्याद् ग्रन्थविस्तरतो भयात् ॥
अल्पाक्षरञ्च संक्षिप्तं सारार्थं वर्णयाम्यहम् ।

"अनादिव्यवहारसिद्धप्राचीनैः शास्त्रे उक्तञ्च—
मितञ्च सारञ्च वचो हि वाग्मितेति" ।

अज्ञानप्रमुखा दोषाः खण्ड्यन्ते शृण्वतो हृदि ।
श्रीकृष्णे प्रेम गाढं स्यात् सन्तोषः परमस्तथा ॥

महत्त्वं कृष्णचैतन्यश्रीनित्यानन्ददेवयोः ।
अद्वैतस्य च भक्तानां भक्तेर्नाम्नो रसस्य च ॥
प्रेम्णस्तत्त्वं विचार्यैव वर्णयामि पृथक् पृथक् ।
श्रुत्वैवं वस्तुतत्त्वस्य सारं गृह्णन्तु सज्जनाः ॥
य आशास्ते पदाम्भोजे श्रीरूपरघुनाथयोः ।
स कृष्णदास आह श्रीचैतन्यचरितामृतम् ॥

इति श्रीचैतन्यचरितामृत आदिलीलायां गुर्वादिवन्दन-
मङ्गलाचरणं नाम प्रथमपरिच्छेदः ॥१॥

द्वितीयः परिच्छेदः

"श्रीचैतन्यप्रभुं वन्दे बालोऽपि यदनुग्रहात् ।
तरेन्नानामतग्राहव्याप्तं सिद्धान्तसागरम्" ॥१॥
"कृष्णोत्कीर्तनगाननर्तनकलापाथोजनिभ्राजिता
सद्भक्तावलिहंसचक्रमधुपश्रेणीविहारास्पदम् ।
कर्णानन्दिकलध्वनिर्वहतु मे जिह्वामरुप्राङ्गणे
श्रीचैतन्य दयानिधे तव लसल्लीलारस स्वर्धुनी" ॥२॥
जयति जयति शश्वत् कृष्णचैतन्यदेवो
जयति जयति नित्यानन्ददेवः सदैव ।
जयति जयति नित्यं श्रीमदद्वैतचन्द्रो
जगति च विजयन्तां श्रील-गौराङ्गभक्ताः ॥
श्लोकस्य च तृतीयस्य विवृणोम्यर्थसम्पदम् ।
वस्तुनिर्देशरूपं तन्मङ्गलाचरणं यतः ॥
"यदद्वैतं ब्रह्मोपनिषदि तदप्यस्य तनुभा
य आत्मान्तर्यामी पुरुष इति सोऽस्यांशविभवः ।

षड़ैश्वर्यैः पूर्णो य इह भगवान स स्वयमयम्
न चैतन्यात् कृष्णाज्जगति परतत्त्वं परमिह" ॥३॥

ब्रह्मात्मा भगवांश्चेत्यत्रानुवाद्या इमे त्रयः।
तनुभांशः स्वयञ्चेति विधेयत्रयमीरितम् ॥
समुद्दिश्यानुवाद्यं प्राग् विधेयं तत उल्लिखेत्।
नयेनानेन शास्त्रार्थविवृतिः क्रियते मया ॥
कृष्णो हि परमं तत्त्वं कृष्णो हि भगवान स्वयम्।
पूर्णज्ञानं तथा पूर्णानन्दो भूमा स एव हि ॥
नन्दात्मज इति ब्रूते यं भागवतसंहिता।
श्रीकृष्णः सोऽवतीर्णोऽयं श्रीचैतन्याभिधः प्रभुः ॥
प्रकाशतारतम्येन स गृह्णात्यभिधात्रयम्।
ब्रह्मेति परमात्मेति भगवानित्यनुक्रमात् ॥

"तथाहि श्रीमद्भागवते (१।२।११)—

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" ॥४॥

श्रीविग्रहस्य तस्यैव शुद्धं किरणमण्डलम्।
ब्रह्म सर्वमलास्पृष्टं सर्वोपनिषदो जगुः ॥
चर्मचक्षुर्जनः सूर्यं निर्विशेषं यथेक्षते।
ज्ञानमार्गेण कृष्णस्य विशेषं नेक्षते तथा ॥

"तथाहि ब्रह्मसंहितायाम् (५।४६)—

यस्य प्रभा प्रभवतो जगदण्डकोटि-
कोटिष्वशेषवसुधादिविभूतिभिन्नम्।
तद्ब्रह्म निष्कलमनन्तमशेषभूतं
गोविन्दमादिपुरुषं तमहं भजामि" ॥५॥

विभूतिर्ब्रह्मणो यस्य ब्रह्माण्डकोटिकोटयः।
तद्ब्रह्मापि हि कृष्णस्य श्रीविग्रहमहाद्युतिः ॥

कृष्णं तमेव गोविन्दं मम नाथं भजाम्यहम् ।
यस्य प्रसादमाहात्म्यात् सृष्टिशक्तिर्ममेदृशी ॥

"तथाहि (भाः ११।६।३२)—
मुनयो वातवसनाः श्रमणा ऊर्द्ध्वमन्थिनः ।
ब्रह्माख्यं धाम ते यान्ति शान्ताः सन्न्यासिनोऽमलाः" ॥६॥
अन्तर्यामी परात्मेति योगशास्त्रेषु यः स्मृतः ।
सोऽयमंशविभूतिस्तु गोविन्दस्य महाप्रभोः ॥
एको भाति यथा सूर्योऽनन्तेषु स्फटिकेष्वपि ।
तथानन्तेषु जीवेषु गोविन्दांशः प्रकाशते ॥

"तथाहि श्रीमद्भगवद्गीतायाम् (१०।४२)—
अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥७॥

"तथाहि भागवते (१०।१४।१५)—
तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानाम् ।
प्रतिदृशमिव नैकधार्कमेकं समधिगतोऽस्मि विधूतभेदमोहः" ॥८॥
साक्षात् स एव गोविन्दः प्रभुश्चैतन्यसंज्ञकः ।
जीवनिस्तारणे तादृग् दयालुर्नास्ति कश्चन ॥
यो हि नारायणो नाम परव्योमनि राजते ।
लक्ष्मीकान्तः षडैश्वर्यपूर्णोऽसौ भगवान् स्वयम् ॥
सर्वोपनिषदो वेदाः श्रीभागवतसंहिता ।
आगमाश्चासमोर्द्ध्वं तं पूर्णतत्त्वं प्रचक्षते ॥
भक्तियोगेन तद्भक्ता लभन्ते यस्य दर्शनम् ।
दिवि देवा यथा सूर्यमीक्षन्ते विग्रहान्वितम् ॥
मार्गाभ्यां ज्ञानयोगाभ्यां ये जनास्तमुपासते ।
तं ब्रह्मात्मस्वरूपेण तेऽवगच्छन्ति निश्चितम् ॥

Bhaja Nitai Gaur Radhe Syam, Japa Hare Krishna Hare Ram.

उपासाया विभेदेन महत्त्वं ज्ञायते विभोः।
अतो दिनकरेणेह तुलना तस्य कीर्त्यते ॥
स हि नारायणः कृष्णो नैव भिन्नः स्वरूपतः।
आकाराणां विभिन्नत्वेऽप्येक एव हि विग्रहः ॥
अयन्तु द्विभुजः कृष्णो नारायणश्चतुर्भुजः।
अयं वंशीधरः कृष्णः स तु चक्रधरः स्मृतः ॥

"तथाहि भागवते (१०।१४।१४)—

नारायणस्त्वं न हि सर्वदेहिनामात्मास्यधीशाखिललोकसाक्षी।
नारायणोऽङ्गं नरभूजलायनात्तच्चापि सत्यं न तवैव माया" ॥६॥

ब्रह्मापराधमकरोन्मुष्णन गोपालवत्सकान।
तं क्षमापयितुं चक्रे स्तुतिं कृष्णप्रसादनीम् ॥
तव नाभिसरोजाद्धि मम जन्मोदयो यतः।
त्वं मे माता पिता चासि तवाहं तनयस्ततः ॥
माता पिता च पुत्रस्य नापराधेन रुष्यतः।
क्षमस्वातोऽपराधं मे प्रसीद मयि हे प्रभो ॥
कृष्णः प्रत्याह, हे ब्रह्मन् पिता नारायणस्तव।
गोपजातिरहं कस्मात्त्वं भवेर्मम नन्दनः ॥
ब्रह्मा प्रत्याह, किं नासि त्वं नारायण सर्वथा।
नारायणोऽसि यस्मात्त्वं शृणु तत्कारणं प्रभो ॥
प्राकृताप्राकृते सर्गे यावन्तो जीवरूपिणः।
तेषां मूलस्वरूपस्त्वं तेषामात्मा यतो भवान ॥
पृथ्वी घटसमूहानां यथैव कारणाश्रयौ।
त्वं तथा सर्वजीवानां निदानञ्च समाश्रयः ॥
सर्वजीवसमूहोऽर्थो नारशब्दस्य कथ्यते।
आश्रयोऽयनशब्देन तात्पर्य्यादवगम्यते ॥

अतस्त्वं सर्वजीवानां निश्चितं मूलकारणम् ।
यथा नारायणोऽसीति द्वितीयं कारणं शृणु ॥
पुरुषाद्यवतारा हि जीवानामीश्वराः स्मृताः ।
निःसीमतरमैश्वर्यं तेभ्यः सर्वेभ्य एव ते ॥
सर्वेषां जनकोऽसि त्वं त्वं सर्वेषामधीश्वरः ।
तवैव खलु शक्त्या ते रक्षन्ति निखिलं जगत् ॥
नाराणामयनं यस्मात् स त्वं तद् विश्वपालकः ।
भगवन्नत एव त्वं मूलनारायणो मतः ॥
यतो नारायणोऽसीति तृतीयं शृणु कारणम् ।
बहुवैकुण्ठधामानि ब्रह्माण्डानि च भूरिशः ॥
जीवाश्च तत्र यावन्तस्तत्त्रैकालिककर्म च ।
सर्वं पश्यसि साक्षी त्वं तेषां मर्माणि वेत्सि च ॥
तवैव दर्शनात् सर्वजगतां संस्थितिर्भवेत् ।
तवेक्षणाद्विना कोऽपि न गच्छति न तिष्ठति ॥
नाराणामयनं येन स त्वं सर्वस्य दर्शकः ।
इत्यर्थेनापि हे साक्षिन् मूलनारायणो भवान् ॥
कृष्णः प्रत्यवदद् ब्रह्मन्नावगच्छामि ते वचः ।
जले च जीवहृद्देशे वासो नारायणस्य हि ॥
ब्रह्माह यो जले जीवे नारायणोऽवतिष्ठते ।
स सर्वथा तवैवांशः सत्यमेतद् ब्रवीमि ते ॥
मायया कारणाम्भोधिशायिक्षीरोदशायिनौ ।
गर्भोदकाधिशायी च सृजन्त्येते हि मायिनः ॥
सर्वान्तर्य्यामिणो ह्येते त्रयः स्युर्जलशायिनः ।
आत्मा ब्रह्माण्डवृन्दस्य सोऽयं पुरुषसंज्ञकः ॥
आत्मा हिरण्यगर्भस्य यः स गर्भोदशायकः ।
आत्मा यो व्यष्टिजीवानां स क्षीरोदकतल्पगः ॥

एतेषां दर्शने देव मायागन्धो हि वर्त्तते ।
तुरीयस्य तु कृष्णस्य मायालेशो न विद्यते ॥

"तथाहि श्रीभागवते (११।१५।१६) स्वामिटीकायाम्—

विराड् हिरण्यगर्भश्च कारणञ्चेत्युपाधयः ।
ईशस्य यत् त्रिभिर्हीनं तुरीयं तत् प्रचक्षते" ॥१०॥

यद्यपि त्रय एवैते मायया व्यवहारिणः ।
माया नार्हति तान् स्प्रष्टुं मायातीता यतो हि ते ॥

"तथाहि श्रीभागवते (१।११।३३)—

एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः ।
न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रया ॥" ११॥

पुरुषाणां त्रयाणां तु तेषां परम आश्रयः ।
मूलनारायणोऽसीति विद्यते कोऽत्र संशयः ॥
नारायणः परव्योम्नि सोंऽशी तेषां त्रयस्य च ।
तव सोऽपि विलासस्तन्मूलनारायणो भवान् ॥
परव्योमस्थितो योऽयं सोऽपि नारायणः स्वयम् ।
विलास एव कृष्णस्येत्युक्तथा तत्त्वं स्फुटं विधेः ॥
भागवतस्य सारेऽस्मिन् श्लोके तत्त्वस्य लक्षणम् ।
सर्वत्रैवाधिकारोऽस्य परिभाषा-स्वरूपतः ॥
ब्रह्मात्मा भगवांश्चेति कृष्णस्यैव विभूतयः ।
इत्थमर्थमजानन्तो मूर्खा व्याचक्षतेऽन्यथा ॥
नारायणोऽवतारी स्यात् कृष्णोऽवतार उच्यते ।
नारायणश्चतुर्बाहुः कृष्णस्तु मानवाकृतिः ॥
इति नानाविधान मूर्खाः पूर्वपक्षान् प्रकुर्वते ।
एष भागवतश्लोकस्तान पराजेतुमर्हति ।

Bhaja Nitai Gour Radhe Syam, Japa Hare Krishna Hare Ram.

"तथाहि (भाः १।२।११)—

"वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" ॥१२॥

श्लोकस्यार्थं शृणु भ्रातः कृतं सूक्ष्मविचारतः ।
मुख्यं तत्त्वमिहैकन्तु प्रकारास्तस्य च त्रयः ॥
तत्त्वमत्राद्वयज्ञानं तद्धि कृष्णस्वरूपकम् ।
ब्रह्मात्मा भगवांश्चेति रूपाणि त्रीणि तस्य च ॥
ध्रुवं निरुत्तरोऽसि त्वं श्लोकस्य व्याख्ययानया ।
श्लोकं भागवतस्यैकमपरं शृणु साम्प्रतम् ॥

"तथाहि (भाः १।३।२८)—

एते चांशकलाः पुंसः कृष्णस्तु भगवान स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृड़यन्ति युगे युगे" ॥१३॥

इह सर्वावताराणां कृत्वा सामान्यलक्षणम् ।
तेषु श्रीकृष्णचन्द्रस्य सूतेन गणना कृता ॥
ततः सूतो महाभागो हृदि लब्धभयः पुनः ।
यस्य यल्लक्षणं युक्तं युक्त्या तन्निरधारयत् ॥
सकला अवतारास्ते पुरुषस्य कलांशकाः ।
तेषामपि शिरोरत्नं श्रीकृष्णो भगवान् स्वयम् ॥
यदि वादी हसन ब्रूते व्याख्यानं साधु साधु ते ।
परव्योमस्थितो नारायणस्तु भगवान स्वयम् ॥
कृष्णरूपं गृहीत्वैव सोऽवताराय कल्पते ।
श्लोकस्यास्य स्फुटार्थोऽयं किं विचारेण ते वृथा ॥
स तदा प्रतिवक्तव्यः कुतर्केणानुमीयते ।
कथं शास्त्रविरूद्धोऽर्थः प्रामाण्यं जातु नैति यः ॥

"तथाहि—एकादशीतत्त्वे धृतो न्यायः—
अनुवाद्यमनुक्त्वा तु न विधेयमुदीरयेत् ।
नह्यलब्धास्पदं किञ्चित कुत्रचित प्रतितिष्ठति" ॥१४॥
अनुवाद्यपदं नोक्त्वा न विधेयपदं वदेत ।
कथयित्वानुवाद्यं प्राग् वाच्यं पश्चाद्विधेयकम ॥
अविज्ञातन्तु यद्वस्तु तद्विधेयमुदीर्यते ।
यद्धि पूर्वमभिज्ञातमनुवाद्यं तदुच्यते ॥
विप्रोऽयं पण्डितः श्रेष्ठ इति दृष्टान्त उच्यते ।
विप्र एवानुवाद्योऽत्र पण्डितत्वे विधेयता ॥
विप्रत्वं ज्ञातमज्ञातं पाण्डित्यन्त्वस्य पूर्वतः ।
अतः प्राग् विप्र इत्याह पण्डितश्चेति तत्परम ॥
तथैवात्रावतारास्ते सर्वे ज्ञाता हि पूर्वतः ।
एते कस्यावताराः स्युरविज्ञातन्तु वस्तु तत ॥
एत इत्यवताराणामनुवाद्यत्वमग्रतः ।
पुंसोऽंशा इति पश्चात्तु तद्विधेयव्यवस्थितिः ॥
तथा कृष्णोऽवताराणां ज्ञातत्वेनैव संस्तुतः ।
तस्य विशेषविज्ञानं सञ्जातं नहि पूर्वतः ॥
कृष्ण इति पदं प्राक् तदनुवाद्यपरं स्मृतम् ।
भगवान् स्वयमित्येतद् विधेयार्थं ततः परम ॥
तत् स्वयंभगवत्त्वं हि साध्यं कृष्णे तदाश्रये ।
कृष्णत्वं बाध्यते किन्तु स्वयं भगवदाश्रये ॥
कृष्णोऽभविष्यदंशश्चेदंशी नारायणस्तथा ।
श्रीसूतस्य तदा वाक्यमगमिष्यद् विपर्ययम ॥
अंशी नारायणो योऽसौ कथितो भगवान स्वयम ।
स एव कृष्ण इत्येवं व्याख्यां सूतोऽकरिष्यत ॥

विप्रलिप्सा प्रमादश्च भ्रमोऽक्षापाटवं तथा ।
आर्षज्ञानवतां वाक्ये दोषा एते न सन्ति हि ॥
त्वमेवात्थ विरुद्धार्थं मद्वाक्येन प्रकुप्यसि ।
अविमृष्टविधेयांशदोषस्तन्मतमाश्रितः ॥
अन्येषां भगवत्ता स्याद् यस्यैव भगवत्तया ।
भगवान् स्वयमित्येतत् पदं तस्यैव वाचकम् ॥
ज्वालाप्राप्तिर्यतो दीपाद्दीपानां बहुशो यथा ।
मूलप्रदीप एकोऽसावित्येवं परिगण्यते ॥
तथा सर्वावताराणां श्रीकृष्णो ह्येव कारणम् ।
श्रूयतामपरः श्लोकः कुव्याख्या येन खण्ड्यते ॥

"तथाहि (भाः २।१०।१-२)—

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराशयः ॥
दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् ।
वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा" ॥१५॥
पदार्था नव कथ्यन्त आश्रयस्याववुद्धये ।
नवानां जन्महेतुर्यः स एवाश्रय उच्यते ॥

"तथा भावार्थदीपिकायाम् (भाः १०।१।१)—

दशमे दशमं लक्ष्यमाश्रिताश्रयविग्रहम् ।
श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत्" ॥१६॥
कृष्णस्वरूप-तच्छक्तित्रयं जानाति यो जनः ।
श्रीकृष्णविषयाज्ञानं न जातु तस्य सम्भवेत् ॥
श्रीकृष्णस्य स्वरूपस्य विलासः षड्विधो भवेत् ।
प्राभवं वैभवश्चेति प्रकाशस्तस्य च द्विधा ॥
शक्त्यावेशांशरूपाभ्यामवतारो द्विधा तथा ।
धर्मोऽपि द्विविधः प्रोक्तो बाल्यपौगण्डरूपतः ॥

किशोरकस्वरूपोऽवतारी कृष्णः स्वयं तथा ।
षड्भिरेतैर्जगद्व्याप्य रूपैः क्रीड़त्यसौ सदा ॥
एतस्य रूपषट्कस्य विभेदाः स्युरनन्तकाः ।
रूपानन्त्येऽप्यसावेकरूपः किञ्चिन्न भिद्यते ॥
चिच्छक्तिरन्तरङ्गाख्या स्वरूपशक्तिरस्य तु ।
तद्वैभवमनन्तानि वैकुण्ठादीनि भूरिशः ॥
वहिरङ्गाभिधा मायाशक्तिर्विश्वस्य कारणम् ।
तद्वैभवमनन्तानां ब्रह्माण्डानां समुच्चयः ॥
जीवशक्तिस्तटस्थाख्या यस्या अन्तो न विद्यते ।
एतास्तु शक्तयो मुख्यास्तिस्रोऽनन्ताश्च तद्भिदाः ॥
स्वरूपाणां गणश्चैष तिस्र एताश्च शक्तयः ।
सर्वेषामाश्रयः कृष्णः सर्वेषां तत्र संस्थितिः ॥
पुरुषा यद्यपि ख्यातास्तद् ब्रह्माण्डगणाश्रयाः ।
पुरुषाणान्तु सर्वेषां स कृष्णो मूलमाश्रयः ॥
स स्वयं भगवान् कृष्णः स कृष्णो निखिलाश्रयः ।
ईश्वरः परमः कृष्ण इति शास्त्रेषु गीयते ॥

"तथाहि ब्रह्मसंहितायाम् (५।२)—

ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः ।
अनादिरादिर्गोविन्दः सर्वकारणकारणम्" ॥१७॥
एतान् सर्वांश्च सिद्धान्तान सुष्ठु त्वमवगच्छसि ।
श्रयसे पूर्वपक्षं मे चालनार्थं हि केवलम् ॥
अवतारी स्वयं कृष्णो योऽसौ व्रजेन्द्रनन्दनः ।
कृतवानवतारं स स्वयं चैतन्यरूपतः ॥
पारः परमतत्त्वस्य श्रीचैतन्यप्रभुर्यतः ।
उक्ते क्षीरोदशायीति वाच्ये तन्महिमा कियान् ? ॥

तथापि भक्तवाक्यं तन्न क्वचिद् व्यभिचारभाक् ।
अवतारी य एव स्यात् सर्वं तत्रैव सम्भवेत् ॥
सर्वेऽवतारास्तिष्ठन्ति श्रीवपुष्यवतारिणः ।
यथाविधा मतिर्येषां ते तमाहुस्तथाविधम् ॥
कश्चित् कृष्णं समाचष्टे नरनारायणाभिधम् ।
कृष्णोऽयं वामनः साक्षादिति कश्चिद् ब्रतीत्यपि ॥
केश्चित् क्षीरोदशायीति सोऽवतारो निगद्यते ।
सर्वेषां वचनं सत्यं नात्र कश्चिदसम्भवः ॥
परव्योमस्थितं नारायणं केचिद्वदन्ति तम् ।
सर्वं सम्भाव्यते कृष्णे सोऽवतारी स्वयं यतः ॥
सर्वान् श्रोतॄन् नमस्कृत्य सिद्धान्तान् वच्मि सर्वथा ।
एकाग्रचेतसा सर्वे शृण्वन्तु कृपया मयि ॥
सिद्धान्त इति मत्वा तैर्नालस्यं क्रियतां हृदि ।
सम्भविष्यत्यनेनैव श्रीकृष्णे सुदृढ़ा मतिः ॥
ज्ञेयं चैतन्यमाहात्म्यमेतत् सिद्धान्तकर्णनात् ।
जायते महिमज्ञानान्निश्चन्त्रा दृढ़चित्तता ॥
कृष्णचैतन्यमाहात्म्यप्रकाशार्थमिमं पुनः ।
महिमानं हि कृष्णस्य विस्तरेण वदाम्यहम् ॥
कृष्णचैतन्यदेवस्य तत्त्वमेतन्निरूपितम् ।
स एव भगवान् कृष्णः स्वयं व्रजेन्द्रनन्दनः ॥
आशास्ते यः पदाम्भोजे श्रीरूपरघुनाथयोः ।
स कृष्णदास आह श्रीचैतन्यचरितामृतम् ॥
इति श्रीचैतन्यचरितामृत आदिलीलायां वस्तुनिर्देशमङ्गलाचरणे
श्रीकृष्णचैतन्यतत्त्वनिरूपणं नाम
द्वितीयपरिच्छेदः ॥२॥

तृतीयः परिच्छेदः

"श्रीचैतन्यप्रभुं वन्दे यत्पादाश्रयवीर्यतः।
संगृह्णात्याकरव्रातादज्ञः सिद्धान्तसन्मणीन्" ॥१॥
जयति जयति शश्वत् कृष्णचैतन्यदेवो
जयति जयति नित्यानन्ददेवः सदैव।
जयति जयति नित्यं श्रीमदद्वैतचन्द्रो
जगति च विजयन्तां श्रील-गौराङ्गभक्ताः॥
श्लोकस्य च तृतीयस्य कृतार्थविवृतिर्मया।
चतुर्थस्य वदाम्यर्थं भक्ताः श्रृण्वन्तु साम्प्रतम्॥
"अनर्पितचरीं चिरात् करुणयावतीर्णः कलौ
समर्पयितुमुन्नतोज्ज्वलरसां स्वभक्तिश्रियम्।
हरिः पुरटसुन्दर-द्युति-कदम्ब-सन्दीपितः
सदा हृदयकन्दरे स्फुरतु वः शचीनन्दनः" ॥२॥
स पूर्णो भगवान कृष्णो व्रजेन्द्रनन्दनो विभुः।
सार्द्धं व्रजेन गोलोके नित्यं विहरति स्वयम्॥
ब्राह्मैकदिनमानेन सकृत सोऽवतरन्निह।
प्रकटेन विहारेण स्वलीलां विदधात्यसौ॥
ज्ञेयं चतुर्युगं सत्यं त्रेता च द्वापरः कलिः।
एकं दिव्ययुगं नाम सत्याद्यैश्च चतुर्युगैः॥
दिव्यानामेकसप्तत्या तथा मन्वन्तरं भवेत्।
दश चत्वारि चैकत्र तानि स्युर्ब्रह्मणो दिने॥
अथ वैवस्वते मन्वन्तरे नामात्र सप्तमे
अनन्तरञ्च दिव्येभ्यो युगेभ्यः सप्तविंशतेः॥
अष्टाविंशे समायाते द्वापरस्य च पश्चिमे।
श्रीकृष्णस्य प्रकाशोऽभूद्व्रजेन सह भूतले॥

दास्यं सख्यञ्च वात्सल्यं शृङ्गारं चतुरो रसान।
भजन्त्याश्रित्य ये भक्ताः कृष्णो भवति तद्वशः ॥
दासान सखींस्तथा माता पितरौ च प्रियाजनान।
आदाय प्रेमसम्बद्धः कृष्णोऽक्रीड़त स्वयं व्रजे ॥
विजहार यथाकामं तदन्वन्तर्दधे च सः।
अन्तर्धानं गतः कृष्णो मनसैवमतर्कयत् ॥
अहो चिरं व्यतीतं मे प्रेमभक्तिमयच्छतः।
विना भक्तिं जगत्येषा नैवावस्थातुमर्हति ॥
वैधीं कुर्वन्ति मे भक्तिं निखिला विश्ववासिनः।
वैधभक्त्याभजन कोऽपि न व्रजे वासमर्हति ॥
ऐश्वर्यज्ञानसम्मिश्रं सकलं जगतीतलम्।
ऐश्वर्येण श्लथे प्रेम्णि मम प्रीतिर्न वर्त्तते ॥
ऐश्वर्यज्ञानमाश्रित्य विधिमार्गेण मां भजन।
लब्ध्वा चतुर्विधां मुक्तिं वैकुण्ठं याति मानवः ॥
सार्ष्टि-सारूप्य-सामीप्य-सालोक्यानीति नामतः।
भक्तो नेच्छति सायुज्यं यत्र स्याद्ब्रह्मणैकता ॥
नामसंकीर्त्तनं नाम युगधर्मं प्रवर्त्तयन्।
नर्त्तयिष्यामि भावैस्तैश्चतुर्भिः सकलं जगत ॥*
स्वयमङ्गीकरिष्यामि स्वस्यैव भक्तरूपताम्।
सर्वेभ्यः शिक्षयिष्यामि स्वभक्तिं स्वयमाचरन् ॥
स्वयं नाचरता धर्मं शिक्षयेरन्नैव चापरे।
गीता-भागवतग्रन्थावित्थं सिद्धान्तमाहतुः ॥

"तथाहि श्रीमद्भगवद्गीतायां चतुर्थाध्यायेऽष्टमश्लोके—

---

* दास्य-सख्य-वात्सल्य-प्रेमरूपैश्चतुर्भिर्भावैः।

अर्जुनं प्रति श्रीकृष्णवाक्यम् :—

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।

धर्मसंस्थापनार्थाय सम्भवामि युगे युगे" ॥३॥

तथाहि तत्रैव तृतीयाध्याये चतुर्विंशश्लोकेऽर्जुनं प्रति

श्रीकृष्णवाक्यम्—

"उद्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।

सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः" ॥४॥

तथाहि तत्रैवैकविंशश्लोकेऽर्जुनं प्रति श्रीकृष्णवाक्यम्—

"यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।

स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते" ॥५॥

शक्यमंशावतारेण युगधर्मप्रवर्त्तनम् ।

किन्तु दातुं व्रजप्रेम नान्यः शक्नोति मां विना ॥

"तथाहि श्रीलघुभागवतामृते पूर्वखण्डे परावस्थायां श्रीकृष्णविषये द्वितीयाङ्कधृतो विल्वमङ्गलकृतः श्लोक :—

सन्त्ववतारा बहवः पङ्कजनाभस्य सर्वतोभद्राः ।

कृष्णादन्यः को वा लतास्वपि प्रेमदो भवति" ॥६॥

निजभक्तजनांस्तस्माद् गृहीत्वा मिलितश्च तैः ।

नाना नाट्यं विधास्यामि वतीर्य धरणावहम् ॥

इत्थं विचिन्तयन् कृष्णः श्रीनवद्वीपधामनि ।

कलेः प्रथमसन्ध्यायामवतीर्णः स्वयं प्रभुः ॥

नवद्वीपे हि चैतन्यसिंहोऽवातरदीश्वरः ।

सिंहग्रीवः सिंहवीर्यः सिंहहुङ्कारवान् हरिः ॥

स एव वसतात् सिंहो जीवानां हृदि कन्दरे ।

यस्य हुङ्कारमात्रेण हन्यन्ते कल्मषद्विपाः ॥

एष प्रथमलीलायां नाम्ना विश्वम्भरोऽभवत् ।

विभ्रद् भक्तिरसैर्विश्वमपुष्णादपि सर्वथा ॥

धारणे पोषणे चार्थे डुभृञ् धातुः प्रयुज्यते ।
सोऽधरत प्रेमदानेनापुष्यच्च भुवनत्रयम् ॥
सोऽभूदन्तिमलीलायां कृष्णचैतन्यसंज्ञकः ।
श्रीकृष्णं चेतयन सर्वं विश्वं धन्यं चकार च ॥
युगावतारमस्यैव ज्ञात्वा गर्गो महामुनिः ।
नामकरणसंस्कारे कृष्णस्यावोचत स्फुटम् ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धेऽष्टमाध्याये नवमश्लोके नन्दं प्रति गार्गवाक्यम्—

आसन् वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनूः ।
शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः" ॥७॥
शुक्लां रक्ताञ्च पीताञ्च तिस्रो देहद्युतीर्हरिः ।
सत्यत्रेताकलिष्वेव युगेष्वेषोऽवलम्बते ॥
इदानीं द्वापरे कृष्णकान्तिमेषोऽग्रहीदिति ।
शास्त्रागमपुराणानामेषैव मर्मभारती ॥

"तथाहि श्रीमद्भागवत एकादशस्कन्धे पञ्चमाध्याये पञ्चविंशश्लोके जनकं प्रति योगेन्द्रवाक्यम्—

द्वापरे भगवान् श्यामः पीतवासा निजायुधः ।
श्रीवत्सादिभिरङ्कैश्च लक्षणैरुपलक्षितः" ॥८॥
नाम्नः प्रचार एवायं युगधर्मः कलौ युगे ।
पीतवर्णोऽवतारोऽभूच्छ्रीचैतन्यप्रभुस्ततः ॥
तप्तकाञ्चनवर्णोऽसौ दधानो विपुलं वपुः ।
स्वकण्ठध्वनिना नूत्न-मेघ-निर्घोषजित्वरः ॥
दैर्घ्येण च प्रसारेण हस्तो यत्-परिमाणकः ।
चतुर्हस्तमितो देहो महापुरुषलक्षणम् ॥
स देहः कथ्यते नाम न्यग्रोधपरिमण्डलः ।
तावान देहोऽभवत्तस्य चैतन्यस्य गुणात्मनः ॥

आजानुलम्बितबाहुः स पुण्डरीक-विलोचनः ।
तिलप्रसूनजिन्नासो द्विजराजसमाननः ॥
शान्तो दान्तस्तथा कृष्णभक्तिनिष्ठापरायणः ।
समः सर्वेषु भूतेषु सुशीलो भक्तवत्सलः ॥
दधद्वलयकेयूरान श्वेतचन्दननिर्मितान ।
कृष्णसङ्कीर्त्तनं चक्रे नृत्यं श्चन्दनभूषितः ॥
गृहीत्वैतान् गुणान सर्वान श्रीवैशम्पायनो मुनिः ।
गणयामास तन्नाम नाम-साहस्रमन्तरा ॥
चैतन्यस्य हि लीले द्वे आदिरन्तश्च नामतः ।
विशेषात सन्ति नामानि चतुःशो लीलयोर्द्वयोः ॥

"तथाहि श्रीमहाभारते दानधर्मे एकोनपञ्चाशदधिकशततमाध्याये सहस्रनाम्नि सहस्रनामस्तोत्रम्—

सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
सन्न्यासकृच्छमः शान्तो निष्ठाशान्तिपरायणः" ॥९॥
श्रीमद्भागवते भूयः प्रोक्तमस्ति परिस्फुटम् ।
नामसङ्कीर्त्तनं धर्मः सार एव कलौ युगे ॥

"तथाहि श्रीमद्भागवत एकादशस्कन्धे पञ्चमाध्याय एकोनत्रिंशश्लोके जनकं प्रति करभाजनवाक्यम्—

* कृष्णवर्णं त्विषाकृष्णं साङ्गोपाङ्गास्त्रवैभवम् ।
यज्ञैः सङ्कीर्त्तन-प्रायैर्यजन्ति हि सुमेधसः" ॥१०॥
एतच्चैतन्यमाहात्म्यं भ्रातरः शृणुताखिलम् ।
श्लोकेनानेन माहत्म्यसीमा तस्य निगद्यते ॥
कृष्ण-इत्येव वर्णौ द्वौ यस्य स्तः सर्वदा मुखे ।
अथवा स्वमुखेनैव कृष्णं यो वर्णयत्यपि ॥
कृष्णवर्णेति शब्दस्य द्विधैषोऽर्थः प्रमाणतः ।
कृष्णं विना मुखात्तस्य शब्दो नोदीर्यतेऽपरः ॥

यदि केनचिदुच्येत स कृष्णद्युतिभागिति ।
स निवारयितुं शक्यः प्रदर्श्यान्यद्विशेषणम् ॥
अकृष्णया तनोर्द्युत्या न-कृष्णवर्ण उच्यते ।
अकृष्णेन तु वर्णेन पीतवर्णोऽत्र सूच्यते ॥

"तथाहि श्रीमद्रूपगोस्वामिचरणकृत-स्तवमालायां श्रीचैतन्यदेवस्य द्वितीयस्तवे प्रथमः श्लोकः—

कलौ यं विद्वांसः स्फुटमभियजन्ते द्युतिभरा-
दकृष्णाङ्गं कृष्णं मखविधिभिरुत्कीर्त्तनमयैः ।
उपास्यञ्च प्राहुर्यमखिलचतुर्थाश्रमजुषां
स देवश्चैतन्याकृतिरतितरां नः कृपयतु" ॥११॥

तप्तस्वर्णसमा कान्तिस्तस्य प्रत्यक्षतः स्फुटा ।
नाशिता तन्मयूखाग्रैरज्ञानतमसां ततिः ॥
उज्ज्वासयितुकामस्तज्जीवानां कल्मषं तमः ।
अङ्गोपाङ्गाभिधानानि नानास्त्राणि दधार सः ॥
धर्माधर्मावििति प्रोक्तं कर्म यद् भक्तिबाधकम् ।
तदेव कल्मषं नाम जीवानां तन्महत्तमः ॥
हरे कृष्णेति गायन स प्रेमदृष्ट्या निरैक्षत ।
कल्मषं तत् समुच्छिद्य प्रेम्नाप्लावयताखिलान् ॥

"तथाहि स्तवमालायां श्रीचैतन्यदेवस्य द्वितीयस्तवेऽष्टमः श्लोकः—

स्मितालोकः शोकं हरति जगतां यस्य परितो
गिरान्तु प्रारम्भः कुशलपटलीं पल्लवयति ।
पदालम्भः कं वा प्रणयति नहि प्रेमनिवहं
स देवश्चैतन्याकृतिरतितरां नः कृपयतु" ॥१२॥

श्रीमुखं श्रीमदङ्गञ्च यः कश्चित् परिदृष्टवान् ।
तस्य पापं क्षयं यातं प्राप्तः स प्रेमसम्पदम् ॥

अन्येषामवतारणां सशस्त्राः सन्ति सैनिकाः ।

कृष्णचैतन्यदेवस्य स्वाङ्गोपाङ्गानि सैनिकाः ॥

"तथाह्यङ्गोपाङ्गानामत्रावतारः श्रीरूपगोस्वामिभिरपि स्तवमालायां श्रीचैतन्यदेवस्य स्तवे निरूपितोऽस्ति—

सदोपास्यः श्रीमान्धृत-मनुजकायैः प्रणयितां
वहद्भिर्गीर्वाणैर्गिरिश-परमेष्ठिप्रभृतिभिः ।
स्वभक्तेभ्यः श्रद्धां निजभजनमुद्रामुपदिशन
स चैतन्यः किं मे पुनरपि दृशोर्यास्यति पदम्" ॥१३॥

अङ्गोपाङ्गानि चास्त्राणि स्वकार्यं साधयन्ति हि ।
श्रूयतामङ्गशब्दस्यापरोऽर्थः सुसमाहितैः ॥
अंश इत्यङ्गशब्दार्थं वक्ति शास्त्रप्रमाणकम् ।
अर्थश्चोपाङ्गशब्दस्य स्यादङ्गावयवस्तथा ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुर्दशाध्याये श्रीभगवन्तं प्रति ब्रह्मवाक्यम्—

नारायणस्त्वं नहि सर्वदेहिना—
मात्मास्यधीशाखिललोकसाक्षी ।
नारायणोऽङ्गं नर-भू-जलायना-
त्तच्चापि सत्यं न तवैव माया" ॥१४॥

अन्तर्यामी पयःशायी योऽयं नारायणो मतः ।
स तवैवांशरूपः स्यान्मूलनारायणो भवान् ॥
अंशोऽप्यर्थोऽङ्गशब्दस्य तथा सत्यञ्च सम्भवेन ।
चिदानन्दमयं सर्वं मायाकार्यं न विद्यते ॥
नित्यानन्दस्तथाद्वैतश्चैतन्याङ्गद्वयं हि तौ ।
अङ्गस्यावयवाः सर्वे स्युरुपाङ्गानि निश्चितम् ॥
अङ्गोपाङ्गानि चास्त्राणि तीक्ष्णानि स्युर्महाप्रभोः ।
पाषण्डदलनायैव तेषामत्रोपयोगिता ॥

श्रीनित्यानन्ददेवो हि स्वयं हलधरः प्रभुः ।
अद्वैतप्रभुराचार्यो भवेच्च स्वयमीश्वरः ॥
सैनिकान् सममादाय श्रीवासादिकपार्षदान् ।
उभौ सेनापती एतौ कीर्तनं परितोऽटितौ ॥
पाषण्डदलने शूरो नित्यानन्दप्रभुः स्वयम् ।
पाषण्डिनां पलायन्त पापान्याचार्यहुङ्कृतैः ॥
कृष्णचैतन्यदेवस्तु सङ्कीर्तनप्रवर्तकः ।
यः सङ्कीर्तनयज्ञैस्तं भजते धन्य एव सः ॥
स एव सुमतिः सर्वः संसारोऽन्यो हि दुर्मतिः ।
सारो निखिलयज्ञानां नामयज्ञो हरेरयम् ॥
यो वदत्यश्वमेधानां कोटेरेकेन तुल्यता ।
कृष्णनाम्नेति पाषण्डी स भुङ्क्ते यमयातनाम् ॥
ग्रन्थे भगवत्-सन्दर्भे मङ्गलाचरणात्मकम् ।
श्लोकं श्रीजीवगोस्वामी व्याख्याय व्यतनोदिमम् ॥

"तथाहि श्रीभगवत्-सन्दर्भे द्वितीयश्लोके श्रीजीवगोस्वामिवाक्यम्—
अन्तःकृष्णं वहिर्गौरं दर्शिताङ्गादिवैभवम् ।
कलौ सङ्कीर्तनाद्यैः स्मः कृष्णचैतन्यमाश्रिताः ॥१५॥"

क्वचिच्चोपपुराणेऽपि श्रूयते कृष्णभाषितम् ।
भगवान् व्यासदेवाय कृपयाकथयद् यथा ॥

"तथाहि क्वचिदुपपुराणे—
अहमेव क्वचिद् ब्रह्मन् सन्न्यासाश्रममाश्रितः ।
हरिभक्तिं ग्राहयामि कलौ पापहतान्नरान् ॥१६॥"

भारतागमशास्त्रेषु तथा भागवते स्फुटम् ।
अस्ति चैतन्यकृष्णस्यावतारत्वे प्रमाणकम् ॥
तस्य प्रत्यक्षमैक्षन्त प्रभावान् प्रकटान् जनाः ।
अलौकिकानि कर्माणि तथानुभावसंहतिम् ॥

पश्यन्तोऽपि न पश्यन्ति प्रत्यक्षं भक्तिवर्जिताः ।
उलूका नैव पश्यन्ति सूर्यस्य किरणं यथा ॥

"तथाहि श्रीसम्प्रदायमतकृद्-यामुनाचार्यकृतालकमन्दारस्तोत्रे
पञ्चदशः श्लोकः—

त्वां शीलरूपचरितैः परमप्रकृष्टैः
सत्त्वेन सात्त्विकतया प्रबलैश्च शास्त्रैः ।
प्रख्यातदैवपरमार्थविदां मतैश्च
नैवासुरप्रकृतयः प्रभवन्ति बोद्धुम् ॥"

प्रभुर्गूहितुमात्मानं बहुधा चेष्टते स्वयम् ।
भक्तास्तथापि तं बोद्धुं पारयन्ति विचक्षणाः ॥

"तथाहि श्रीसम्प्रदायमतकृद्-यामुनाचार्यकृतालकमन्दारस्तोत्रे
ऽष्टादशः श्लोकः—

उल्लङ्घितत्रिविधसीम-समातिशायि-
सम्भावनं तव परिव्रढिमस्वभावम् ।
मायाबलेन भवतापि निगुह्यमानं
पश्यन्ति केचिदनिशं त्वदनन्यभावाः ॥१८॥"

आसुरी प्रकृतिर्येषां जातु कृष्णं न ते विदुः ।
आत्मानं स स्वभक्तेभ्यो न शक्नोति निगूहितुम् ॥

"तथाहि श्रीहरिभक्तिविलासस्य पञ्चदशविलासे एकाशीत्यधिक-
शताङ्कधृतं विष्णुधर्मोत्तरवचनम्—

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
विष्णुभक्तिपरो दैव आसुरस्तद्विपर्ययः ॥१९॥"

प्रभोराचार्यगोस्वामी भक्तावतार उच्यते ।
श्रीकृष्णस्यावताराय विख्याता यस्य हुङ्कृतिः ॥
कृष्णो यदावताराय समायाति महीतलम् ।
आविर्भावयति स्वस्य गुरुवर्गांस्ततोऽग्रतः ॥

मातापित्रादयो मान्या यावन्तो गुरवश्च ये ।
आविर्भावयति प्राक् तान् सकलान् पृथिवीतले ॥
जगन्नाथः शचीदेवी पुर्यौ च माधवेश्वरौ ।
तथाचाद्वैत आचार्यो बभूवुः प्रकटा भुवि ॥
आविर्भूतः स आचार्योऽपश्यत् संसारमण्डले ।
श्रीकृष्णभक्तिसम्बन्धहीनां भोगव्यवस्थितिम् ॥
भुञ्जते विषयान् केचित् पापैः पुण्यैस्तथा परे ।
न भक्तिगन्धलेशोऽत्र भवव्याधिविनाशकृत ॥
जनानां गतिमालक्ष्याद्वैताचार्यः कृपावशः ।
विचारमकरोदेवं कथं लोकहितं भवेत् ॥
अवतीर्य स्वयं कृष्णः स्वभक्तिं स्वयमाचरन् ।
कुरुते स्वप्रचारं चेत्तदैव स्यान्महद्धितम् ॥
कृष्णनाम विना धर्मः कलौ नास्त्येव चापरः ।
अतः कृष्णोऽवतीर्णः स्यात् कथङ्कारं कलौ युगे ॥
करिष्ये शुद्धभावेन भगवत्कृष्णसेवनम् ।
सदा निवेदयिष्यामि दैन्येन स्वमभीप्सितम् ॥
कृष्णमानीय तेनैव कीर्तनं चेत् प्रचारये ।
अद्वैत इति संज्ञा मे तदा सार्थक्यमेष्यति ॥
कयाराधनया तस्य कृष्णो यास्यति वश्यताम् ।
इत्येवं ध्यायतस्तस्य श्लोक एकः स्मृतिं गतः ॥

"तथाहि श्रीहरिभक्तिविलासस्यैकादशविलासे दशाधिकशताङ्कधृतं गौतमीयतन्त्रीय-नारद-वचनम् ।

तुलसीदलमात्रेण जलस्य चुलुकेन वा ।
विक्रीणीते स्वमात्मानं भक्तेभ्यो भक्तवत्सलः ॥२०।२६॥
एतच्च श्लोकार्थमाचार्यो विचार्य निरधारयत् ।
तुलसीं जलगण्डूषं यः कृष्णाय प्रयच्छति ॥

Bhaja Nitai Gour Radhe Syam, Japa Hare Krishna Hare Ram.

तद्दणप्रतिशोधाय कृष्णश्चिन्तयते सदा ।
तुलसीजलतुल्यं हि धनमन्यन्न विद्यते ॥
आत्मानमपि विक्रीय स ऋणं शोधयेदिति ।
चिन्तयन्नित्थमाचार्योऽनुक्षणं समराधयत् ॥
तुलसीदलमञ्जर्या कृष्णं गाङ्गेन चाम्बुना ।
ध्यायन् कृष्णपदाम्भोजं तुलसीजलमर्पयन् ॥
आकारणाय कृष्णस्य हुङ्कारमकरोन्मुहुः ।
श्रीकृष्णमवतार्यैवमाचार्योऽद्वैत ईश्वरः ॥
चैतन्यस्यावताराय सोऽभवन्मुख्यकारणम् ।
भक्तेच्छयावतारो हि धर्मरक्षाकृते हरेः ॥

"तथाहि श्रीमद्भागवते तृतीयस्कन्धे नवमाध्याये एकादशश्लोके श्रीभगवन्तं प्रति ब्रह्मस्तुतिवचनम्—

त्वं भक्तियोगपरिभावितहृत्सरोज-
आस्से श्रुतेक्षितपथो ननु नाथ पुंसाम् ।
यद् यद्धिया त उरुगाय विभावयन्ति
तत्तद्वपुः प्रणयसे सदनुग्रहाय ॥२१॥"

अस्य श्लोकस्य संक्षिप्तः सारः केवलमुच्यते ।
सर्व एवावताराः स्युर्भक्तानामिच्छया हरेः ॥
श्लोकस्य च चतुर्थस्य निश्चितोऽर्थः प्रकाशितः ।
प्रेमधर्मप्रचाराय श्रीगौराङ्गोऽवतीर्णवान् ॥
आशास्ते यः पदाम्भोजं श्रीरूपरघुनाथयोः ।
स कृष्णदास आह श्रीचैतन्यचरितामृतम् ॥

इति श्रीचैतन्यचरितामृत आदिखण्डे चैतन्यावतारसामान्य-
कारणं नाम तृतीयः परिच्छेदः ॥३॥

चतुर्थः परिच्छेदः

"श्रीचैतन्यप्रसादेन तद्रूपस्य विनिर्णयम् ।
बालोऽपि कुरुते शास्त्रं दृष्ट्वा व्रजविलासिनः ॥१॥"
जयतात् कृष्णचैतन्यो नित्यानन्दो जयत्यसौ ।
जयत्यद्वैतचन्द्रश्च गौरभक्ता जयन्ति च ॥
श्लोकस्य च चतुर्थस्य कृतार्थविवृतिर्मया ।
श्रूयतां पञ्चमस्यार्थः प्रणिधानेन सम्प्रति ॥
मूलश्लोकार्थमाख्यातुं तस्य सङ्गतये पुनः ।
आभासं विवरिष्यामि सुस्पष्टं प्रथमं ततः ॥
चतुर्थश्लोकसारार्थो मया पूर्वं प्रकाशितः ।
प्रेमनामप्रचारायावतारोऽयमभूदिति ॥
सत्यत्वेऽपि निमित्तस्य गौणमेतत् प्रयोजनम् ।
प्रधानकारणन्त्वत्र श्रूयतामवधानतः ॥
पुरा हर्त्तुं भुवो भारं कृष्णोऽवतीर्णवानिति ।
एतत् सर्वाणि शास्त्राणि जगत्यां हि विवृण्वते ॥
स्वयं-भगवतः कर्म न स्याद्भूभारसंक्षयः ।
श्रीविष्णुः स्थितिकर्त्तासौ कुर्याद्भूपरिपालनम् ॥
किन्तु कृष्णावतारस्य समये समुपस्थिते ।
भूभारक्षयकालोऽपि तेनैव सह सङ्गतः ॥
स पूर्णभगवान् यत्र कालेऽवतरति क्षितौ ।
तेन सर्वेऽवतारास्ते मिश्रिताः सम्भवन्त्यपि ॥
नारायणश्चतुर्व्यूहा मत्स्यकूर्मादयस्तथा ।
युगमन्वन्तराणाञ्च यावन्तो येऽवतारकाः ॥
सर्वे कृष्णाङ्गमाश्रित्य तदैवावातरन्निह ।
इत्थमवातरत् कृष्णः स पूर्णभगवानिति ॥

अतएव तदा विष्णुरासीत् कृष्णस्य विग्रहे ।
विष्णुद्वारेण कृष्णोऽसौ चकारासुरनाशनम् ॥
तस्यानुषङ्गिकं कर्म सर्वासुरनिपातनम् ।
यदर्थमवतारोऽस्य वच्मि तन्मूलकारणम् ॥
प्रेमरसस्य निर्यासमाधुर्यास्वादनाय च ।
रागमार्गेण तद्भक्तिप्रचाराय जनेष्वपि ॥
करुणावरुणावासः कृष्णो रसिकशेखरः ।
तन्निमित्तद्वयेनैव स्वावतारं स इच्छति ॥
मदीयैश्वर्य्यबोधेन मूर्च्छितं निखिलं जगत् ।
ऐश्वर्य्यशिथिलप्रेमा मह्यं जातु न रोचते ॥
ईश्वरं मन्यते यो मामात्मानं मन्यतेऽधमम् ।
वशीभूतोऽपि तत्प्रेम्णा तदधीनो भवामि न ॥
भजते येन भावेन भक्तो यो यश्च मामिह ।
तं भजे तेन भावेन स्वभावो ह्येष एव मे ॥

"तथाहि श्रीमद्भगवद्गीतायां चतुर्थाध्याय एकादशश्लोकेऽर्जुनं प्रति श्रीभगवद्वाक्यम्—

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्वशः ॥२॥"

पुत्रो मेऽयं सखा मेऽयं ममायं प्राणवल्लभः ।
इति भावेन यः शुद्धां भक्तिं वितनुते मयि ॥
मन्यते वरमात्मानं मां तुल्यमथवाल्पकम् ।
तेन तेनैव भावेन तदधीनो भवाम्यहम् ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे द्व्यशीतितमाध्याय एकत्रिंशश्लोके गोपीं प्रति श्रीकृष्णवाक्यम्—

मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते ।
दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापनः ॥३॥"

जननी पुत्रभावेन मां निबध्नाति रज्जुभिः ।
अतिक्षुद्र इति ज्ञात्वा मां लालयति रक्षति ॥
आरोहति मम स्कन्धं शुद्धसख्येन मे सखा ।
कियन्महत्तरोऽसि त्वं त्वमहञ्च समाविति ॥
प्रिया चेदभिमानेन कुरुते मम भर्त्सनम् ।
वेदस्तुतेरपीदन्तु मनो हरति मेऽधिकम् ॥
अस्या भक्तेर्विशुद्धायाः प्रचारार्थं महीतले ।
अवतारं ग्रहीष्यामि विविधाद्भुतलीलया ॥
यासां प्रचारो नास्त्येव वैकुण्ठादिषु धामसु ।
तास्ता लीलाः करिष्यामि स्यान्ममापि यथाद्भुतम् ॥
मय्यौपपत्यभावेन प्रपत्स्यन्ते हि गोपिकाः ।
तं भावं स्वप्रभावेण योगमाया विधास्यति ॥
अविज्ञातस्वरूपेण मया गोपीगणेन च ।
अन्योन्यं गुणरूपाभ्यां मनो नित्यं हरिष्यते ॥
विहाय लौकिकं धर्मं मेलिष्यावः परस्परम् ।
कदाचिन्मेलनं दैवाद् विप्रयोगश्च कर्हिचित् ॥
एवमास्वादयिष्यावो रससारमुभावपि ।
अनुग्रहो हि भक्तेषु तद्द्वारेण भविष्यति ॥
व्रजस्य निर्मलं रासं श्रुत्वा भक्तजना मम ।
धर्मं त्यक्त्वा प्रपत्स्यन्ते रागमार्गेण मां यथा ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे त्रयस्त्रिंशाध्याये षट्त्रिंशश्लोके परीक्षितं प्रति शुकवाक्यम्—

अनुग्रहाय भक्तानां मानुषं देहमाश्रितः ।
तादृशीर्भजते क्रीडा याः श्रुत्वा तत्परो भवेत् ॥४॥
भवेदित्यत्र विध्यर्थे लिङ् विभक्तिः प्रयुज्यते ।
तदर्थोऽवश्यकृत्यत्वं प्रत्यवायस्ततोऽन्यथा ॥

एषा वाञ्छेव कृष्णस्य यथा प्राकट्यकारणम् ।
आनुषङ्गिकमुद्देश्यमसुराणां विनाशनम् ॥
तथा चैतन्यकृष्णस्य स्वयं भगवतो नहि ।
प्रचारो युगधर्मस्य कर्म भवितुमर्हति ॥
मनो यदावतारेऽभूत्तस्य केनापि हेतुना ।
युगधर्मस्य कालस्तु तेन कालेन सङ्गतः ॥
आत्मना प्रेम्न आस्वादो नामसङ्कीर्त्तनं तथा ।
उद्देश्यद्वयमालम्ब्य भक्तैः सार्द्धमवातरत ॥
आचण्डालं तया द्वारा कीर्त्तनं समचारयत ।
नाम-प्रेम-स्रजं दृब्ध्वा संसारं समभूषयत ॥
इत्थं स्वं भक्तभावं स स्वीकुर्वंश्चाचरन् स्वयम् ।
प्राचारयन्निजां भक्तिं शुद्धां धरणिमण्डले ॥
दास्यं सख्यञ्च वात्सल्यं शृङ्गारश्चेति नामतः ।
एतद्भावचतुष्कस्य पात्रं भक्ताश्चतुर्विधाः ॥
सर्व एव हि मन्यन्ते श्रेष्ठं भावं निजं निजम् ।
कृष्णानन्दरसास्वादं कुर्वन्ति स्वस्वभावतः ॥
एतेषां तारतम्यं चेन्निरपेक्षं विचार्यते ।
शृङ्गारेऽधिकमाधुर्यं प्रतिपद्येत सर्वतः ॥

"तथाहि श्रीभक्तिरसामृतसिन्धौ दक्षिणविभागे स्थायिभावलहर्य्यां द्वाविंशश्लोके श्रीरूपगोस्वामि-वाक्यम्—

यथोत्तरमसौ स्वादविशेषोल्लासमय्यपि ।
रतिर्वासनया स्वाद्वी भासते कापि कस्यचित् ॥५॥"

अतस्तस्याभिधानं हि कथ्यते मधुरो रसः ।
स्वीयात्वं परकीयात्वं द्वौ भावौ तस्य सम्मतौ ॥
परकीयात्वभावेन रसोल्लासोऽधिको भवेत् ।
व्रजं विना तु नान्यत्र कुत्राप्यस्य भवेत् स्थितिः ॥

केवलं व्रजगोपीनामेव भावो निरन्तरः ।
तासु श्रीराधिकायास्तु भावस्य चरमोऽवधिः ॥
तत्प्रेमा निर्मलः प्रौढ़ो गुणैश्च निखिलोत्तमः ।
तन्माधुर्य्यरसास्वादहेतोः कृष्णस्य केवलम् ॥
अतोऽङ्गीकृत्य तं भावं गौराङ्गो भगवान हरिः ।
असाधयत् प्रयत्नेन निजवाञ्छामयं स्वयम् ॥

"स्तवमालायां श्रीचैतन्यदेवस्य स्तवे द्वितीयः श्लोकः—

सुरेशानां दुर्गं गतिरतिशयेनोपनिषदां
मुनीनां सर्वस्वं प्रणतपटलीनां मधुरिमा ।
विनिर्य्यासः प्रेम्णो निखिलपशुपालाम्बुजदृशां
स चैतन्यः किं मे पुनरपि दृशोर्यास्यति पदम् ॥

तथाहि तत्रैव तृतीयः श्लोकः—

अपारं कस्यापि प्रणयिजनवृन्दस्य कुतुकी
रसस्तोमं हृत्वा मधुरमुपभोक्तुं कमपि यः ।
रुचं स्वामावव्रे द्युतिमिह तदीयां प्रकटयन
स चैतन्यः किं मे पुनरपि दृशोर्यास्यति पदम् ॥७॥"

तद्भावास्वादनायैव धर्मसंस्थापनं कृतम् ।
प्रधानं कारणं तस्य कथयाम्यवधीयताम् ॥
श्लोकस्य पूर्वमाभासो मूलहेतोर्मया कृतः ।
इदानीं विवरिष्यामि श्लोकार्थं सुपरिस्फुटम् ॥

"तथाहि श्रीरूपगोस्वामि-कडचायाम्,—

राधा कृष्णप्रणयविकृतिर्ह्लादिनी शक्तिरस्मा-
देकात्मानावपि भुवि पुरा देहभेदं गतौ तौ ।
चैतन्याख्यं प्रकटमधुना तद्द्वयञ्चैक्यमाप्तं
राधाभावद्युतिसुवलितं नौमि कृष्णस्वरूपम् ॥८॥"

आत्मैवैको द्विधा भूत्वा जग्राह विग्रहद्वयम् ।
राधाकृष्णौ रसास्वादमकुर्वातां परस्परम् ।।
तद्द्वयन्त्वैक्यमापन्नं चैतन्याख्यं हि साम्प्रतम् ।
तद्भावास्वादनव्यस्तं तत्रैवैकत्र संस्थितम् ।।
अनेन हेतुना पूर्वं क्रियते विवृतिर्मया ।
यया गौराङ्गदेवस्य महिमा सुप्रकाशते ।।
कृष्णप्रेमविलासर्द्धिः श्रीमती राधिका मता ;
कृष्णस्वरूपशक्तिः सा ह्लादिनी नाम कथ्यते ।।
ह्लादिनी शक्तिरानन्दं कृष्णमास्वादयत्यसौ ।
श्रीकृष्णो ह्लादिनी-द्वारा भक्तान् पुष्णाति तै रसैः ।।
सच्चिदानन्दपूर्णं हि कृष्णतत्त्वं निरूप्यते
एकापि तस्य चिच्छक्तिर्धत्ते रूपत्रयं यथा ।।
सदंशे सन्धिनी नाम चिदंशे संविदित्यसौ ।
आनन्दांशस्वरूपा सा ज्ञायते ह्लादिनीति च ।।

"तथाहि श्रीभक्तिरसामृतसिन्धौ रतिभक्तिलहर्यां प्रथमश्लोकव्याख्यायां-धृतं विष्णुपुराणीय-प्रथमांशीय-द्वादशाध्यायस्याष्टचत्वारिंशपद्यम्—

ह्लादिनी सन्धिनी संवित्त्वय्येका सर्वसंस्थितौ ।
ह्लाद-तापकरी मिश्रा त्वयि नो गुणवर्जिते ।।६।।"
सन्धिन्याः सारवानंशः शुद्धसत्त्वाभिधानकः ।
यस्मिन् भगवतः सत्ता नित्यं विश्राम्यति ध्रुवम् ।।
कृष्णस्य पितरौ स्थानं गृहं शय्यासनादिकम् ।
शुद्धसत्त्वविलासं हि तावत् सर्वं विचक्षते ।।

"श्रीमद्भागवते चतुर्थस्कन्धे तृतीयाध्याये एकविंशश्लोके शिव-वाक्यम्—

सत्त्वं विशुद्धं वसुदेवसंज्ञितं
यदीयते तत्र पुमानपावृतः ।

सत्त्वे च तस्मिन् भगवान् वासुदेवो
ह्यधोक्षजो मे मनसा विधीयते ॥१०॥
श्रीकृष्णे भगवत्ताधीः संविदः सार उच्यते ।
ब्रह्मज्ञानादिकं सर्वं तत्-परीवार उच्यते ॥
प्रेमा हि ह्लादिनीसारस्ततसारो भाव उच्यते ।
भावस्य परमा काष्ठा महाभाव इतीर्य्यते ॥
महाभावस्वरूपा हि श्रीराधा परदेवता ।
खनिः सर्वगुणानां सा कृष्णकान्ताशिरोमणिः ॥

"तथाहि उज्ज्वलनीलमणौ राधा-चन्द्रावल्योः श्रेष्ठताकथने श्रीरूप-गोस्वामि-वाक्यम्—

तयोरप्युभयोर्मध्ये राधिका सर्वथाधिका ।
महाभावस्वरूपेयं गुणैरतिवरीयसी ॥११॥"
यस्याश्चित्तेन्द्रियाङ्गादि श्रीकृष्णप्रेमभावितम् ।
क्रीडासहायः कृष्णस्य स्वशक्तिः सैव राधिका ॥

"तथाहि ब्रह्मसंहितायां पञ्चमाध्याये त्रयस्त्रिंशः श्लोकः—

आनन्दचिन्मयरसप्रतिभाविताभि-
स्ताभिर्य एव निजरूपतया कलाभिः ।
गोलोक एव निवसत्यखिलात्मभूतो
गोविन्दमादिपुरुषं तमहं भजामि ॥१२॥"
यथास्वादयते कृष्णं रसं राधेति वर्णितम् ।
यथा क्रीडासहायत्वं, श्रूयतां तद्वितन्यते ॥
सर्वासां कृष्णकान्तानां त्रैविध्यं परिलक्ष्यते ।
लक्ष्मीगणश्च वैकुण्ठे महिष्यो द्वारकापुरे ॥
सर्वकान्तागणश्रेष्ठा व्रजे गोपाङ्गनाश्च ताः ।
सर्वासामेव कान्तानां राधांशत्वेन विस्तृतिः ॥

अवतारी यथा कृष्णोऽवतारान कुरुते स्वयम् ।
कुरुते चांशिनी राधा तथा त्रैविध्यविस्तृतिम् ॥
अंशविभूतयस्तस्या लक्ष्म्यो वैकुण्ठधामनि ।
द्वारकायां महिष्यश्च प्रतिविम्बस्वरूपिकाः ॥
तद्वैभवविलासांशा लक्ष्म्यो वैकुण्ठसंस्थिताः ।
तद्वैभवविलासा हि महिष्यो द्वारकापुरि ॥
आकृत्या च प्रकृत्या च विभिन्नास्तु व्रजाङ्गनाः ।
कायव्यूहा हि राधाया रसपोषणहेतवः ॥
अन्तरेण बहूः कान्ता रसोल्लासो भवेन्नहि ।
सहायत्वाय लीलायां बहुधा च प्रकाशनम् ॥
नानाभावरसादीनां भेदात्तासाञ्च राधिका ।
कृष्णं रासादिका लीलाः सम्यक् स्वादयति व्रजे ॥
गोविन्दानन्दिनी राधा श्रीगोविन्दविमोहिनी ।
सैव गोविन्दसर्वस्वं सर्वकान्ताशिरोमणिः ॥

"तथाहि श्रीभक्तिरसामृतसिन्धौ भक्तिसामान्यलहर्य्यां प्रथमश्लोक-व्याख्यायां धृतबृहद्‌गौतमीयतन्त्रवचनम्—

देवी कृष्णमयी प्रोक्ता राधिका परदेवता ।
सर्वलक्ष्मीमयी सर्वकान्तिः सम्मोहिनो परा ॥१३॥"

सा देवी द्योतमाना या श्रेष्ठसौन्दर्य्यशालिनी ।
कृष्णाराधनलीलाया निवासनगरीति वा ॥
यस्या अन्तर्वहिः कृष्णः सैव कृष्णमयी मता ।
नेत्रं पतति यत्रैव कृष्णः स्फुरति तत्र हि ॥
प्रेमानन्दमयः कृष्णस्तत्स्वरूपा हि राधिका ।
तच्छक्तित्वात् समं तेन तस्याः स्यादेकरूपता ॥
करोत्याराधनं या च कृष्णवाञ्छाप्रपूरणम् ।
तद्राधिकेति नामास्याः पुराणे विवृतं किल ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे त्रिंशाध्याये चतुर्विंशश्लोके काश्चिद् गोपीः प्रति कस्याश्चिद् गोप्या वाक्यम्—.

अनयाराधितो नूनं भगवान् हरिरीश्वरः।
यन्नो विहाय गोविन्दः प्रीतो यामनयद्रहः ॥१४॥"
अतो हि सर्वपूज्या सा राधा परमदेवता।
सर्वेषां पालिका माता सर्वेषां जगतामपि ॥
सर्वलक्ष्मीति शब्दस्य व्याख्यानं विहितं पुरा।
सर्वलक्ष्मीगणोऽपीमां राधिकामधितिष्ठति ॥
षड़ैश्वर्य्याणि कृष्णस्य सर्वलक्ष्मीङ्गितानि वा।
राधा तेषामधिष्ठात्री शक्तिः शक्तिगणोत्तमा ॥
नित्यं यत्रावतिष्ठन्ते सर्वसौन्दर्य्यकान्तयः।
सर्वलक्ष्मीगणस्यापि सुषमा यत्प्रभावतः ॥
कान्तिशब्देन कृष्णस्य सर्वेच्छा वा निगद्यते।
कृष्णस्य निखिला वाञ्छा राधायामेव वर्त्तते ॥
राधा करोति कृष्णस्य सर्ववाञ्छितपूरणम्।
तत् सर्वकान्तिशब्दार्थ एवं विव्रियते मया ॥
जगतां मोहनः कृष्णो राधा तस्यापि मोहिनी।
अतः सैव समस्तानां परा सम्मोहिनी मता ॥
राधिका पूर्णशक्तिर्हि कृष्णश्च पूर्णशक्तिमान।
सिद्धः शास्त्रप्रमाणेन न भेदो वस्तुनोर्द्वयोः ॥
कस्तूरी तत्सुगन्धश्च न विच्छेद्यौ यथा स्वतः।
अग्नेरग्निशिखायाश्च न भेदो जातु विद्यते ॥
राधिकाकृष्णयोर्नित्यं तथैवाभिन्नरूपता।
द्वैरूप्यधारणं लीलारसास्वादाय केवलम् ॥
भक्तान् शिक्षयितुं प्रेमभक्तिं स्वयमवातरत्।
स्वीकृत्य राधिकाभावकान्तिद्वयसमग्रताम् ॥

Bhaja Nitai Gour Radhe Syam, Hare Krishna Hare Ram.

कृष्णचैतन्यरूपेण सोऽवतारोऽभवद्भुवि ।
इत्ययं पञ्चमस्यार्थः श्लोकस्य विवृतो मया ॥
षष्ठश्लोकस्य भावार्थप्रकाशार्थमतः परम् ।
श्लोकस्य प्रथमं तावदाभासोऽत्र विशद्यते ॥
चैतन्येनावतीर्य्यैव सङ्कीर्त्तनं प्रचारितम् ।
इति प्रयोजनं बाह्यं पूर्वं तत् सूचितं मया ।
बीजं यदवतारस्य मुख्यमेकन्तु वर्त्तते ।
रसिकाग्रयस्य कृष्णस्य तदेवात्मप्रयोजनम् ॥
अतिगूढोऽप्यसौ हेतुस्त्रिविधः परिकीर्त्तितः ।
दामोदरस्वरूपेण योऽसौ सम्यक् प्रचारितः ॥
अत्यन्तमन्तरङ्गोऽयं स्वरूपः श्रीमहाप्रभोः ।
स एवैतान् प्रभोः सर्वान् प्रसङ्गान वेद सर्वथा ॥
मूर्त्तिमान राधिकाभावो हृदयं हि महाप्रभोः ।
तद्भावादुदिते तत्र सुखदुःखे निरन्तरम् ॥
अन्त्यलीला प्रभोः कृष्णविरहोन्मादसङ्कुला ।
सदा भ्रममयी चेष्टा प्रलापबहुलं वचः ॥
राधिकाया यथा भाव उद्धवस्य विलोकनात् ।
तथा भावेन चैतन्यप्रभुरासीद्दिवानिशम् ॥
प्रालपत् कण्ठमाश्लिष्य स्वरूपस्य प्रभुर्निशि ।
आवेशेनात्मनो भावमपावृण्वन्नवोचत ॥
यो यो भावः प्रभोरन्तरुदतिष्ठद् यदा यदा ।
गीतैः श्लोकैश्च तद्भावैः स्वरूपोऽसुखयत् प्रभुम् ॥
इत्थं सर्वविचारेण नेदानीं कार्य्यमस्ति मे ।
अग्रतः कथयिष्यामि विस्तरेण यथामति ॥
त्रिविधा वयसो धर्माः कृष्णस्यासन् पुरा व्रजे ।
आसन् कौमार-पौगण्ड-कैशोराणि यथाक्रमम् ॥

तेन वात्सल्यसंवेगात् कौमारं सफलं कृतम् ।
सुहृद्वर्गं समादाय पौगण्डं सार्थकीकृतम् ॥
कृत्वा रासविलासादीन् सार्द्धं श्रीराधिकादिभिः ।
आस्वादयद् यथाभीष्टं रसनिर्य्यासमाधुरीम् ॥
वयः कैशोरकं पुष्पवाणश्च निखिलं जगत् ।
त्रीणि रासादिलीलाभिर्नीतानि तेन पूर्णताम् ॥

"तथाहि तोषण्यां रासस्य प्रथमश्लोकव्याख्यायां धृतं विष्णुपुराणस्य पञ्चमांशीयत्रयोदशाध्यायस्य पञ्चपञ्चाशत्तमं पद्यम्—

सोऽपि कैशोरकवयो मानयन्मधुसूदनः ।
रेमे स्त्रीरत्नकूटस्थः क्षपासु क्षपिताहितः ॥१५॥

तथाहि श्रीभक्तिरसामृतसिन्धौ दक्षिणविभागे विभावलहर्य्यां चतुर्विंशत्यधिकशततमश्लोके श्रीरूपगोस्वामिवाक्यम्—

वाचा सूचितशर्वरीरतिकलाप्रागल्भ्यया राधिकां
व्रीड़ाकुञ्चितलोचनां विरचयन्नग्रे सखीनामसौ ।
तद्वक्षोरुहचित्रकेलिमकरीपाण्डित्यपारं गतः
कैशोरं सफलीकरोति कलयन् कुञ्जे विहारं हरिः ॥१६॥

तथाहि विदग्धमाधवे सप्तमाङ्के तृतीयश्लोके वृन्दां प्रति पौर्णमासीवाक्यम्—

हरिरेष न चेदवातरिष्यन्मथुरायां मधुराक्षि राधिका च ।
अभविष्यदियं वृथा विसृष्टिर्मकराङ्कस्तु विशेषतस्तदात्र" ॥१७॥

इत्थमेव पुरा कृष्णो रसैकनिलयोऽपि सन् ।
कृत्वापि रसनिर्य्यासरसनञ्च दिवानिशम् ॥
कथञ्चिन्न सदा प्राप्नोद् वाञ्छितत्रितयावधिम् ।
अचेष्टत तदैवैष तद्वाञ्छात्रयपूर्त्तये ॥
प्रथमा तस्य या वाञ्छा तद्व्याख्यामहमारभे ।
कृष्णेनोक्तमहं सर्वरसानां परमाश्रयः ॥

पूर्णानन्दमयः साक्षात् पूर्णतत्त्वश्च चिन्मयः ।
राधायाः परमः प्रेमा मामुन्मादयति स्वतः ॥
नैव जानामि तत्प्रेम्नो वर्त्तते वा कियद्बलम् ।
यद्बलं मामहोरात्रं विदधात्यति विह्वलम् ॥
गुरुर्मे राधिकाप्रेमा तस्य शिष्योऽस्म्यहं नटः ।
सदा मां विविधैर्नृत्यैरुद्भटं नर्त्तयत्यसौ ॥

"तथाहि गोविन्दलीलामृतेऽष्टमसर्गे सप्तसप्ततितमश्लोके श्रीराधावृन्दयो-रुक्ति-प्रत्युक्ती—

कस्माद्वृन्दे प्रियसखि, हरेः पादमूलात, कुतोऽसौ ?
कुण्डारण्ये, किमिह कुरुते ? नृत्यशिक्षां, गुरुः कः ?
तं त्वन्मूर्त्तिः प्रतितरुलतं दिग्विदिक्षु स्फुरन्ती
शैलूषीव भ्रमति परितो नर्त्तयन्ती स्वपश्चात् ॥
आह्लादो जायते यावान् स्वप्रेमास्वादनान्मम ।
राधिका-प्रेम्न आस्वादात् कोटिर्भवति तावताम् ॥
यथान्योन्यं विरुद्धानां धर्माणामहमाश्रयः ।
स्वविरुद्धैस्तथा धर्मैर्व्याप्तं तत्प्रेम सर्वदा ॥
राधा-प्रेमा विभुस्तस्य नावकाशोऽस्ति वृद्धये ।
तथापि वर्द्धते नित्यं सोऽयं प्रेमा प्रतिक्षणम् ॥
यस्मात् खलु नास्त्येव गरिष्ठं वस्तु किञ्चन ।
तथापि गुरुधर्मेण गौरवेण स वर्जितः ॥
यं विना निर्मलं किञ्चिद्द्वितीयं नेह वर्त्तते ।
तथापि व्यवहारोऽस्य वामो वक्रश्च सर्वदा ॥

"तथाहि दानकेलिकौमुद्यां द्वितीयश्लोके श्रीरूपगोस्वामि-वाक्यम्—

विभुरपि कलयन् सदाभिवृद्धिं गुरुरपि गौरवचर्यया विहीनः ।
मुहुरुपचितवक्रिमापि शुद्धो जयति मुरद्विषि राधिकानुरागः ॥१६॥"

राधिका भवति प्रेम्नस्तस्य परम आश्रयः ।
प्रेम्नः केवलमेवास्य विषयस्तु भवाम्यहम् ॥
सौख्यं विषयजातीयमास्वाद्यं मम केवलम् ।
मत् कोटिगुणिताह्लाद आश्रयेऽस्ति विशेषतः ॥
सुखमाश्रयजातीयं भोक्तुं धावति मे मनः ।
यत्नेनापि न शक्नोमि स्वादाय का गतिर्मम ॥
अस्य प्रेम्नः कदाचिच्चेद्भवेयमहमाश्रयः ।
प्रेमानन्दमिमं तावदुपलब्धुं तदोत्सहे ॥
इति कौतूहली कृष्णो ध्यायंस्तूष्णीं तदाश्रयत ।
किन्तु प्रेमप्रलोभोऽस्य हृतकम्पी ववृधे मुहुः ॥
लोभस्याद्यः प्रकारोऽयं द्वितीयः श्रूयतां पुनः ।
वितर्कं कृतवानेवं कृष्णः पश्यन् स्वमाधुरीम् ॥
इदं मदीयमाधुर्यमनन्तं पूर्णमद्भुतम् ।
सीमामस्य न शक्नोति प्राप्तुं कोऽपि जगत्त्रये ॥
प्रेम्ना तेनैव सा नित्यमेकाकिन्येव राधिका ।
तन्माधुर्य्यामृतं सर्वं सम्यगास्वादयत्यहो ॥
सुनिर्मलोऽपि राधायाः सत्तमः प्रेमदर्पणः ।
ऊर्द्ध्वोर्द्ध्वं स्वच्छता तस्य वर्द्धते तु क्षणे क्षणे ॥
माधुर्यस्यावकाशो मे वर्द्धितुं नास्ति कश्चन ।
तत्प्रेमदर्पणस्यान्तस्तद्विभाति नवं नवम् ॥
माधुर्य्यं मम राधायाः प्रेम चोभे परस्परम् ।
अपराजयमाने ते प्रवर्द्धेते प्रतिक्षणम् ॥
नित्यं नवं नवं भाति मम माधुर्य्यमुत्तमम् ।
स्वस्वप्रेमानुसारेण भक्ता आस्वादयन्ति तत् ॥
जातु चेदात्ममाधुर्य्यं निरीक्षे दर्पणादिषु ।
तदास्वादाय लुब्धोऽपि न समर्थोऽस्मि कर्हिचित ॥

तत्तदास्वादनोपायं चिन्तये चेद् विचारतः।
राधास्वरूपमादातुं लोभाद्भवति मे मनः॥

"तथाहि ललितमाधवेऽष्टमाङ्केऽष्टाविंशश्लोके मणिभित्तौ स्वप्रतिबिम्बं दृष्ट्वा विस्मयेन श्रीकृष्णवाक्यम्—

अपरिकलितपूर्वः कश्चमत्कारकारी
स्फुरति मम गरीयानेष माधुर्यपूरः।
अयमहमपि हन्त प्रेक्ष्य यं लुब्धचेताः
सरभसमुपभोक्तुं कामये राधिकेव॥२०॥"

अहो श्रीकृष्णमाधुर्यं धत्ते स्वाभाविकं बलम्।
कृष्णादीन् पुरुषान् स्त्रीश्च चापलाय प्रचोदयेत्॥
श्रुतं दृष्टञ्च माधुर्यं सर्वचित्तानि कर्षति।
आस्वादयितुमात्मानं कृष्णोऽपि यतते सदा॥
तन्माधुर्यामृतं येन पीयते हि निरन्तरम्।
न प्रशाम्यति तत्तृष्णा सर्वदैव तु वर्द्धते॥
अतृप्तोऽसौ विधातारमेवमेव विनिन्दति।
अविदग्धो विधिर्नूनं सुष्ठु स्रष्टुं न वेद सः॥
अक्ष्णां कोटिं न सृष्ट्वा सोऽसृजद् द्वे एव लोचने।
निमेषान्निर्ममे तत्र कृष्णं पश्याम्यहं कथम्॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे एकत्रिंशाध्याये पञ्चदशश्लोके श्रीकृष्णं प्रति गोपीवाक्यम्—

अटति यद्भवानह्नि काननं त्रुटि युगायते त्वामपश्यताम्।
कुटिलकुन्तलं श्रीमुखञ्च ते जड़ उदीक्षतां पक्ष्मकृद्दृशाम्॥२१॥

तथाहि श्रीमद्भागवते द्वयशीतितमाध्याये सप्तविंशश्लोके परीक्षितं प्रति शुकवाक्यम्—

गोप्यश्च कृष्णमुपलभ्य चिरादभीष्टं
यत् प्रेक्षणे दृशिषु पक्ष्मकृतं शपन्ति।

दृग्भिर्हृदीकृतमलं परिरभ्य सर्वा
स्तद्भावमापुरपि नित्ययुजां दुरापम् ॥२२॥"
नेत्रयोर्न फलं किञ्चिद् विना कृष्णावलीकनात् ।
ईक्षते यो जनः कृष्णं स एव भुवि भाग्यवान् ॥

"तथाहि श्रीमद्भागवते दशमस्कन्ध एकविंशाध्याये सप्तमश्लोके काश्चिद् गोप्यः सखीः प्रत्यूचुः—

अक्षण्वतां फलमिदं न परं विदामः
सख्यः पशूननुविवेशयतोर्वयस्यैः ।
वक्त्रं व्रजेशसुतयोरनु वेणुजुष्टं
यैर्वा निपीतमनुरक्तकटाक्षमोक्षम् ॥२३॥

तथाहि तत्रैव दशमस्कन्धे चतुश्चत्वारिंशाध्याये त्रयोदशश्लोके गोपीः प्रति मथुरावासिनीभिरुक्तम्—

गोप्यस्तपः किमचरन् यदमुष्य रूपं
लावण्यसारमसमोर्द्ध्वमनन्यसिद्धम् ।
दृग्भिः पिबन्त्यनुसवाभिनवं दुराप-
मेकान्तधाम यशसः श्रिय ईश्वरस्य ॥२४॥"

अपूर्वं कृष्णमाधुर्य्यमपूर्वमपि तद्बलम् ।
यदाकर्णनमात्रेण मनो लोलायते भृशम् ॥

कृष्णस्याजनयल्लोभं भोगार्थं कृष्णमाधुरी ।
कृष्णोऽविन्दन्मनःक्षोभं सम्यग्भोक्तुमपारयन् ॥

द्वितीयं कारणञ्चैतन्निःशेषं विवृतं मया ।
तृतीयञ्चावतारस्य कारणं श्रूयतामथ ॥

अयं स रससिद्धान्तनिगूढः परमो मतः ।
एकः स्वरूपगोस्वामी केवलं वेत्ति सर्वथा ॥

यद्यन्यः कोऽपि जानाति स तस्मादेव नान्यतः।
यतश्चैतन्यदेवस्य स एव मर्मवित्तमः॥
प्रेमा गोपीगणस्यैव रूढभावाभिधानकः।
स प्रेमा निर्मलः शुद्धो न जातु काम इत्ययम्॥

"तथाहि श्रीभक्तिरसामृतसिन्धौ पूर्वविभागे साधनभक्तिलहर्यां त्रयश्चत्वारिंशदधिकशताङ्कधृतं गौतमीयतन्त्रवचनम्—

प्रेमैव गोपरामाणां काम इत्यगमत प्रथाम्।
इत्युद्धवादयोऽप्येतं वाञ्छन्ति भगवत्प्रियाः॥२५॥"
विभिन्नलक्षणौ कामः प्रेमा च लौहहेमवत।
तयोः परस्परं ज्ञेयं वैलक्षण्यं स्वरूपतः॥
स्वेन्द्रियप्रीतये वाञ्छा काम इत्युच्यते बुधैः।
श्रीकृष्णस्येन्द्रियप्रीत्यै वाञ्छैव प्रेम कथ्यते॥
भवेत् कामस्य तात्पर्यं स्वसम्भोगे हि केवलम्।
श्रीकृष्णसुखतात्पर्यं प्रेम्नो महाबलस्य च॥
लोक-वेद-तनूधर्मान् कर्माणि निखिलान्यपि।
लज्जां धैर्यं तनूसौख्यं सुखमर्माणि चात्मनः॥
आर्यमार्गान् सुदुस्त्याज्यान् परिवारांस्तथात्मनः।
स्वजनांस्तत्कृतं सर्वं ताडनाभर्त्सनादिकम्॥
तांश्चाशेषान् विहायैव श्रीकृष्णं भजते सदा।
करोति सेवनं प्रेम्नः श्रीकृष्णसुखहेतवे॥
कृष्णे दृढोऽनुरागोऽयं स प्रेमेत्यभिधीयते।
न तत्र मलिना रेखा धौते वस्त्रे शुचाविव॥
कामप्रेम्णोरतो ज्ञेयः प्रभेदः सुमहत्तमः।
घनान्धतमसं कामः प्रेमा निर्मलभास्करः॥
अतो गोपीगणस्यैव कामगन्धो न विद्यते।
सम्बन्धो यस्तु कृष्णेन स तस्यैव सुखार्थकः॥

"तथाहि श्रीमद्भागवते दशमस्कन्ध एकत्रिंशाध्याय ऊनविंशश्लोके श्रीकृष्णं प्रति गोपीवाक्यम्—

यत्ते सुजात चरणाम्बुरुहं स्तनेषु
भीताः शनैः प्रिय दधीमहि कर्कशेषु ।
तेनाटवीमटसि तद्व्यथते न किं स्वित्
कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥२६॥"

आत्मनः सुखदुःखानि गणयन्ति न गोपिकाः ।
सर्वं व्यवहरन्त्येव कृष्णस्य सुखहेतवे ॥
श्रीकृष्णस्य कृते सर्वपरित्यागपुरःसरम् ।
शुद्धानुरागं कुर्वन्ति तस्यैव प्रीतिकाम्यया ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे द्वात्रिंशाध्याये विंशश्लोके गोपीः प्रति श्रीकृष्णवाक्यम्—

एवं मदर्थोज्झितलोकवेद-
स्वानां हि वो मय्यनुवृत्तयेऽबलाः ।
मया परोक्षं भजता तिरोहितं
मासूयितुं मार्हथ तत्प्रियं प्रियाः ॥२७॥"

पुरैव भगवान् कृष्णः प्रतिज्ञां कृतवान् दृढाम् ।
यो यथा भजते कृष्णं स भजत्येव तं तथा ।

"तथाहि श्रीमद्भगवद्गीतायां चतुर्थाध्याय एकादशश्लोकेऽर्जुनं प्रति श्रीकृष्णवाक्यम्—

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्वशः ॥२८॥"

प्रतिज्ञा साऽपि भग्नाभूद् गोपीनां प्रेमसेवया ।
प्रमाणं तत्र कृष्णस्य श्रीमुखामृतभाषणम् ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे द्वाविंशाध्याये एकविंशश्लोके गोपीः प्रति श्रीकृष्णवाक्यम्—

न पारयेऽहं निरवद्य संयुजां स्वसाधुकृत्यं विबुधायुषापि वः ।
या माभजन् दुर्जयगेहशृङ्खलाः संवृश्च्य तद्वः प्रतियातु साधुना ॥२९॥"

तथापि निजदेहे या गोपीनां प्रीतिरीक्ष्यते ।
कृते तस्यैव कृष्णस्य सापीति ज्ञायतां खलु ॥
मया समर्पितं तावत् कृष्णायेदं कलेवरम् ।
तस्यैवेदं धनं स्वीयं तथा सम्भोगसाधनम् ॥
कृष्णस्य दर्शन-स्पर्श-सम्भाषार्थमिदं वपुः ।
इति कुर्वन्ति ता गोप्योऽङ्गानां मार्ज्जनभूषणे ॥

"तथाहि लघुभागवतामृते उत्तरखण्डे गोपीप्रेमामृते षट्त्रिंशांकधृतादि-पुराणीयेऽर्जुनं प्रति श्रीकृष्णवाक्यम्—

"निजाङ्गमपि या गोप्यो ममेति समुपासते ।
ताभ्यः परं न मे पार्थ निगूढ़प्रेमभाजनम् ॥३०॥"

गोपीभावस्य चान्योऽस्ति स्वभावः परमाद्भुतः ।
प्रभावो यस्य तीक्ष्णाया अपि बुद्धेर्न गोचरः ॥
सुखवाञ्छामकृत्वैव कृष्णं पश्यन्ति गोपिकाः ।
तासां तथापि गोपीनां भवेत् कोटिगुणं सुखम् ॥
आनन्दं लभते कृष्णो यावन्तं गोपिकेक्षणात् ।
तत्कोटिगुणमानन्दं गोप्य आस्वादयन्ति तु ॥
स्वसुखस्यानुसन्धानं तासां नास्त्येव लेशतः ।
सुखवृद्धिस्तथापीति विरोधे कः समन्वयः ? ॥
एकमात्रं विरोधेऽस्मिन् समाधानं विलोक्यते ।
गोपिकानां सुखं कृष्णसुखे परिसमाप्यते ॥
कृष्णस्य वर्द्धते गोपीदर्शनाद्या प्रफुल्लता ।
तथैव तस्य माधुर्यमतुलं परिवर्द्धते ॥
मम सन्दर्शनात् कृष्ण एतावत् सुखमाप्तवान् ।
इति सौख्येन गोपीनामाननाङ्गं प्रफुल्लति ॥

गोपीशोभेक्षया शोभैधते कृष्णस्य यावती ।
तावती वर्द्धते शोभा गोपीनाञ्च तदीक्षणात ॥
इत्थं तद्द्वयमन्योन्यमाकर्षति विकर्षति ।
अपराजयमानं तदन्योन्यं प्रतिवर्द्धते ॥
गोपीनां गुणरूपैस्तु कृष्णस्य वर्द्धते सुखम् ।
सुखवृद्धिर्भवेत्तासां तत्सुखेनैव केवलम् ॥
अत एव सुखं तासां कृष्णस्य सुखपोषकम् ।
तस्मात् प्रेमणि गोपीनां कामदोषो न वर्त्तते ॥

"यथोक्तं श्रीरूपगोस्वामिना स्तवमालायां केशवाष्टके अष्टमश्लोके—

"उपेत्य पथि सुन्दरीततिभिराभिरभ्यर्च्चितं
स्मिताङ्कुरकरम्बितैर्नटदपाङ्गभङ्गीशतैः ।
स्तनस्तवकसञ्चरन्नयनचञ्चरीकाञ्चलं
व्रजे विजयिनं भजे विपिनदेशतः केशवम् ॥३५॥
अन्यत् स्वाभाविकं चिह्नं गोपीप्रेम्णोऽस्य विद्यते ।
यथायं भवति प्रेमा कामगन्धविवर्जितः ॥
पुष्णाति कृष्णमाधुर्यं गोपीप्रेमा स्वभावतः ।
वर्द्धयत्यपि सन्तुष्टः स्वयं कृष्णस्य माधुरीम् ॥
प्रेम्णो हि विषयानन्दादानन्दः स्यात्तदाश्रये ।
तस्मिन्नात्म-सुखाकाङ्क्षासम्बन्धो नास्ति लेशतः ॥

प्रेमा निरुपधिर्यत्र तत्रायं नियमः स्वतः ।
प्रेम्णो विषयसौख्येन सौख्यं वर्त्तत आश्रये ॥
हन्त्यात्मप्रेम-हर्षश्चेत् कृष्णानन्दार्थसेवनम् ।
तस्मै हर्षाय कुप्यन्ति तद्भक्ताः खिन्नमानसाः ॥

"तथाहि भक्तिरसामृतसिन्धौ पश्चिमविभागे प्रीतिभक्तिलहर्यां त्रयोविंशश्लोकः—

Bhaja Nitai Gour Radhe Syam, Japa Hare Krishna Hare Ram.

"अङ्कस्तम्भारम्भमुत्तङ्गयन्तं प्रेमानन्दं दारुको नाभ्यनन्दत्।
कंसारातेर्वीजने येन साक्षादक्षोदीयानन्तरायो व्यधायि ॥३२॥
तथाहि तत्रैव दक्षिणविभागे सात्त्विकभावलहर्यां एकोनत्रिंशश्लोके—

"गोविन्दप्रेक्षणाक्षेपि वाष्पपूराभिवर्षणम्।
उच्चैरनिन्ददानन्दमरविन्द-विलोचना ॥३३॥
कृष्णस्य प्रेमसेवाया ऋते नाददते क्वचित्।
सालोक्यादि स्वसौख्यार्थं तद्भक्ताः शुद्धचेतसः॥

"तथाहि श्रीमद्भागवते ३।२९ शाध्याये देवहूतिं प्रति कपिलवाक्यम्—
"मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥३४॥"
सालोक्य-सार्ष्टि-सामीप्य-सारूप्यैकत्वमप्युत।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥३५॥"

"तथाहि तत्रैव ९।४र्थाध्याये दुर्वाससं प्रति श्रीभगवद्वाक्यम्—
"मत्सेवया प्रतीतं ते सालोक्यादि चतुष्टयम्।
नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत् कालविप्लुतम् ॥३६॥"
विहीनः कामगन्धेन गोपीप्रेमा स्वभावजः।
निर्मलः प्रोज्ज्वलः शुद्धो दग्धजाम्बूनदोपमः॥
सहाया गुरवः सख्यः प्रेयस्यो बान्धवाः प्रियाः।
गोप्यो भवन्ति कृष्णस्य दास्यः शिष्याश्च सर्वथा॥

"तथाहि लघुभागवतामृते उत्तरखण्डे गोपीप्रेमामृते ३२ शाङ्कधृतादि-
पुराणे श्रीकृष्णवाक्यम्—

"सहाया गुरवः शिष्या भुजिष्या बान्धवाः स्त्रियः।
सत्यं वदामि ते पार्थ गोप्यः किं मे भवन्ति न ॥३७॥"

गोपिका एव कृष्णस्य मनसो वाञ्छितं विदुः।
प्रेमसेवनपर्यायं तस्य चाभीष्टमीहितम् ॥

"तथाहि लघुभागवतामृते उत्तरखण्डे गोपीप्रेमामृते ३५ शाङ्कधृतादिपुराणे श्रीकृष्णवाक्यम्—

"मन्माहात्म्यं मतसपर्यां मच्छ्रद्धां मन्मनोगतम्।
जानन्ति गोपिकाः पार्थ नान्ये जानन्ति तत्त्वतः ॥३८॥"
तासु सर्वासु गोपीषु श्रेष्ठा राधैव चाधिका।
सौभाग्येन च रूपेण प्रेम्ना च गुणसम्पदा ॥

"तथाहि लघुभागवतामृत उत्तरखण्डे भक्तामृते ४१ शाङ्कधृत-पद्मपुराणम्—

"यथा राधा प्रिया विष्णोस्तस्याः कुण्डं प्रियं तथा।
सर्वगोपीषु सैवैका विष्णोरत्यन्तवल्लभा ॥३९॥"

"तथाहि लघुभागवतामृते उत्तरखण्डे गोपीप्रेमामृते ४३ शाङ्कधृतादिपुराणेऽर्ज्जुनं प्रति श्रीकृष्णवाक्यम्—

"त्रैलोक्ये पृथिवी धन्या यत्र वृन्दावनं पुरी।
तत्रापि गोपिकाः पार्थ यत्र राधाभिधा मम ॥४०॥"
श्रीराधया सह क्रीड़ा रसवर्द्धनकारणम्।
अन्या या गोपिकाः सर्वा रसोपकरणानि ताः ॥
कृष्णस्य वल्लभा राधा कृष्णप्राणधनानि सा।
तां विना गोपिकाः सर्वा न तस्य सुखहेतवः ॥

"तथाहि श्रीगीतगोविन्दे ३।१म श्लोके जयदेववाक्यम्।

"कंसारिरपि संसारवासनाबद्धश्रृङ्खलाम्।
राधामाधाय हृदये तत्याज व्रजसुन्दरीः ॥४१॥"
तद्राधाभावमादाय चैतन्योऽवातरत् प्रभुः।
युगधर्मं तथा नामप्रेमाणौ पर्यशिक्षयत ॥

राधाभावेन वाञ्छाः स्वास्तिस्रोऽपि पर्यपूरयत ।
ता वाञ्छा अवतारस्य प्रधानतमकारणम् ॥
कृष्णचैतन्यदेवो हि व्रजेन्द्रनन्दनः स्वयम् ।
कृष्णो रसमयाकारः शृङ्गारो मूर्त्तिमानसौ ॥
तद्रसास्वादनायैव स्वावतारं चकार सः ।
तत्र रससमूहानां प्रचारोक्तानुषङ्गिकः ॥

"तथाहि श्रीगीतगोविन्दे १।११श श्लोकः—

"विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर-
श्रेणीश्यामलकोमलैरुपनयन्नङ्गै रनङ्गोत्सवम् ।
सच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि मूर्त्तिमानिव मधौ मुग्धो हरिः क्रीड़ति ॥४२॥"

कृष्णचैतन्यगोस्वामी रसानामेक आश्रयः ।
अशेषेण विशेषेण स्वादयन्निखिलान रसान ॥
प्रावर्त्तयत्तया द्वारा युगधर्मान कलौ युगे ।
एतानि सर्वमर्माणि विदुश्चैतन्यकिङ्कराः ॥
प्रभुरद्वैत आचार्यो नित्यानन्दप्रभुः स्वयम् ।
दामोदरो मुरारिश्च श्रीनिवासो गदाधरः ॥
हरिदासश्च ये भक्ताश्चैतन्यस्यापरे जनाः ।
तेषां चरणपद्मानि भक्त्या गृह्णामि मूर्द्धनि ॥
अर्थः श्लोकस्य षष्ठस्य साभासो विवृतो मया ।
अर्थः प्रकाश्यते मूलश्लोकस्य श्रूयतामयम् ॥

"तथाहि श्रीरूपगोस्वामि-कड़चोद्धृतः श्लोकः—

"श्रीराधायाः प्रणयमहिमा कीदृशो वानयैवा-
स्वाद्यो येनाद्भुतमधुरिमा कीदृशो वा मदीयः ।
सौख्यञ्चास्या मदनुभवतः कीदृशं वेति लोभा-
त्तद्भावाढ्यः समजनि शचीगर्भसिन्धौ हरीन्दुः ॥"

सिद्धान्तानां समूहोऽयं गूढो वक्तुं न युज्यते ।
न मात्रामप्यनुक्तस्य प्रष्टुं शक्नोति कश्चन ॥
अतो निगूढभावेन कथयिष्यामि किञ्चन ।
वेत्स्यन्ति रसिका भक्ता न तु मूढाः कथञ्चन ॥
येषां चेतसि चैतन्यनित्यानन्दौ विराजतः ।
एतैः सर्वैश्च सिद्धान्तैर्विन्दन्त्यानन्दमेव ते ॥
ते सिद्धान्तरसा एते सहकारस्य पल्लवाः ।
भक्तकोकिलसङ्घस्य सर्वदा वल्लभा मताः ॥
एषां गन्धो न लभ्येत यद्यभक्तकमेलकैः ।
तदा चित्ते ममानन्दः स ज्ञायेत विशेषतः ॥
यस्मै प्रकाशनाद्भीतिर्यदि जानाति नैव सः ।
इत्यतोऽन्यत परं सौख्यं विद्यते किं जगत्त्रये ॥
अतो भक्तजनान सर्वान नमस्कृत्य पुनः पुनः ।
निःशङ्कं कथयिष्यामि सर्वमस्तु चमत्कृतम् ॥
अन्तर्हृदयमध्यास्ते कृष्णस्यैका विचारणा ।
पूर्णानन्दं तथा पूर्णंरसरूपञ्च मां विदुः ॥
प्राप्नुवन्ति त्रयो लोका आनन्दं मत्त एव ते ।
यो दद्यान्मह्यमानन्दं तादृशः को जनो भुवि ॥
यस्यानन्दो ममानन्दादूवर्त्तते शतशो गुणः ।
मम चित्तं स एवैक आह्लादयितुमर्हति ॥
न सम्भवति लोकेषु यो मत्तो गुणवत्तरः ।
स जनी राधिका नूनमेकैवेति मतं मम ॥
अपि चेन्मामकं रूपं कोटिकामपराजयि ।
यस्यासमोर्द्ध्वमाधुर्यं राधारूपं तदेव तु ॥
आप्याययति मद्रूपं यद्यप्येतां जगत्त्रयीम् ।
श्रीराधादर्शनेनैव तृप्यतो नयने मम ॥

वेणुस्वरेण गीतैश्च मयैवाकृष्यते जगत् ।
राधिकावचनेनैव ह्रियेते श्रवणे मम ॥

जगत् सौरभितं सर्वं मम गन्धेन यद्यपि ।
राधाया अङ्गगन्धो मे चेतो घ्राणे च कर्षति ॥

ममैव रसमादाय त्रिलोकी सरसापि चेत् ।
राधाधररसेनैव सर्वदास्मि वशीकृतः ॥

यद्यप्ययं मम स्पर्शः कोटिचन्द्रसुशीतलः ।
राधाङ्गस्पर्शलेशो मां सुशीतलयति क्षणात् ॥

त्रिलोक्या अहमेवैवं सुखलाभाय कारणम् ।
गुणा रूपञ्च राधाया मम जीवनहेतवः ॥

एवमेव प्रतीतिर्मे तथैवानुभवोऽपि मे ।
विचार्य यदि पश्यामि भाति सर्वविपर्ययः ॥

यद्यपि तृप्यतो नेत्रे मम राधाविलोकनात् ।
मद्दर्शनसुखाद्राधा लुप्तसंज्ञा भवत्यहो ॥

कीचकस्वनमाकर्ण्य वेणुबुद्ध्यास्तचेतना ।
तमालञ्च मम भ्रान्त्या गाढमाश्लिष्य तिष्ठति ॥

कृष्णस्यालिङ्गनं प्राप्य जननं मम सार्थकम् ।
इत्येवं सुख-संमग्ना भुजाभ्यां वेष्टते तरुम् ॥

अनुकूलेन वातेन गन्धं प्राप्नोति चेन्मम ।
भवत्युत्पतितुं व्यग्रा प्रेम्नान्धीभूतलोचना ॥

सा चेत्ताम्बुलकेलां मे समास्वादयति क्वचित् ।
आनन्दसागरे मग्ना न किञ्चिद्बोद्धुमर्हति ॥

लभते सा यमानन्दं राधिका मम सङ्गमात् ।
उक्त्वा वक्तृशतेनापि तस्यान्तं सा न गच्छति ॥

लीलावसानसौख्येन तस्या या तनुमाधुरी ।
तद्दर्शनसुखेनैव विस्मृतात्मा भवाम्यहम् ॥
उभौ समरसौ स्यातामित्याह भरतो मुनिः ।
स तु नैव विजानाति व्रजस्येमं रसं मम ॥
अन्योन्यसङ्गमेनाहं सुखं यावल्लभे क्वचित् ।
तस्मादप्यधिकं राधासुखं शतगुणं भवेत् ॥

"तथाहि ललितमाधवे ९।५ श्लोकः—

"निर्धूतामृतमाधुरीपरिमलः कल्याणि बिम्बाधरो
वक्त्रं पङ्कजसौरभं कुहरितश्लाघाभिदस्ते गिरः ॥
अङ्गं चन्दनशीतलं तनुरियं सौन्दर्यसर्वस्वभाक् ।
त्वामास्वाद्य ममेदमिन्द्रियकुलं राधे मुहुर्मोदते ॥४३॥"

"तथाहि श्रीरूपगोस्वामिनोक्तम्—

"रूपे कंसहरस्य लुब्धनयनां स्पर्शेऽतिहृष्यत्त्वचं
वाण्यामुतकलितश्रुतिं परिमले संहृष्टनासापुटाम् ।
आरज्यद्रसनां किलाधरपुटे न्यञ्चन्मुखाम्भोरुहां
दम्भोद्गीर्णमहाधृतिं बहिरपि प्रोद्यद्विकाराकुलाम् ॥४४॥"

रसस्तिष्ठति मय्येकः कोऽपीति ज्ञायते मया ।
वशं करोति तञ्चापि राधिका मम मोहिनी ॥
यज्जातीयं सुखं राधा मत्तः समधिगच्छति ।
तदास्वादयितुं शश्वदुन्मुखश्चिन्तयाम्यहम् ॥
विधायापि बहून् यत्नांस्तन्नास्वादयितुं क्षमे ।
वर्द्धते हृदि लोभो मे जिघ्रतस्तत्सुखामृतम् ॥
अवतारं करोम्येव तद्रसास्वादनार्थकम् ।
तं प्रेमरसनिर्यासमास्वादयाम्यनेकधा ॥
रागमार्गेण मे भक्ता यथा भक्त्या भजन्ति माम् ।
लीलाचरणद्वारेण तथा शिक्षां ददाम्यहम् ॥

न पूरितं मयाद्यापि तदेतद्वाञ्छितत्रयम् ।
न विजातीयभावेन तदास्वाद्यं भवेदपि ॥
अनङ्गीकृत्य राधाया भावकान्ती उभे अपि ।
नास्वादयितुमर्हामि तस्यास्तत्त्रिविधं सुखम् ॥
अङ्गीकृत्यैव राधाया भावं कान्तिञ्च सर्वथा ।
ततसुखत्रितयास्वादहेतोरवतराम्यहम् ॥
यदैवं निश्चयं कृष्णः कृतवान् सर्वभावतः ।
युगावतारकालोऽपि तदैव समुपस्थितः ॥
श्रीमानद्वैत आचार्यस्तदाराधनमाचरत् ।
तस्य हुङ्कार आकर्षत् कृष्णं तं परमेश्वरम् ॥
अवतार्याग्रतः सर्वान् मातरं पितरं गुरून् ।
भाववर्णौ च राधाया अङ्गीकुर्वन् स्वयं हरिः ॥
नवद्वीपे शचीगर्भाद्विशुद्धाद्दुग्धसागरात् ।
प्रादुर्भूतोऽभवत् कृष्णः पूर्णमण्डलचन्द्रमाः ॥
ध्यायन् स्वरूपगोस्वामिश्रीमत्पादसरोरुहम् ।
व्याख्यातवानहं षष्ठश्लोकस्यार्थं यथामति ॥
अस्य श्लोकद्वयस्यार्थं यथा व्याख्यातवानहम् ।
तत्र श्रीरूपगोस्वामिश्लोकः प्रामाण्यमर्हति ॥

तथाहि स्तवमालायां श्रीचैतन्यदेवस्य द्वितीयस्तवे तृतीयश्लोकः—

"अपारं कस्यापि प्रणयिजनवृन्दस्य कुतुकी
रसस्तोमं हृत्वा मधुरमुपभोक्तुं कमपि यः ।
रुचं स्वामावव्रे द्युतिमिह तदीयां प्रकटयन्
स देवश्चैतन्याकृतिरतितरां नः कृपयतु ॥"
"मङ्गलाचरणं कृष्णचैतन्यतत्त्वलक्षणम् ।
प्रयोजनञ्चावतारे श्लोकषट्कैर्निरूपितम् ॥४५॥

य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स कृष्णदास आह श्रीचैतन्यचरितामृतम् ॥

इति श्रीचैतन्यचरितामृत आदिखण्डे चैतन्यावतारसामान्य-
कारणं नाम चतुर्थपरिच्छेदः ।

पञ्चमः परिच्छेदः

"वन्देऽनन्ताद्भुतैश्वर्यं श्रीनित्यानन्दमीश्वरम् ।
यस्येच्छया तत्स्वरूपमज्ञेनापि निरूप्यते ॥१॥"
जयति जयति शश्वत् कृष्णचैतन्यदेवो
जयति जयति नित्यानन्ददेवः सदैव ।
जयति जयति नित्यं श्रीमदद्वैतचन्द्रो
जगति च विजयन्तां श्रीलगौराङ्गभक्ताः ॥
कृष्णचैतन्यमाहात्म्यं षष्ठश्लोकेन वर्णितम् ।
पञ्चश्लोक्याधुना नित्यानन्दतत्त्वं निरूप्यते ॥
कृष्णः सर्वावतारीति स स्वयं भगवानिति ।
तस्य श्रीबलरामाख्यो द्वितीयः खलु विग्रहः ॥
एकत्वेऽपि स्वरूपस्य देहाभ्यामेव भिन्नता ।
तस्य लीलासहायश्च कायव्यूहोऽयमादिमः ॥
सोऽयं कृष्णो नवद्वीपे श्रीमच्चैतन्यचन्द्रमाः ।
तेन श्रीबलरामेण नित्यानन्देन सङ्गतः ॥

"तथाहि श्रीरूपगोस्वामिकड़चायाः श्लोकः—

"सङ्कर्षणः कारणतोयशायी
गर्भोदशायी च पयोब्धिशायी ।
शेषश्च यस्यांशकलाः स नित्या-
नन्दाख्यरामः शरणं ममास्तु ॥२॥

श्रीबलरामगोस्वामी मूलं सङ्कर्षणो हि सः ।
गृहीत्वा पञ्चरूपाणि कुरुते कृष्णसेवनम् ॥
साहाय्यं कृष्णलीलायां सर्वमाचरति स्वयम् ।
अन्यैर्देहैश्चतुर्भिः स सृष्टिलीलां करोति च ॥
सर्वाः सृष्ट्यादिकाः सेवास्तस्याज्ञाप्रतिपालनम् ।
कुरुते शेषरूपेण विविधं कृष्णसेवनम् ॥
सर्वैं रूपैश्च भुङ्क्तेऽसावानन्दं कृष्णसेवनात् ।
चैतन्येन समं रामः स नित्यानन्दरूपतः ॥
करिष्ये सप्तमश्लोकं चतुःश्लोक्या स्फुटार्थकम् ।
सर्वैर्विज्ञास्यते तत्त्वं नित्यानन्दप्रभोर्यया ॥

"तथाहि श्रीरूपगोस्वामिकड़चायाः श्लोकः—

"मायातीते व्यापिवैकुण्ठलोके पूर्णैश्वर्ये श्रीचतुर्व्यूहमध्ये ।
रूपं यस्योद्भाति सङ्कर्षणाख्यं तं श्रीनित्यानन्दरामं प्रपद्ये ॥

अतीतं प्रकृतेर्धाम परव्योमाभिधानकम् ।
विभुत्वादिगुणैर्युक्तं श्रीकृष्णविग्रहो यथा ॥
सर्वगं विभु चानन्तं वैकुण्ठादिकधाम तत् ।
कृष्ण-कृष्णावताराणां तद्विश्रामनिकेतनम् ॥
उपर्यस्ति परव्योम्नः कृष्णलोक इति श्रुतम् ।
द्वारका मथुरा नाम गोकुलञ्चेति स त्रिधा ॥
सर्वोपरितमं श्रीमद्गोकुलं व्रजधाम यत् ।
श्वेतद्वीपश्च गोलोको वृन्दावनमिति प्रथा ॥
कृष्णविग्रहतुल्यं तदनन्तं सर्वगं विभु ।
उपर्यधश्च सर्वत्र व्याप्यास्ते नियमं विना ॥
ब्रह्माण्डेऽपि प्रकाशः स्यात्तस्य कृष्णेच्छया पुनः ।
स्वरूपेण तदेवैकं नहि कायद्वयं भवेत् ॥

चिन्तामणिमयी भूमिः कल्पवृक्षमयं वनम् ।
प्रपञ्चवन्निरीक्षन्ते जनास्तच्चर्मचक्षुषा ॥
सप्रेमचक्षुषामग्रे तत्स्वरूपं प्रकाशते ।
सार्द्धं गोपैश्च गोपीभिर्यत्र कृष्णो विराजते ॥

"तथाहि ब्रह्मसंहितायाः ५।२९ श्लोकः—

"चिन्तामणिप्रकरसद्मसु कल्पवृक्ष-
लक्षावृतेषु सुरभीरभिपालयन्तम् ।
लक्ष्मीसहस्रशतसम्भ्रमसेव्यमानं
गोविन्दमादिपुरुषं तमहं भजामि ॥४॥"

मथुराद्वारकापुर्योर्निजरूपं प्रकाशयन् ।
चतुर्व्यूहीभवन् कृष्णो बहुधा विलसत्यसौ ॥
वासुदेवस्ततः सङ्कर्षणः प्रद्युम्न एव च ।
अनिरुद्धश्च ते सर्वे चतुर्व्यूहान्तरांशिनः ॥
सर्वोपाधिविनिर्मुक्ता मायालेशविवर्जिताः ।
विशुद्धाश्च तुरीयाश्च चतुर्व्यूहाः प्रकीर्तिताः ॥
एतेषु त्रिषु लोकेषु कृष्णो लीलामयः परम् ।
स्वीयैः परिकरैः स द्वंमनन्तं क्रीड़ति स्वयम् ॥
परव्योमनि रूपं स्वमेकं कृष्णः प्रकाशयन् ।
श्रीनारायणरूपेण नाना लीलाः करोत्यसौ ॥
कृष्णस्य द्विभुजो ह्येव विग्रहः स्यात् स्वरूपतः ।
श्रीनारायणरूपेण स एव स्याच्चतुर्भुजः ॥
शङ्ख-चक्र-गदा पद्म-महैश्वर्यमयः सदा ।
सेवन्ते तस्य पादाब्जं श्रीभूलीलाख्यशक्तयः ॥
अपि चेद्धर्मं एवैकस्तस्य क्रीड़ा हि केवलम् ।
तथापीयन्ति कर्माणि कुर्य्याज्जीवानुकम्पया ॥

सार्ष्टि-सालोक्य-सामीप्य-सारूप्याख्याः समर्पयन।
मुक्तीश्चतुर्विधा जीवान् संसारात्तारयेदसौ ॥
ब्रह्मसायुज्यमुक्तानां नास्ति तत्र गतिः किल ।
वहिरेव हि वैकुण्ठात्तेषां भवति संस्थितिः ॥
वैकुण्ठाद्बहिरस्त्येकं यज्ज्योतिर्मयमण्डलम् ।
कृष्णस्याङ्गप्रभा तद्धि दीप्यते परमोज्ज्वलम् ॥
अतीतं प्रकृतेस्तत्तु सिद्धलोकाभिधानकम् ।
चितस्वरूपं न तत्रास्ति चिच्छक्तेर्विकृतिः क्वचित् ॥
निर्विशेषं यथा भाति बहिः सूर्य्यस्य मण्डलम् ।
सूर्य्यस्यान्तस्तु दीप्यन्ते सविशेषा रथादयः ॥
चिच्छक्तेः परमव्योम्नि विलासा बहवस्तथा ।
निर्विशेषं बहिर्ज्योतिर्विम्बं शश्वत् प्रकाशते ॥
निर्विशेषं हि तद्ब्रह्म ज्योतिर्मयमशेषतः ।
सायुज्यमुक्तिमासाद्य तत्रैव लभते लयम् ॥

"तथाहि भक्तिरसामृतसिन्धौ साधनभक्तिलहर्य्यां ११० माङ्कधृत-ब्रह्माण्डपुराणम् —

"सिद्धलोकास्तु तमसः पारे यत्र वसन्ति हि ।
सिद्धा ब्रह्मसुखे मग्ना दैत्याश्च हरिणा हताः ॥५॥
तस्मिन्नेव परव्योम्नि नारायणसमन्ततः ।
द्वारकास्थचतुर्व्यूहप्रकाशान्तरमस्ति हि ॥
द्वितीयास्ते चतुर्व्यूहा वासुदेवादयः पुनः ।
सुविशुद्धास्तुरीयास्ते द्वारकायामिवासते ॥
तत्र यो रामरूपोऽसौ महासङ्कर्षणः स्मृतः ।
आश्रयः स हि चिच्छक्त्या जगत्कारणकारणम् ॥
विलासो यश्च चिच्छक्त्याः शुद्धसत्त्वाभिधानकः ।
शुद्धसत्त्वमयं तावद् वैकुण्ठादिकधाम तत् ॥

षड़ैश्वर्य्याणि तत्रापि चिन्मयान्यखिलानि च ।
सङ्कर्षणविभूतिः सा निश्चयेनावगम्यताम् ॥
जीवो नाम तटस्थाख्या शक्तिर्या विद्यतेऽपरा ।
महासङ्कर्षणोऽसौ तत्-सर्वजीवसमाश्रयः ॥
यस्मादुत्पद्यते विश्वं यस्मिंश्च प्रविलीयते ।
तस्यापि पुरुषस्यासौ श्रीसङ्कर्षण आश्रयः ॥
अपारैश्वर्य्य आश्चर्य्यमयः सर्वाश्रयश्च सः ।
महिमानमनन्तोऽपि वदितुं यस्य न क्षमः ॥
तुरीयं शुद्धसत्त्वं यच्छ्रीसङ्कर्षणसंज्ञकम् ।
तद् यस्यांशो भवेन्नित्यानन्दरामः स कथ्यते ॥
संक्षेपेणाष्टमः श्लोकः स्फुटार्थो विवृतो मया ।
श्रूयतां नवमश्लोकस्याधुनार्थोऽवधानतः ॥

"तथाहि श्रीरूपगोस्वामि-कड़चायाः श्लोकः—

"मायाभर्त्ताजाण्डसंघाश्रयाङ्गः शेते साक्षात्कारणाम्भोधिमध्ये ।
यस्यैकांशः श्रीपुमानादिदेवस्तं श्रीनित्यानन्ददेवं प्रपद्ये ॥९॥

अस्ति ज्योतिर्मयं धाम वैकुण्ठाद्बहिरेव यत् ।
स कारणार्णवो नाम ततोऽपि वर्त्तते बहिः ॥
वैकुण्ठं परितो वृत्वा योऽयं कारणवारिधिः ।
अनन्तः पारहीनोऽसौ नावधिस्तस्य विद्यते ॥
वैकुण्ठस्य पृथिव्यादि चिन्मयं भूतपञ्चकम् ।
तत्र मायिकभूतानि जायन्ते न कदाचन ॥
चिन्मयैर्वारिभिः पूर्णः परमः कारणार्णवः ।
एका वारिकणा यस्य गङ्गा पतितपावनी ॥
सोऽयं सङ्कर्षणो देवस्तत्रैव कारणार्णवे ।
एकेन स्वात्मनोऽंशेन शयानो वर्त्ततेऽनिशम् ॥

Bhaja Nitai Gour Radhe Syam, Japa Hare Krishna Hare Ram.

महत्तत्त्वस्य स्रष्टासौ जगतामपि कारणम् ।
अवतारः स एवाद्यो मायां प्रति स ईक्षते ॥
बहिस्तत्कारणाम्भोधेर्मायाशक्तिर्विराजते ।
मायाशक्तिर्न शक्नोति स्प्रष्टुं कारणवारिधिम् ॥
एतस्या एव मायाया द्विविधावस्थितिर्मता ।
जगतीनामुपादानं प्रधानं प्रकृतिश्च सा ॥
जगतां कारणं नैव प्रकृतिर्या जड़ात्मिका ।
शक्तिं सञ्चारयन् कृष्णस्तस्यां वितनुते कृपाम् ॥
प्रकृतिः कृष्णशक्त्यैव गौणं भवति कारणम् ।
अग्निशक्त्या यथा लौहं क्षमते दाहकर्मणे ॥
अत एव भवेत् कृष्णो जगतां मूलकारणम् ।
अजागलस्तनो यद्वत् प्रकृतिः कारणं भवेत् ॥
यदुच्येत प्रकृत्यंशो माया निमित्तकारणम् ।
तच्च न स्याद् यतो हेतुः कर्त्ता नारायणो भवेत् ॥
कुम्भकारो हि कुम्भस्य यथा निमित्तकारणम् ।
स्यात् पुरुषावतारो हि जगतः कारणं तथा ॥
कृष्णः कर्त्तैव माया तु कुरुते तत्सहायताम् ।
कुम्भस्य दण्डचक्रादिरुपायः कारणं यथा ॥
अवधत्ते हि मायायां दूरादेव तु पूरुषः ।
तथैव वीर्य्यमाधत्ते जीवरूपञ्च तत्र सः ॥
अङ्गाभासो यदा तस्य युक्तो भवति मायया ।
ब्रह्माण्डानां गणस्तस्या मायाया जायते तदा ॥
अनन्ता गणनातीता यावन्तोऽण्डगणाश्च ते ।
तावद्भिः पुरुषा रूपैः सर्वतः प्रविशत्यपि ॥
यदा पुरुषनासाया निःश्वासो बहिरायते ।
ब्रह्माण्डानि प्रकाशन्ते निःश्वासेन समं तदा ॥

पुनरेव यदा श्वासः प्रविशत्यन्तरे तदा।
ब्रह्माण्डानि विशन्त्येव तेन पुरुषविग्रहम् ॥
गवाक्षाणां यथा रन्ध्रे चलन्ति त्रसरेणवः।
पूरुषरोमकूपेषु ब्रह्माण्डानां गणास्तथा ॥

'तथाहि ब्रह्मसंहितायां ५।५४ श्लोकः—

"यस्यैक-निःश्वसितकालमथावलम्ब्य
जीवन्ति लोम-विलजा जगदण्डनाथाः।
विष्णुर्महान् स इह यस्य कलाविशेषो
गोविन्दमादिपुरुषं तमहं भजामि ॥७॥"

तथाहि श्रीमद्भागवते १०।१४।११

"क्वाहं तमोमहदहं-खचराग्निवार्भू-
संवेष्टिताण्डघट-सप्त-वितस्ति-कायः।
क्वेदृग्विधाविगणिताण्ड-पराणुचर्य्यं-
वाताध्व-रोम-विवरस्य च ते महित्वम् ॥८॥"
भवेदंशस्य योऽंशोऽसौ कला नामाभिधीयते।
गोविन्दप्रतिमूर्त्तिः स श्रीबलराम उच्यते ॥
स्वरूपमेकमस्यैव महासङ्कर्षणः प्रभुः।
तस्यांशः पुरुषो नाम कलेति परिगण्यते ॥
कलेति कथ्यते योऽसौ महाविष्णुः स कथ्यते।
स महापुरुषो नामावतारी सर्वजित्वरः ॥
यौ द्वौ क्षीरोद-गर्भोदशायिनौ पुरुषौ मतौ।
तौ यस्यांशौ स एवायं विष्णुर्विश्वसमाश्रयः ॥

"तथाहि श्रीमद्भागवते १।६।४० श-श्लोके श्रीधरस्वामिकृतव्याख्यायां तथा लघुभागवतामृते पूर्वखण्डेऽवतारप्रकरणे नवमाङ्कधृतञ्च सात्वत-तन्त्रम्—

"विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः।
एकन्तु महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम्।
तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते ॥६॥"
यद्यपि प्रोच्यते शास्त्रैः श्रीकृष्णस्य कलेत्यसौ।
मत्स्यकूर्मावताराणामवतारी स एव तु॥

तथाहि श्रीमद्भागवते १।३।२८

"एते चांशकलाः पुंसः कृष्णस्तु भगवान स्वयम्।
इन्द्रारिव्याकुलं लोकं मृड़यन्ति युगे युगे॥"
सृष्टिस्थिति-विनाशानां कर्त्ता स एव पूरुषः।
कर्त्ता नानावताराणां भर्त्ता च जगतामसौ॥
सृष्ट्यादीनां कृते दृष्टिर्यत्रांशे पतति प्रभोः।
तस्यैवांशस्य नाम स्यादवतार इति स्मृतम्॥
स एवाद्योऽवताराणां भगवान् श्रेष्ठपुरुषः।
बीजं सर्वावताराणां सर्वेषामाश्रयाश्रयः॥

"तथाहि श्रीमद्भागवते २।६ अध्याये विंशादिश्लोकेषु नारदं प्रति ब्रह्मवाक्यम्—

"आद्योऽवतारः पुरुषः परस्य
कालः स्वभावः सदसन्मनश्च।
द्रव्यं विकारो गुण इन्द्रियाणि
विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः॥
अहं भवो यज्ञ इमे प्रजेशा
दक्षादयो ये भवदादयश्च।
स्वर्लोकपालाः खगलोकपाला
नृलोकपालास्तललोकपालाः॥
गन्धर्व-विद्याधर-चारणेशा
ये यक्षरक्षोरगनागनाथाः।

ये वा ऋषीणामृषभाः पितॄणां
दैत्येन्द्र-सिद्धेश्वर-दानवेन्द्राः ॥
अन्ये च ये प्रेतपिशाचभूत-
कुष्माण्डयादोमृगपक्ष्यधीशाः ।
यत् किञ्च लोके भगवन्महस्व-
दोजः सहस्वद्बलवत् क्षमावत ।
श्रीह्रीविभूत्यात्मवदद्भुतार्णं
तत्त्वं परं रूपवदस्वरूपम् ॥१०॥"

तत्रैव १।३।१

"जगृहे पौरुषं रूपं भगवान महदादिभिः ।
सम्भूतं षोड़शकलमादौ लोकसिसृक्षया ॥११॥
अस्ति तत्रैव संसारः सर्वेषामाश्रयोऽपि सः ।
तस्यान्तरात्मरूपस्य जगदेवाश्रयो भवेत् ॥
आधाराधेयसम्बन्धस्तत्प्रकृत्योः परस्परम् ।
तथापि प्रकृतेस्तत्र स्पर्शगन्धो न विद्यते ॥

"तथाहि श्रीमद्भागवते १।११।३४

"एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः ।
न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रया" ॥
गीतायामपि भूयस्यो वर्त्तन्त इत्थमुक्तयः ।
सर्वदा भगवत्तत्त्वमचिन्तनीयशक्तिकम् ॥
ब्रह्माण्डेष्ववतिष्ठेऽहं मयि तिष्ठन्ति तान्यपि ।
ब्रह्माण्डेषु न तिष्ठामि मयि सन्ति न तानि च ॥
अचिन्त्यमेतदैश्वर्य्यं मम जानीहि निश्चितम् ।
इत्यर्थ एष गीताया अनेनैव प्रचारितः ॥
पुरुषः सोऽयमेवैवं यस्यांश इति कथ्यते ।
श्रीनित्यानन्दरामोऽसौ श्रीचैतन्येन सङ्गतः ॥

अयञ्च नवमः श्लोकः सार्थको विवृतो मया।
श्रूयतामवधानेन दशमं विवृणोम्यहम् ॥

"तथाहि श्रीरूपगोस्वामि-कड़चायाः श्लोकः

यस्यांशांशः श्रीलगर्भोदशायी
यन्नाभ्यब्जं लोकसङ्घातनालम्।
लोकस्रष्टुः सूतिकाधाम धातु
स्तं श्रीनित्यानन्दरामं प्रपद्ये ॥१३॥"

ब्रह्माण्डानामनन्तानां कृत्वा सृष्टिं स पूरुषः।
गृहीत्वा च बहूमूर्त्तीः सर्वाण्डानि प्रविष्टवान ॥
अन्तः प्रविश्य सोऽपश्यदखिलं तमसावृतम्।
तत्रालब्धावकाशोऽसौ मनसैव व्यतर्कयत् ॥
निजाङ्गात् स्वेदवारीणि स ततो निरसारयत।
स्वेदवारिभिरेवासौ ब्रह्माण्डार्द्धमपूरयत ॥
ब्रह्माण्डस्य प्रमाणं हि पञ्चाशत्कोटियोजनम्
समानायामविस्तारं तदर्द्धं पूरितं जलैः ॥
अकल्पयन्निजावासं तेषु स स्वेदवारिषु।
कृतवानपरार्द्धस्य भुवनानि चतुर्दश ॥
निजस्य धाम वैकुण्ठं तत्रैवाविश्चकार सः।
शय्यारूपजले शेषो विश्रामं स्वयमग्रहीत ॥
पुरुषोऽनन्तशय्यायां शयनं कृतवांस्ततः।
सहस्रं तस्य शीर्षाणि सहस्रं वदनानि च।
हस्ता नेत्राणि पादाश्च तस्य सर्वं सहस्रशः।
सर्वावतारबीजं स जगतां कारणं मतः ॥
तस्य नाभिसरोजात्तु पद्ममेकं समुत्थितम्।
पद्मं तदेव संवृत्तं जन्मस्थानं प्रजापतेः ॥

तत्र पद्मनालतोऽभूवन् भुवनानि चतुर्द्दश ।
तत्र ब्रह्मा समुत्पद्य सृष्टिकर्म करोति च ॥
विधत्ते विष्णुरूपेण जगतः परिपालनम् ।
किन्तु विष्णुर्गुणातीतो न स्पृष्टो मायिकैर्गुणैः ॥
रुद्ररूपं समादाय जगत् संहरति प्रभुः ।
सृष्टिस्थितिविनाशाश्च सम्भवन्ति यदिच्छया ॥
जीवान्तर्यामिरूपेण जगतां स हि कारणम् ।
अंशैर्यस्य विराड् रूपं सुधीभिः परिकल्प्यते ॥
यस्य नारायणः सोऽयमंशस्याप्यंश एव हि ।
नित्यानन्दप्रभुः सोऽयं भवेत् सर्वशिरोमणिः ॥
श्लोकस्य दशमस्यार्थो विवृतोऽयं मयाधुना ।
श्लोकस्यैकादशस्यार्थः श्रूयतामवधानतः ॥

"तथाहि श्रीरूपगोस्वामि-कड़चायाः श्लोकः

"यस्यांशांशः परमात्माखिलानां
पोष्टा विष्णुर्भाति दुग्धाब्धिशायी ।
क्षौणीभर्त्ता यत्कला सोऽप्यनन्त-
स्तं श्रीनित्यानन्दरामं प्रपद्ये ॥१४॥"

धरणी नाभिनालान्तर्गता नारायणस्य तु ।
धरण्या अन्तरे सप्त गण्यन्ते सागरा अपि ॥
तेषु क्षीरोदधेरन्तः श्वेतद्वीपोऽस्ति नाम यः ।
स हि पालयितुर्विष्णोर्निजधामेति कीर्त्त्यते ॥
तत्रासौ सर्वजीवानामन्तर्यामि स्वरूपतः ।
भूत्वास्ते पृथिवीस्वामी पृथिव्याः परिपालकः ॥
कृत्वा नानावतारान स युगमन्वन्तरादिषु ।
प्रतिष्ठापयते धर्ममधर्मञ्च व्यपोहति ॥

इच्छन्तोऽपि यदा देवा न लभन्तेऽस्य दर्शनम् ।
तदा क्षीरोदधेस्तीरं समासाद्य स्तुवन्ति तम् ॥
अवतीर्य विधत्तेऽसौ जगतः पालनं ततः ।
अनन्तं वैभवं तस्य संख्यातुं नैव शक्यते ॥
अंशांशांशो भवेद् यस्य विष्णुरित्यभिधानकः ।
नित्यानन्दः स्वयं सोऽयं सर्वेषामुत्तमोत्तमः ॥
स विष्णुः शेषरूपेण बिभ्रत् स्वशिरसा धराम् ।
कुत्रांशे शिरसः सास्ति धरेति नावगम्यते ॥
सुविस्तीर्णफणाभोगसहस्रं यस्य वर्त्तते ।
देदीप्यते मणिश्रेणिर्जितभास्करदीधितिः ॥
पृथिवी यस्य पञ्चाशत्कोटियोजनविस्तृता ।
क्षुद्रसर्षपवद्भाति फणाया एकदेशतः ॥
स एवानन्तशेषो हि भक्तावतार उच्यते ।
नान्यत् किञ्चित् स जानाति भगवत्सेवनं विना ॥
कालं निरवधिं यावद् गायन् कृष्णगुणावलीम् ।
सहस्रेणापि तुण्डैः स तस्या अन्तं न गच्छति ॥
तन्मुखाद् भगवद्भक्ताः शृण्वन्ति सनकादयः ।
गुणान् भगवतो गायन् प्रेमानन्दे स मज्जति ॥
शयनं पादुके छत्रमुपाधानानि वाससी ।
आरामावसथौ यज्ञसूत्रं सिंहासनं तथा ॥
इतीयन्ति स्वरूपाणि कृत्वा कृष्णं निषेवते ।
स कृष्णाच्छेषतां प्राप्य शेष इत्यभिधीयते ॥
अयं सोऽनन्तदेवोऽपि यस्यैका कथ्यते कला ।
नित्यानन्दप्रभोस्तस्य को लीलामवगच्छति ॥
नित्यानन्दस्वरूपं तत् प्रमाणैरेभिराप्यते ।
तं प्रत्यनन्त इत्युक्ते तस्य को महिमा भवेत् ॥

अथवा भक्तवाक्यं तत् सत्यमेवेति मन्यते ।
यत् सोऽवतार्यनन्तस्य तत्र तन्नाम युज्यते ॥
ज्ञायते यद्भिन्नत्वमवतारावतारिणोः ।
पूर्वं केचित् स्वयं कृष्णं मेनिरेऽन्यविधं यथा ॥
नरनारायणः साक्षात् कृष्ण इत्याह कश्चन ।
साक्षाद्वामन एवासीदित्याहुरपरे जनाः ॥
क्षीरोदशायिनः कृष्णोऽवतार इति केचन ।
सर्वेषां वचनं सत्यं नात्र कश्चिदसम्भवः ॥
स सर्वांशाश्रयं कृष्णो यदावतरति स्वयम् ।
अंशाः सर्वेऽपि कृष्णेन सङ्गच्छन्ते समं तदा ॥
ये यथा तं विजानन्ति ते तथैव वदन्ति तम् ।
सर्वं हि युज्यते कृष्णे न भवेत् किञ्चनानृतम् ॥
अतः श्रीकृष्णचैतन्यगोस्वामी प्रभुराचरन् ।
लीलां सर्वावताराणां सर्वेभ्यः समदर्शयत् ॥
नित्यानन्दोऽप्यनन्तस्य तथाविर्भावकारणम् ।
श्रीचैतन्यस्य दासोऽहमिति तद्भावतोऽब्रवीत् ॥
कदाचिद् गुरुरूपेण सख्येन भृत्यभावतः ।
त्रिभिर्भावैर्यथा लीलां चकारासौ पुरा व्रजे ॥
कृष्णं वृषायमाणोऽसौ शीर्षाशीर्षि न्ययोधयत् ।
जातु कृष्णोऽकरोत्तस्य पादसंवाहनं मुदा ॥
मन्वानो भृत्यमात्मानं कृष्णं प्रभुमबुध्यत ।
कलां कलायाः कृष्णस्य स आत्मानममन्यत ॥

"तथाहि श्रीमद्भागवते १०।११।२१—

"वृषायमाणौ नर्दन्तौ युयुधाते परस्परम् ।
अनुकृत्य रुतैर्जन्तूंश्चेरतुः प्राकृतौ यथा ॥१५॥"

''तथाहि तत्रैव १५।१३—

''क्वचित् क्रीड़ापरिश्रान्तं गोपोत्सङ्गोपवर्हणम्।
स्वयं विश्रामयत्यार्यं पादसंवाहनादिभिः ॥१६॥''

तथाहि तत्रैव १३।३४

''केयं वा कुत आयाता दैवी वा नार्य्युतासुरी।
प्रायो मायास्तु मे भर्त्तुर्नान्या मेऽपि विमोहिनी ॥१७॥

''तत्रैव ६८।२६—

''यस्याङ्घ्रि पङ्कजरजोऽखिललोकपालै-
र्मौल्युत्तमैर्धृतमुपासिततीर्थतीर्थम्।
ब्रह्मा भवोऽहमपि यस्य कलाः कलायाः
श्रीश्चोद्वहेम चिरमस्य नृपासनं क्व ॥१८॥''
एक एवेश्वरः कृष्णः सर्वेऽन्ये तस्य किङ्कराः।
नर्त्तयति यथासौ यं स तथैव हि नृत्यति ॥
एकश्चैतन्यगोस्वामी तथैव भवतीश्वरः।
अन्ये च पार्षदाः सर्वेऽथवा केचन किङ्कराः ॥
नित्यानन्दस्तथाद्वैताचार्यो गुरुगणेष्विमौ।
श्रीवासाद्याश्च यावन्त आर्या वालघवः समाः ॥
सर्वे पारिषदास्तस्य लीलायां तत्सहायकाः।
सर्वानादाय गौराङ्गः स्वानि कर्माण्यसाधयत् ॥
नित्यानन्दस्तथाद्वैत आचार्यो द्वे तदङ्गके।
द्वाभ्यामाभ्यां विधत्तेऽसौ रङ्गलीलाश्च तावतीः ॥
प्रभुरद्वैत आचार्यो गोस्वामी स्वयमीश्वरः।
इमं मेने गुरुं गौर आत्मानञ्चास्य किङ्करम् ॥
आचार्यस्वामिनस्तत्त्वं व्यक्तं वक्तुं न शक्यते
योऽतारयज्जगज्जीवान् श्रीकृष्णमवतारयन् ॥

नित्यानन्दप्रभुः पूर्वं त्रेतायां लक्ष्मणोऽभवत् ।
अनुजो रामचन्द्रस्य भूत्वा तं पर्यषेवत ॥
रामस्य चरितं सर्वं दुःखवैचित्र्यसङ्कुलम् ।
लीलायां तत्स्वतन्त्रत्वात् सोढ़वांल्लक्ष्मणो बहु ॥
न स वारयितुं ज्येष्ठमशक्तोल्लक्ष्मणोऽनुजः ।
विनयावनतस्तूष्णीं सेहे कृच्छ्राणि चेतसा ॥
स कृष्णस्यावतारोऽभूज्ज्यायान् सेवितुमिच्छया ।
नानाविधसुखास्वादं कृष्णेनाकारयत् स्वयम् ॥
श्रीरामलक्ष्मणावंशविशेषौ कृष्णरामयोः ।
कृष्णावतारकाले तावुभौ प्राविशतामुभौ ॥
तत्तदंशग्रहाज्ज्येष्ठकनिष्ठन्मन्यता द्वयोः ।
अंशांशिरूपतो व्याख्या सर्वशास्त्रेषु दृश्यते ॥

"तथाहि ब्रह्मसंहितायां ५।५९—

"रामादिमूर्त्तिषु कलानियमेन तिष्ठ-
न्नानावतारमकरोद्भुवनेषु किन्तु ।
कृष्णः स्वयं समभवत् परमः पुमान् यो
गोविन्दमादिपुरुषं तमहं भजामि ॥१६॥"

श्रीचैतन्यः स्वयं कृष्णो नित्यानन्दः स्वयं बलः ।
श्रीचैतन्यस्य सर्वेच्छा नित्यानन्देन पूरिता ॥
नित्यानन्दस्य माहात्म्यमपारानन्तमब्धिवत् ।
यत् स्पृशामि कणामात्रं तत्तस्यैव कृपाफलम् ॥
तस्य कारुण्यमाहात्म्यमन्यदाकर्ण्यतामिदम् ।
अधमो मादृशो जीव ऊर्द्ध्वसीमामनीयत ॥
वेदगुह्य उदन्तोऽयं वदितुं नैव युज्यते ।
तत्कृपां व्यक्तमाख्यातुं तथापि कथयाम्यहम् ॥

क्षम्यतामपराधो मे हे नित्यानन्द मत्प्रभो ।
मयोल्लासवशादत्र लिख्यते त्वदनुग्रहः ॥
नित्यानन्दावधूतस्य प्रेमिकः कोऽपि किङ्करः ।
रामदासः स नाम्नाभून्मीनकेतनपूर्वकः ॥
सङ्कीर्त्तनमहोरात्रमेकदासीन्ममालये ।
मया निमन्त्रितस्तत्र स एत्य समुपस्थितः ॥
महाप्रेममयः सोऽयं चत्वरे समुपाविशत् ।
तस्य पादाववन्दन्त तत्रत्याः सर्ववैष्णवाः ॥
नमतः कतमस्यापि पृष्ठमारूढ़ आस्त सः ।
प्रेम्णा कांश्चिदहन् वंश्या चपेटैरपि कांश्चन ॥
तस्याश्रूण्यदिदृक्षन्त येन नेत्रेण ये जनाः ।
अविच्छिन्नाश्रुधाराभिस्तेषां तच्चाप्यसिच्यत ॥
रोमाञ्चाः पर्यलक्ष्यन्त तदङ्गे जातु कुत्रचित् ।
एकत्रावयवे जाड्यमन्यस्मिन्नपि वेपथुः ॥
नित्यानन्द इति प्रोच्चैर्हुङ्कारमकरोद् यदा ।
तद्दर्शनेन लोकानामभवद् विस्मयो महान् ॥
श्रीगुणार्णवमिश्राख्यः कश्चिदार्यो द्विजोत्तमः ।
श्रीविग्रहस्य सोऽकार्षीत् सेवाकर्माणि नित्यशः ॥
प्राङ्गणे स उपस्थाय नैव तं समभाषत ।
रामदासस्तु तद्वीक्ष्य सक्रोधमिदमब्रवीत् ॥
मन्यतेऽयं द्वितीयो हि सूतः श्रीरोमहर्षणः ।
बलराममपि प्रेक्ष्य यो न प्रत्युत्थितः पुरा ॥
इत्युक्तानन्दसम्मूढ़ो गायन्नुच्चैर्ननर्त्त सः ।
विप्रोऽपि नाकरोद्रोषं स हि कृष्णमसेवत ॥
मदनुग्राहके रामदासे च गमनोद्यते ।
उत्सवान्ते मम भ्रात्रा तस्य तर्कः समुत्थितः ॥

भ्रातुर्मे कृष्णचैतन्ये विश्वासः सुदृढ़ः स्थितः ।
विश्वासाभास एवासीन्नित्यानन्दप्रभुं प्रति ॥
श्रुत्वैतद्रामदासस्य हृदि दुःखमजायत ।
उक्तवानहमेवं तं भ्रातरं बहु भर्त्सयन ॥
तावुभौ भ्रातरौ तुल्यप्रकाशावेकविग्रहौ ।
नित्यानन्दममन्वानो लप्स्यसे त्वममङ्गलम् ॥
एकस्मिंस्तव विश्वासो नापरं बहुमन्यसे ।
एषोऽर्द्धकुक्कुटीन्यायः प्रमाणाभास एव ते ॥
पाषण्डोऽस्यथवा त्वं यदुभयं नापि मन्यसे ।
द्वयोरेकत्र सम्मानोऽपरस्मिन्नेति भण्डता ॥
रामदासस्ततः क्रुद्धो वंशीं भङ्क्त्वा गतो यदा ।
तस्मिन्नवसरे भ्रातुरभून्महदमङ्गलम् ॥
इत्येवं सेवकस्यापि प्रभावस्तस्य कीर्त्तितः ।
अन्यः स्वभावकारुण्यवृत्तान्तः कथ्यते मया ॥
कटुवाग्भिः कनीयांसमहं भर्त्सितवानिति ।
तस्यां रात्रौ प्रभुः स्वप्ने मम सन्दर्शनं ददौ ॥
नवहट्टान्तिके ग्रामे झामटपुरनामके ।
ददौ मे स्वपतो नित्यानन्दरामः स्वदर्शनम् ॥
तदा तत्पादयोस्तूर्णं दण्डवत् पतिते मयि ।
प्रभुरात्मपदाम्भोजं न्यस्तवान्मम मूर्द्धनि ॥
उत्तिष्ठोत्तिष्ठ वत्सेति तेनोक्तोऽहं पुनः पुनः ।
उत्थाय तस्य तद्रूपं पश्यन्नेव विसिस्मिये ॥
श्यामस्निग्धरुचिर्महत्तमतनुर्वीराग्रगण्यो बली
साक्षान्मन्मथमन्मथः सुघटितश्रीपाणिपादाम्बुजः ।
क्षौमावेष्टितशीर्षकः कमलदृक् क्षौमाम्बरेणावृतः
कर्णाभ्यर्णसुवर्णकुण्डलयुगः स्वर्णाङ्गदावापकः ॥

শিঞ্জন্মঞ্জীরপাদো গললুলিতলুঠৎপুষ্পমালাবিলম্বো
ভদ্রশ্রীরঞ্জিতশ্রীঃ সুকলিততিলকঃ কোটিচন্দ্রাননশ্রীঃ।
দানোন্মত্তেভরাজস্তুতমৃদুগমনঃ প্রেমসন্দোলিতাঙ্গো
দাড়িম্বীবীজদন্তো নিগদতি সততং কৃষ্ণ কৃষ্ণেতি মন্দ্রম্‌ ॥

রক্তাং দোলয়তে যষ্টিং হস্তেন সিংহবিক্রমঃ।
বেষ্টয়ন্তঃ পদাম্ভোজং ভৃঙ্গা রাজন্তি সর্বতঃ ॥
সর্বে পারিষদাস্তত্র গোপবেশা বিলোকিতাঃ।
ব্রুবন্তঃ কৃষ্ণকৃষ্ণেতি প্রেমাবেশেন বিহ্বলাঃ ॥
কশ্চিদ্ বাদয়তে শৃঙ্গং বংশীশ্চান্যোঽপরে তথা।
গীতিং গায়ন্তি নৃত্যন্তি বীজয়ন্তি চ চামরম্‌ ॥
উপানয়ন্তি তাম্বূলং প্রভবে তত্র সেবকাঃ।
নিত্যানন্দস্য দৃষ্ট্বৈব বৈভবং তদলৌকিকম্‌ ॥
তথা রূপং গুণং লীলামানন্দবিহ্বলোঽভবম্‌।
কিমপ্যনবগচ্ছন্তং মামুবাচ হসন্ প্রভুঃ ॥
অয়ি ভোঃ কৃষ্ণদাস ত্বং ভয়ং মা কুরু মা কুরু।
গচ্ছ বৃন্দাবনং শীঘ্রং তত্র সর্বং হি লপ্স্যসে ॥
ইত্যুক্ত্বা হস্তসঙ্কেতং কৃত্বা মাং প্রেরয়ন প্রভুঃ।
অন্তর্দধে সপদ্যেব সর্বৈর্নিজগণৈঃ সহ ॥
লুপ্তসংজ্ঞস্তদৈবাহং ভূতলে পতিতোঽভবম্‌।
স্বপ্নভঙ্গাত পরং দৃষ্টা প্রভাতা রজনী ময়া ॥
কিং দৃষ্টং কিং শ্রুতং বেতি বহু চিন্তয়তা ময়া।
বৃন্দাবনপ্রয়াণায় প্রভোরাজ্ঞেতি নিশ্চিতম্‌ ॥
উত্থায় তৎক্ষণাদেব যাত্রার্থমুদ্যতোঽভবম্‌।
বৃন্দাবনং সমায়াতঃ প্রভোঃ করুণয়া সুখম্‌ ॥
জয়তি জয়তি নিত্যানন্দরামঃ প্রভুর্মা-
মনয়দতুলকারুণ্যেন বৃন্দাবনং যঃ।

जयति जयति नित्यानन्ददेवो दयालु
रलभ इह हि रूपं साग्रजं यत्कृपातः ॥
सनातनस्य कारुण्याद् भक्तिसिद्धान्तमाप्नवम् ।
श्रीरूपकृपया भक्तिरसप्रान्तं तथालभे ॥
जयति श्रीपदाम्भोजं नित्यानन्दमहाप्रभोः ।
राधागोविन्दपादाब्जं शरणं लब्धवान् यतः ॥
अहमस्मि जगामाधाधिकपापतमः खलु ।
विष्ठास्थेभ्योऽपि कीटेभ्यो लघिष्ठोऽस्मि च सर्वथा ॥
मन्नाम शृण्वतः पुण्यं क्षीयते पापमेधते ।
इत्थं गर्हितकर्माणं यो हि मां दयते जनम् ॥
नित्यानन्दं विनैकं को वर्त्तते जगतीतले ।
नित्यानन्दः कृपामूर्त्तिरुन्मत्तः प्रेमसम्पदा ॥
विचारयति नो किञ्चिदुत्तमादिषु तात्त्विकम् ।
उद्धारयति तान् सर्वान् ये पतन्ति तदग्रतः ॥
मादृशं स दुराचारमत एवोदधारयत् ।
मामानयच्च पापिष्ठं पुण्यं वृन्दावनं प्रभुः ॥
अदाद्रूपपदालम्बं मादृशायाधमाय सः ।
श्रीमन्मदनगोपाल-श्रीमद्गोविन्ददर्शनम् ॥
तेनाहं कारितो यत्तदिह वक्तुं न साम्प्रतम् ॥
श्रीमान् मदनगोपालो वृन्दावनपुरन्दरः ।
श्रीव्रजेन्द्रकुमारोऽयं साक्षाद्रासविलासकः ।
श्रीराधाललितायुक्तः साक्षान्मन्मथमन्मथः ।
यः श्रीरासविलासेन शश्वदेव प्रकाशते ॥

"तथाहि श्रीमद्भागवते १०।३२।२—

"तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः ।
पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥२०॥"

हृदयानि जनानां स स्वमाधुर्येण कर्षति ।
सेवेते एकतो राधापरतो ललिता प्रियम् ॥
नित्यानन्दानुकम्पैव तं देवं मामदर्शयत् ।
सा मे प्रभुमकार्षीच्च राधामदनमोहनम् ॥
अधमश्चापि मां सैव श्रीगोविन्दमदर्शयत् ।
तद्वार्ता नैव वाच्या मे व्यक्तं वक्तुं न शक्यते ॥
कल्पवृक्षवने वृन्दावने श्रीयोगपीठके ।
रत्नमण्डपमध्यास्ते रत्नसिंहासनं महत् ॥
तत्रासीनोऽस्ति गोविन्दः श्रीव्रजेन्द्रस्य नन्दनः ।
प्रकाशयति माधुर्यं मोहयन् भुवनत्रयम् ॥
वामे श्रीराधिका देवी सखीभिः सह राजते ।
प्रभू रासादिका लीलाः करोत्यानन्दविह्वलः ॥
ब्रह्मलोके स्वयं ब्रह्मा यं ध्यायति निरन्तरम् ।
अष्टादशार्णमन्त्रेण यमुपास्ते च सर्वदा ॥
ध्यायन्त्यधिष्ठिताः सर्वे भुवनानि चतुर्दश ।
यस्य लीलाश्च गायन्ति वैकुण्ठादिपुरस्थिताः ॥
परया यस्य माधुर्या लक्ष्मीश्चाकृष्यते स्वतः ।
तद्रूपं रूपगोस्वामी यथावत् समवर्णयत् ॥

तथाहि भक्तिरसामृतसिन्धौ साधनभक्तिलहर्यां

८७तमः श्लोक :—

"स्मेरां भङ्गीत्रयपरिचितां साचि विस्तीर्णदृष्टिं
वंशीन्यस्ताधरकिशलयामुज्ज्वलां चन्द्रकेण ।
गोविन्दाख्यां हरितनुमितः केशितीर्थोपकण्ठे
मा प्रेक्षिष्ठास्तव यदि सखे बन्धुसङ्गेऽस्ति रङ्गः ॥२१॥"

निःसन्देहमयं साक्षाच्छ्रीव्रजेन्द्रसुतः पुमान् ।
अज्ञानी प्रतिमाबोधमस्मिन् प्रकुरुते यदि ॥

तस्य तेनापराधेन कदाचिन्नास्ति निष्कृतिः।
पतनं नरके घोरे भवितैवेति किं ब्रुवे ॥
यस्मादेवं गुणोपेतं गोविन्दं प्राप्तवानहम्।
पादपद्मकृपां तस्य को वा वर्णयितुं क्षमः ॥
श्रीवृन्दावनवास्तव्यं तावद् वैष्णवमण्डलम्।
परमश्रेयआधारं कृष्णनामपरायणम् ॥
श्रीनित्यानन्दचैतन्यौ यस्य प्राणा धनानि च।
यद्राधाकृष्णयोर्भक्ति विना जानाति नापरम् ॥
तस्य श्रीचरणच्छायां पदरेणूंश्च पावनान्।
कृपया दत्तवान् श्रीमन्नित्यानन्दोऽधमाय मे ॥
अत्रैव लप्स्यसे सर्वमित्युक्तं प्रभुणा मम।
सूत्रं तदेव तस्यैव मयेयं विवृतिः कृता ॥
तत् सर्वं लब्धवानस्मि वृन्दारण्यं समागतः।
अभिप्रायः प्रभोः पूर्णस्ततसर्वलाभसम्पदा ॥
लिखाम्यात्मकथामेतां न जिह्रेमि तथाप्यहो।
नित्यानन्दगुणोन्मत्तो न शक्नोमि निवर्त्तितुम् ॥
अपारमहिमानो हि नित्यानन्दप्रभोर्गुणाः।
सहस्रवदनोऽनन्तस्तेषामन्तं न गच्छति ॥
यस्याशास्ति पदाम्भोजे श्रीरूपरघुनाथयोः।
स कृष्णदास आह श्रीचैतन्यचरितामृतम् ॥

इति श्रीचैतन्यचरितामृत आदिखण्डे चैतन्यावतारसामान्य-
कारणं नाम पञ्चमः परिच्छेदः।

Bhaja Nitai Gour Radhe Syam Japa Hare Krishna Hare Ram.

षष्ठः परिच्छेदः

"वन्दे तं श्रीमदद्वैताचार्यमद्भुतचेष्टितम् ।
यस्य प्रसादादज्ञोऽपि तत्स्वरूपं निरूपयेत् ॥१॥"
जयतात् कृष्णचैतन्यो जयतात् करुणामयः ।
नित्यानन्दस्तथाद्वैताचार्यश्च जयतान्तराम् ॥
नित्यानन्दस्वरूपं तत् पञ्चश्लोक्या मयोदितम् ।
अद्वैताचार्यमाहात्म्यं श्लोकयुग्मेन वर्ण्यते ॥
"तथाहि श्रीरूपगोस्वामिकृतकड़चायां श्लोकद्वयम्—
महाविष्णुर्जगत्कर्त्ता मायया यः सृजत्यदः ।
तस्यावतार एवायमद्वैताचार्य ईश्वरः ॥२॥
अद्वैतं हरिणाद्वैतादाचार्यं भक्तिशासनात् ।
भक्तावतारमीशं तमद्वैताचार्यमाश्रये ॥३॥"
अद्वैताचार्यगोस्वामी भवति स्वयमीश्वरः ।
अपारो महिमा यस्य जीवबुद्धेरगोचरः ॥
जगदादीनि कार्याणि महाविष्णुः सृजत्यसौ ।
तस्यैवाद्वैत आचार्योऽवतारः स्वयमुच्यते ॥
सृष्टिस्थितिविधानं यो विधत्ते निजमायया ।
यो ब्रह्माण्डान्यनन्तानि संसृजत्यवलीलया ॥
प्रकाशयत्यनन्ता यो मूर्त्तीरिच्छासमुद्भवात् ।
ब्रह्माण्डानां विशत्यन्तरेकैकाभिश्च मूर्त्तिभिः ॥
तस्यैव पुरुषस्यांशोऽद्वैतोऽद्वैतं तयोर्द्वयोः ।
तस्य कायविशेषोऽयं न विच्छिन्नो मनागपि ॥
प्रधानं समुपादाय कुर्वंस्तस्य सहायताम् ।
इच्छामात्रेण निर्माति स ब्रह्माण्डानि कोटिशः ॥

जगतां शिवमद्वैतं सोऽयं शिवगुणाश्रयः ।
चरित्रं मङ्गलं शश्वद् यस्य नाम च मङ्गलम् ॥
कोटिशोऽंशांश्च शक्तीश्च सोऽवतारांश्च कोटिशः ।
समादाय विनिर्माति ब्रह्माण्डानां गणं पुमान् ॥
उपादानं निमित्तञ्च मायांशौ द्विविधौ मतौ ।
प्रधानं तदुपादानं जीवमायानिमित्तकम् ॥
मूर्त्तिद्वयं समाश्रित्य यथैव पुरुषेश्वरौ ।
तौ निमित्तमुपादानं गृह्णन्तौ सृजतोऽखिलम् ॥
निमित्तकारणं साक्षात् पुरुषो विश्वसर्ज्जने ।
नारायण उपादानं स्वयमद्वैतरूपतः ॥
अंशेनासौ निमित्तेन मायामीश्वर ईक्षते ।
उपादानेन चांशेनाद्वैतो विश्वं सृजत्यसौ ॥
सांख्या यद्यपि मन्यन्ते प्रधानं विश्वकारणम् ।
नैवं तत् सृष्टिकर्त्तृत्वं तज्जड़स्य न सम्भवेत् ॥
अधिप्रधानमीशोऽसौ शक्तिं सञ्चारयत्यतः ।
तयैवेश्वरशक्त्या हि विश्वं भवति निर्मितम् ॥
प्रभुरद्वैतरूपेण शक्तिं सञ्चारयत्यसौ ।
अत एव हि सोऽद्वैतो मुख्यं भवति कारणम् ॥
कर्त्ता ब्रह्माण्डकोटीनामद्वैताचार्य एव हि ।
पुनरेकैकशो मूर्त्त्या ब्रह्माण्डानि बिभर्त्त्यसौ ॥
अद्वैतो मुख्यमङ्गं स्यात्तस्य नारायणस्य हि ।
अंशोऽर्थो ह्यङ्गशब्दस्येत्युक्तं भागवते तथा ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुर्दशाध्याये चतुर्दशश्लोके श्रीभगवन्तं प्रति ब्रह्मवाक्यम्—

नारायणस्त्वं न हि सर्वदेहिना-
मात्मास्यधीशाखिललोकसाक्षी ।

नारायणोऽङ्गं नर-भू-जलायना-
त्तच्चापि सत्यं न तवैव माया ॥
ईश्वरस्याङ्गमंशो वा चिदानन्दमयः सदा ।
मायया नास्य सम्बन्ध इति श्लोकेन गीयते ॥
कथमङ्गमिति प्रोक्तं नोक्तांश इति चेच्छृणु ।
अंशादप्यङ्गमित्यस्याधिका स्यादन्तरङ्गता ॥
महाविष्णोः स एवांशोऽद्वैताचार्यो गुणाकरः ।
स ईश्वरादभेदेनाद्वैत इत्यभिधान्वितः ॥
असृजत सर्वविश्वानि सृष्ट्यादौ स यथा पुरा ।
तथा प्रावर्त्तयद् भक्तिमधुनावतरन्नितः ॥
कृष्णभक्तिप्रदानेन स जीवानुद्धारयत् ।
गीता-भागवतग्रन्थव्याख्यया भक्तिमातनोत् ॥
विना भक्त्युपदेशेन न तत्कार्यमवर्त्तत ।
आचार्य इति नाम्नातो जनैः सर्वैः स भूषितः ॥
वैष्णवानां गुरुर्विश्ववासिनां पूज्य इत्यसौ ।
मिलनेन द्वयोर्नाम्नोरद्वैताचार्य औच्यत ॥
स आसीदन्तरङ्गांशः कमलाक्षस्य शार्ङ्गिणः ।
कमलाक्ष इति श्रेष्ठं नामाप्यन्वर्थतां गतम् ॥
विन्दन्तीश्वरसारूप्यमीश्वरस्य हि पार्षदाः ।
नारायण इवैतेऽपि पीतवस्त्राश्चतुर्भुजाः ॥
प्रभुरद्वैत आचार्य ईश्वरस्यांशसत्तमः ।
तत्त्वं नाम गुणास्तस्य सर्वं विस्मयकारकाः ॥
तुलसीजलदानेन गम्भीरैर्हुङ्कृतैश्च यः ।
स्वगणैः सह चैतन्यं पृथिवीं समुपानयत् ॥
तेन द्वारेण चैतन्यो भगवान्नामकीर्त्तनम् ।
प्रचार्य जीवनिस्तारं कृतवान् धरणीतले ॥

अपारं गुणमाहात्म्यमाचार्यस्य महात्मनः ।
प्राप्तुं कीटोपमा जीवास्तत्पारं पारयन्ति किम् ॥
अद्वैताचार्यगोस्वामी चैतन्यस्याङ्गमुत्तमम् ।
तस्यान्यदेकमङ्गञ्च नित्यानन्दो महाप्रभुः ॥
उपाङ्गानि प्रभोर्भक्तास्ते श्रीवासादयोऽभवन् ।
हस्तास्यनेत्रवच्चाङ्गमुपाङ्गं धनुरादिवत् ॥
एतान् सर्वान् समादाय सदा विहृतवान् प्रभुः ।
तत्र तत्र विहारेण स प्राचारयदीप्सितम् ॥
माधवेन्द्रपुरीस्वामिशिष्योऽद्वैत इति प्रभुः ।
गोस्वामिनं तमाचार्यममन्यत निजं गुरुम् ॥
रक्षितुं धर्ममर्यादां प्रभुर्लौकिकलीलया ।
चकार स्तुतिभक्तिभ्यामाचार्यस्य पदार्चनम् ॥
तथाप्यद्वैत आचार्यश्चैतन्यं ज्ञातवान् प्रभुम् ।
आत्मानञ्च सदा तस्य दास इत्यभ्यमन्यत ॥
दास्याभिमानसौख्येन स्वात्मानमपि विस्मरन् ।
कृष्णदासो भवेत्युक्त्वा सोऽयं जीवानुपादिशत् ॥
कृष्णदासोऽहमित्याभिमानिकानन्दवारिधेः ।
नैकेन विन्दुना मान्ति कोटिब्रह्मसुखान्यपि ॥
नित्यानन्दस्तथाहञ्च श्रीचैतन्यस्य किङ्करौ ।
दासभावसमः क्वापि नानन्दोऽन्यत्र वर्त्तते ॥
परमप्रेयसी लक्ष्मीर्हृदि तस्य वसन्त्यपि ।
कातर्येण सनिर्बन्धं दास्यानन्दं प्रयाचते ॥
तस्य पारिषदाः सर्वे दास्येनानन्दितान्तराः ।
ब्रह्मा सनातनः शम्भुः शुकदेवश्च नारदः ॥
नित्यानन्दावधूतोऽसौ सर्वेषामग्रणीरपि ।
दास्यप्रेम्णा सदोन्मत्तश्चैतन्यस्य महाप्रभोः ॥

श्रीवासो हरिदासश्च रामदासो गदाधरः ।
वक्रेश्वरो मुरारिश्च मुकुन्दश्चन्द्रशेखरः ॥
उत्कृष्टमहिमानस्ते सर्वे पाण्डित्यमण्डिताः ।
श्रीचैतन्यस्य दास्येन कारिता उन्मदा इति ॥
मत्वागायदनृत्यच्च साट्टहासं मुहुर्मुहुः ।
भव चैतन्यदासस्त्वमिति लोकानुपादिशत् ॥
सोऽचिन्तयच्च चैतन्यो मामेव मन्यते गुरुम् ।
मम दास्याभिमानस्तु तथापि सुमहानिति ॥
कृष्णप्रेम्नः प्रभावोऽयमपूर्वः परिलक्ष्यते ।
योजयेद्दास्यभावेन समान्न्यूनान् गुरूनपि ॥
अस्य प्रमाणरूपेण शास्त्रं व्याख्यायते शृणु ।
महतोऽनुभवो यत्र प्रमाणं सुदृढ़ं ततः ॥
अपरस्य कथा कैव व्रजे नन्दो व्रजेश्वरः ।
येन तुल्यो न कृष्णस्य गुरुः कोऽपि महीतले ॥
शुद्धवात्सल्यभावोऽस्यानैश्वर्यज्ञानमिश्रितः ।
कृष्णप्रेमा तथापीमं तद्दास्यमन्वकारयत् ॥
तस्य श्रीमुखवाण्येव प्रमाणत्वेन दर्श्यते ॥
उद्धव श्रूयतां कृष्णः सत्यमेव सुतो मम ।
स एवेश्वर इत्येवं यदि त्वं मन्यसे दृढ़म् ॥
तथापि तत्र मे सन्तु तथैव चित्तवृत्तयः ।
भक्तिस्तवेश्वरे कृष्णे सुदृढ़ास्तु मतिश्च मे ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे सप्तचत्वारिंशाध्याये अष्टपञ्चाशत्तमश्लोके श्रीकृष्णमुद्दिश्य नन्दवाक्यम्—

मनसो वृत्तयो न स्युः कृष्णपादाम्बुजाश्रयाः ।
वाचोऽभिधायिनीर्नाम्नां कायस्तत्प्रह्वणादिषु ॥५॥

एवं तत्रैवैकोनषष्टितमः श्लोकः—

कर्मभिर्भ्राम्यमाणानां यत्र क्वापीश्वरेच्छया ।
मङ्गलाचरितैर्दानै रतिर्नः कृष्ण ईश्वरे ॥६॥"
श्रीदामाद्याः सखायो ये कृष्णस्यासंस्तदा व्रजे ।
ऐश्वर्य्यज्ञानहीनास्ते शुद्धसख्यमयान्तराः ॥
कृष्णस्य स्कन्धमारुक्षंस्तथान्योन्यमयुतसत ।
तेऽपि तद्दास्यभावेन पादौ तस्य सिषेविरे ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे पञ्चदशाध्याये पञ्चदशश्लोके परीक्षितं प्रति शुकवचनम्—

पादसंवाहनं चक्रुः केचित्तस्य महात्मनः ।
अपरे हतपाप्मानो व्यजनैः समवीजयन ॥७॥"
प्रेयस्यो याश्च कृष्णस्य यावत्यो गोपिका व्रजे ।
उद्धवोऽपि तदा यासां पादरेणूनयाचत ॥
याभ्यश्चाभ्यधिकप्रेष्ठा नासीत कृष्णस्य काचन ।
आत्मानमभ्यमन्यन्त तस्य दासीति ता अपि ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे एकत्रिंशाध्याये षष्ठश्लोके श्रीकृष्णमुद्दिश्य गोपीवाक्यम्—

व्रजजनार्त्तिहन् वीरयोषितां निजजनस्मयध्वंसनस्मित ।
भज सखे भवत्किङ्करीः स्म नो जलरुहाननं चारु दर्शय ॥८॥

तत्रैव सप्तचत्वारिंशाध्याये एकोनविंशश्लोके भ्रमरं प्रति श्रीराधिकावाक्यम्—

अपि बत मधुपुर्यामार्यपुत्रोऽधुनास्ते
स्मरति स पितृगेहान् सौम्य बन्धूंश्च गोपान् ।
क्वचिदपि स कथा नः किङ्करीणां गृणीते
भुजमगुरुसुगन्धं मूर्ध्न्यधास्यत् कदा नु ॥९॥"

आस्तां तावत् कथान्यासां श्रीमती सापि राधिका।
सर्वैरंशैश्च सर्वाभ्यो याभवत परमाधिका ॥
यस्याः प्रेमगुणैः कृष्णो वशीभूतः प्रतिक्षणम्।
दासीभावेन साप्यस्य चरणाब्जमसेवत ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे त्रिंशाध्याये त्रयस्त्रिंशत्तमश्लोके श्रीकृष्णमुद्दिश्य श्रीराधिकावाक्यम्—

हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज।
दास्यास्ते कृपणाया मे सखे दर्शय सन्निधिम् ॥१०॥"
रुक्मिण्याद्या महिष्यो या बभूवुर्द्वारकापुरि।
आत्मनः कृष्णदासीत्वं बह्वमन्यन्त ता अपि ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे त्र्यशीतितमाध्याय एकादशश्लोके द्रौपदीं प्रति कालिन्दीवाक्यम्—

तपश्चरन्तीमाज्ञाय स पादस्पर्शनाशया।
सख्योपेत्याग्रहीत् पाणिं साहं तद्गृहमार्जनी ॥११॥"

तथाहि तत्रैव चतुस्त्रिंशश्लोके द्रौपदीं प्रति लक्ष्मणावाक्यम्—

आत्मारामस्य तस्येमा वयं वै गृहदासिकाः।
सर्वसङ्गनिवृत्त्याद्धा तपसा च बभूविम ॥१२॥"
अथवा का कथान्येषां बलदेवोऽप्यसौ स्वयम्।
शुद्धसख्यमयो भावो यस्य वात्सल्यसंयुतः ॥
सोऽपि श्रीकृष्णदास्येन बह्वात्मानममन्यत।
श्रीकृष्णदास्यहीनः को वर्त्तते जगतीतले ॥
सहस्रवदनः शेषो यः सङ्कर्षण ईरितः।
दश देहान् विधाय स्वान् सोऽपि कृष्णं निषेवते ॥
यो ब्रह्माण्डेष्वनन्तेषु रुद्रः सदाशिवांशकः।
गुणावतारः कृष्णस्य सर्वदेवशिरोमणिः ॥

सोऽपि श्रीकृष्णदासत्वं सतृष्णं सम्प्रतीक्षते ।
अहं श्रीकृष्णदासोऽस्मीत्याह शम्भुर्निरन्तरम् ॥
कृष्णप्रेम्ना सदोन्मत्तो विह्वलोऽस्ति दिगम्बरः ।
कृष्णलीलागुणैर्गाथां गायन्नृत्यति सर्वदा ॥
मातुः पितुर्गुरोः सख्युर्यथा भावोऽस्तु यस्य तु ।
दास्यं कारयते तं तं कृष्णप्रेमा स्वभावतः ॥
एकः कृष्णो हि सर्वेषामुपास्यो जगदीश्वरः ।
सेवकानुचरास्तस्य यावन्तः सन्ति चापरे ॥
कश्चिन्मानयते कोऽपि न तं सर्वे तु सेवकाः ।
न तं मानयते यो हि तत्पापेन स नश्यति ॥
अहं चैतन्यदासोऽस्मि चैतन्यस्यास्मि किङ्करः ।
चैतन्यस्यास्मि दासोऽहं तद्दासस्यापि किङ्करः ॥
इत्युक्ताद्वैत आचार्यो जगौ नृत्यन सहुङ्कृति ।
क्षणेनोपविशन्नेव स्थिरतां प्रत्यपद्यत ॥
भक्ताभिमान-मूलं हि बलरामो निगद्यते ।
तस्य भावेन सर्वेऽशास्तमेवानुगता इति ॥
तस्यावतार एकः श्रीसङ्कर्षणमहाप्रभुः ।
भक्त इत्यभिमानं स्वं कुरुतेऽसौ प्रतिक्षणम् ॥
अन्यस्तस्यावतारोऽभूद्वीरः श्रीयुक्त-लक्ष्मणः ।
असौ श्रीरामदासत्वं कुर्वन्नासीदनुक्षणम् ॥
सङ्कर्षणावतारोऽसौ कारणाब्धिशयः पुमान् ।
तस्य मूलानुसारेण भक्तभावः सदा हृदि ॥
तस्य प्रकाशभेदोऽयमद्वैताचार्य एव हि ।
कायवाङ्मानसैर्भक्तिरस्य कर्माभवत सदा ॥
चैतन्यानुचरोऽस्मीति वचनं स उदैरयत ।
नित्यं चैतन्यभक्तोऽहमिति दध्यौ च चेतसा ॥

तं सिषेवे स कायेन तुलस्या च जलेन च ।
प्रचारयंश्च तद्भक्तिं भुवनान्युद्धतारयत् ॥
शेषः सङ्कर्षणो नाम यो धत्ते शिरसा भुवम् ।
कायव्यूहान् विनिर्माय श्रीकृष्णं सेवते सदा ॥
एते सर्वेऽवतारा हि कृष्णस्य परमात्मनः ।
एषां भक्तियुताचारः सर्वदा परिलक्ष्यते ॥
एते भक्तावतारा हि सर्वे शास्त्रैरुदाहृताः ।
पदं भक्तावताराणां सर्वेषामुपरि स्थितम् ॥
अतएव स कृष्णोऽंशी तदंशा अवतारकाः ।
कनिष्ठज्येष्ठताचारो दृश्यतेऽंशांशिभावयोः ॥
ज्येष्ठत्वेन प्रभुज्ञानमंशिनि स्यात् स्वभावतः ।
कनिष्ठत्वेन सर्वेषां तद्भक्तमान्यता भवेत् ॥
श्रीकृष्णसमतालाभाच्छ्रेयो भक्तपदापनम् ।
कृष्णस्य स्वात्मनोऽपि स्याद्भक्तः प्रेमास्पदं परम् ॥
आत्मनो मन्यते कृष्णो निजभक्तं महत्तरम् ।
श्रूयन्ते शास्त्रवाक्यानि प्रमाणानीह भूरिशः ॥

"तथाहि श्रीमद्भागवत एकादशस्कन्धे चतुर्दशाध्याये चतुर्दशश्लोक उद्धवं प्रति श्रीकृष्णवाक्यम् —

न तथा मे प्रियतम आत्मयोनिर्न शङ्करः ।
न च सङ्कर्षणो न श्रीर्नैवात्मा च यथा भवान् ॥१३॥"

साम्यलाभेऽपि कृष्णस्य नास्वाद्या तस्य माधुरी ।
एकेन भक्तभावेन तन्माधुर्य्यं सुचर्व्यते ॥
अयं शास्त्रेषु सिद्धान्तोऽनुभवो महतां तथा ।
मूढ़ा नैव विजानन्ति भावानां वैभवं परम् ॥
स्वीकृत्य भक्तभावं स्वं बलरामश्च लक्ष्मणः ।
नित्यानन्दस्तथाद्वैतः शेषः सङ्कर्षणस्तथा ॥

Bhaja Nitai Gour Radhe Syam, Japa Hare Krishna Hare Ram.

कृष्णस्य रसमाधुर्यामृतधारां पपुश्च ते ।
सर्वे ते तत्सुखोन्मत्ता नाविदन्न किञ्चनापरम् ॥
अस्त्वन्येषां कथा दूरे स्वयं कृष्णोऽपि तृष्णया ।
आत्ममाधुर्य्यपानार्थं वर्त्तते व्याकुलान्तरः ॥
यतते स स्वमाधुर्य्यास्वादनायैव सर्वदा ।
भक्तभावं विना तस्य तदास्वादस्तु नाभवत् ॥
भक्तभावमुरोकृत्य तत् स्वयं सोऽवतीर्णवान् ।
कृष्णचैतन्यरूपेण सर्वभावभृतान्तरः ॥
विविधैर्भक्तभावैश्च स्वमाधुर्य्यं स पीतवान् ।
व्याख्यात एष सिद्धान्तः पूर्वमेव मया बहु ॥
भक्तभावेऽवताराणामधिकारः स्वभावतः ।
विद्यते नापरं किञ्चिद् भक्तभावाधिकं सुखम् ॥
मूलं भक्तावताराणां श्रीमत्सङ्कर्षणः प्रभुः ।
अतो भक्तावतारोऽयमद्वैतः परिगण्यते ॥
अद्वैताचार्य्यगोस्वामी महामहिमसागरः ।
येन गम्भीरहुङ्कारैः श्रीचैतन्योऽवतारितः ॥
सङ्कीर्त्तनप्रचारेण कृतवान् विश्वतारणम् ।
अद्वैतस्य प्रसादेन प्राप्ताः प्रेमधनं जनाः ॥
अनन्तं तस्य माहात्म्यं को वा वर्णयितुं क्षमः ।
महाजनमुखाच्छ्रुत्वा तत्तथैव लिखाम्यहम् ॥
कोटिः सन्तु नमस्कारा आचार्य्यस्य पदे मम ।
अनेन योऽपराधो मे जातस्तं क्षमतां प्रभुः ॥
कोटिसागरसङ्काश आचार्य महिमा तव ।
तस्य वर्णयतेयत्तामपराद्धं मया महत् ॥
श्रीमानद्वैत आचार्य्यो जयताज्जयतात्तमाम् ।
जयतां कृष्णचैतन्य-नित्यानन्दौ महाप्रभू ॥

श्लोकाभ्यां कृतमद्वैतस्वरूपस्य निरूपणम् ।
पञ्चतत्त्वविचारोऽयं भक्तैराकर्ण्यतामतः ॥
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स कृष्णदास आह श्रीचैतन्यचरितामृतम् ॥

इति श्रीचैतन्यचरितामृत आदिखण्डे श्रीमदद्वैततत्त्वनिरूपणं नाम षष्ठः परिच्छेदः ।

श्रीचैतन्यचरितामृत आदिलीलायां

सप्तमः परिच्छेदः

"अगत्येकगतिं नत्वा हीनार्थाधिकसाधकम् ।
श्रीचैतन्यं लिख्यतेऽस्य भक्तिप्रेमवदान्यता" ॥१॥
जयतात् कृष्णचैतन्यो जयतात् स महाप्रभुः ।
त एव भुवने धन्या ये तच्चरणमाश्रिताः ॥
आदौ गुर्वादिषट्तत्त्वनमस्कारपुरःसरम् ।
मयोक्तं गुरुतत्त्वं तच्छ्रूयतां पञ्चकं परम् ॥
चैतन्येनावतीर्णानि पञ्चतत्त्वानि सर्वशः ।
मिलित्वा तानि सानन्दमकुर्वन्नामकीर्त्तनम् ॥
वस्तुतस्तु न भिन्नं तद् वस्त्वेकं पञ्चतत्त्वकम् ।
रसस्यास्वादनायैव यद्भेदा विविधाः किल ॥

"तथाहि श्रीरूपगोस्वामिकड़चायाम्—

पञ्चतत्त्वात्मकं कृष्णं भक्तरूपस्वरूपकम् ।
भक्तावतारं भक्ताख्यं नमामि भक्तशक्तिकम्" ॥२॥

एक एवेश्वरः कृष्णः स एव भगवान् स्वयम् ।
नन्दात्मजोऽद्वितीयोऽसौ रसिकानां शिरोमणिः ॥
रासादिकविलासो श्रीनागरो व्रजयोषिताम् ।
अपरे ये च दृश्यन्ते सर्वे परिकरा मताः ॥
कृष्ण एवावतीर्णोऽसौ कृष्णचैतन्यरूपतः ।
तैः कृतार्थात्मभिः सर्वैर्निजैः परिकरैः सह ॥
एकमेवैश्वरं तत्त्वं कृष्णचैतन्य ईश्वरः ।
भक्तभावमयं तस्य सुविशुद्धं कलेवरम् ॥
अहो कृष्णस्य माधुर्याः प्रकृतिर्वर्त्ततेऽद्भुता ।
आस्वादयितुमात्मानं भक्तभावं करोति सः ॥
भक्तभावं हि चैतन्यः स्वीकरोत्यत एव सः ।
नित्यानन्दोऽनुजम्मन्यस्तस्य भक्तस्वरूपता ॥१०॥
तस्य भक्तावताराऽयमद्वैताचार्य एव च ।
एतत्तत्त्वत्रयं सर्वैर्गीयते प्रभुशब्दतः ॥
एको महाप्रभुर्ज्ञेयोऽपरौ द्वौ भवतः प्रभू ।
उभौ प्रभू च सेवेते चरणं श्रीमहाप्रभोः ॥
एतत्तत्त्वत्रयं सर्वैराराध्यमिति मन्यते ।
भक्ततत्त्वं चतुर्थं यज्ज्ञेयमाराधकं हि तत् ॥
श्रीवासाद्याश्च यावन्तो भक्ता ये कोटिकोटिशः ।
विशुद्धभक्ततत्त्वेषु गण्यन्ते सर्व एव ते ॥
प्रभोः शक्त्यवतारा ये श्रीमद् गदाधरादयः ।
तस्यान्तरङ्गभक्तास्ते गण्यन्ते सकला अपि ॥
यान् सर्वान् सममादाय नित्यं विहरति प्रभुः ।
प्रचारयति यैः सर्वैर्नामसङ्कीर्त्तनं महत् ॥
साहचर्येण येषां स प्रेमास्वादयति स्वयम् ।
यद्द्वारेणैव जीवेभ्यो दत्ते प्रेमधनं निजम् ॥

तैस्तस्य पञ्चभिस्तत्त्वैर्मिलित्वागत्य चावनिम् ।
प्राचीनप्रेमभाण्डारान्मुद्रामुत्पाटयन्नसौ ॥
मिलितैः पञ्चभिः सार्द्धं लुठन प्रेमामृतं महत् ।
पिबत्यास्वादयन यावत्तावतो वर्द्धते तृषा ॥
ते भवन्ति महामत्ताः पायं पायं मदार्त्तवत ।
कृष्णं गायन्ति नृत्यन्ति क्रन्दन्त्यथ हसन्ति च ॥२०॥
पात्रापात्रविचारं वा स्थानास्थानविवेचनम् ।
अकृत्वा ददति प्रेम यथा प्राप्नाय ते मुदा ॥
लुठित्वास्वाद्य दत्त्वा च भाण्डारं तैरुदच्यते ।
भाण्डारश्चाद्भुतं प्रेम शतशो वर्द्धतेऽनिशम् ॥
प्रेमवन्याकृतोच्छ्वासा परिभ्राम्यति सर्वशः ।
स्त्रीवृद्धयुवबालांश्च सर्वान्मज्जयति द्रुतम् ॥
दुर्जनान सुजनान पङ्गुजड़ानन्धाञ्जगज्जनान् ।
प्रेमवन्या समस्तांस्तान् निमज्जयति सर्वदा ॥
दृष्ट्वा मग्नं जगज्जीववीजानाञ्च विनाशनम् ।
तान्येव पञ्चतत्त्वानि सोल्लासानि भवन्ति च ॥
यावन्ति प्रेमवारीणि वर्षन्ति पञ्च ते जनाः ।
तावत प्रवर्द्धते वन्या जगद्व्याप्नवती तदा ॥
मायावादिक्रियानिष्ठकुतार्किकजनास्तथा ।
पाषण्डिनोऽधमच्छात्रा निन्दुकाश्च तथाविधाः ॥
तेऽपि सर्वे महादक्षाः पलायन्ते च सत्वरम् ।
प्रेमवन्या न शक्नोति संस्प्रष्टुं तान् कथञ्चन ॥
महाप्रभुस्तदालोक्य विचारयति चेतसा ।
मया मज्जयितुं विश्वं चेष्टितं प्रेमवन्यया ॥
केचित परिहृतास्तेन प्रतिज्ञा मे च्युतिं गता ।
सर्वेषां मज्जनायैव रचयिष्यामि कौशलम् ॥३०॥

इत्येवं बहुधान्यच्च ध्यात्वा निर्द्धारयन प्रभुः ।
ततोऽङ्गीकुरुते पूज्यं सन्न्यासाश्रममन्तिमम् ॥
चतुर्विंशतिमब्दान् स न्यधितिष्ठन् गृहाश्रमम् ।
पञ्चविंशतिवर्षीणो यतिधर्मं समाश्रितः ॥
एवं गृहीतसन्न्यासो हेलयाकृष्टवान प्रभुः ।
पूर्वं पलायितान सर्व्वांस्तार्किकादींश्च तावतः ॥
छात्राः पाषण्डिनः कर्ममार्गिणो निन्दकादयः ।
सर्वे स्वयं समागत्य प्रणेमुः प्रभुपादयोः ॥
संशोधितापराधास्ते मग्नास्तत्प्रेमवारिणि ।
प्रभोः प्रेममहाजालं परिहर्त्तुं क ईशते ॥
प्रभुः कृपावतारोऽभूत सर्व्वनिस्तारणाय हि ।
सर्वानेव समुद्धर्त्तुं कृतवांश्चातुरीं पराम् ॥
मायावादिनमेकन्तु काशीस्थं पण्डितं विना ।
निजभक्तांश्चकारासौ सर्वान्म्लेच्छादिकानपि ॥
काश्यामासीन् प्रभुर्जातु यास्यन वृन्दावनं प्रति ।
मायावादिगणाः सर्व्वे निनिन्दुस्तमनेकधा ॥
सन्न्यासो कुरुते गानं निर्लज्ज इव नृत्यति ।
अनधीत्य च वेदान्तान विधत्ते नामकीर्त्तनम् ।
स्वधर्मं मूर्खसन्न्यासी नायं जानाति कश्चन ।
स्वयं भावभराविष्टः सार्द्धं भ्राम्यति भावकैः ॥४०॥
इत्येवं गर्हणं श्रुत्वा प्रभुर्हास्याकुलोऽभवत ।
उपेक्षमाण एवैतान्न किञ्चित् समभाषत ॥
उपेक्ष्यैव स तान सर्वान्मथुरानगरीं गतः ।
दृष्ट्वा माथुरसौन्दर्यं काशीं प्रत्यागतः पुनः ॥
तत्रासील्लेखकः शूद्रो नाम्ना श्रीचन्द्रशेखरः ।
काश्यां तद्गृहमध्यास्त स्वतन्त्रः प्रभुरीश्वरः ॥

गृहे तपनमिश्रस्य स भिक्षां निरवर्तयत ।
सन्न्यासिगणभिक्षार्थमाहूतोऽपि न सोऽगमत् ॥
श्रीसनातनगोस्वामी तत्रैव मिलितस्तदा ।
प्रभुस्तस्यैव शिक्षार्थं द्वौ मासौ प्रत्यपालयत् ॥
यावन्ति गूढ़मर्माणि श्रीमद्भागवतादिषु ।
सर्वान् वैष्णवधर्मांश्च स तं सम्यगशिक्षयत् ॥
ततस्तपनमिश्रश्च चन्द्रशेखर एकदा ।
दुःखितौ प्रभुपादाय कृतवन्तौ निवेदनम् ॥
कियन्त्याकर्णयिष्यावो निन्दनानि प्रभो तव ।
पुनः सोढुं न शक्ष्यावस्त्यक्ष्यावो जीवितं खलु ॥
अत्र सन्न्यासिनः सर्वे त्वां विनिन्दन्ति सर्वदा ।
हृदयश्रवणच्छेदि वचः श्रोतुं न शक्नुवः ॥
इत्याकर्ण्य वचो देवे स्मयमान-मुखाम्बुजे ।
ब्राह्मणः कश्चिदागत्य प्रभुणा समगच्छत ॥५०॥
उपासीनः प्रभोः पादौ गृहीत्वासौ न्यवेदयत ।
त्वामेकं प्रार्थये वस्तु प्रसन्नो देहि मे प्रभो ॥
मया सन्न्यासिनः सर्वे कृताह्वाना ममालयम् ।
आगमिष्यन्ति भिक्षार्थं सकामः स्यां गते त्वयि ॥
जाने सन्न्यासिगोष्ठीं त्वं कदाचिन्नैव गच्छसि ।
अनुकम्पस्व मे देव स्वीकुरुष्व निमन्त्रणम् ॥
तदा स्वीकृतवान देवो हसन विप्र-निवेदनम् ।
सन्न्यासिनां दयां कर्त्तुमेषा भङ्गी महाप्रभोः ॥
विप्रोऽज्ञानात् प्रभुर्गेहं न कस्यापि व्रजेदिति ।
तेनैव प्रेरितः सोऽन्तर्निर्बन्धाग्रहमाचरत ॥
दिने निरूपिते तस्मिन प्रभुर्विप्रालयं गतः ।
तत्रासीनमपश्यच्च महत् सन्न्यासिमण्डलम् ॥

विधिवत्तन्नमस्कृत्य प्रक्षाल्यैव निजं पदम् ।
पादावनेजनस्थान एव तूष्णीमुपाविशत् ॥
आसीनः कृतवानीषदैश्वर्यस्य प्रकाशनम् ।
धृतवान् कोटिसूर्याभं महातेजोमयं वपुः ॥
तत्प्रभावात् समाकृष्टमनाः सन्न्यासिनां गणः ।
उदतिष्ठत् सपद्येव सन्त्यज्य स्वं स्वमासनम् ॥
प्रकाशानन्दनामैकः सर्वसन्न्यासिसत्तमः ।
ससम्मानमुवाचैवमुपागत्य महाप्रभुम् ॥६०॥
एह्येहि स्वामिपादात्र शृणु स्वागतमस्तु ते ।
किं निषीदस्यमेध्यायां भुवि कस्माद्विषीदसि ॥
प्रत्युवाच प्रभुर्हीनगोष्ठीकोऽस्मि महत्तमाः ।
भवतां परिषन्मध्ये युज्यते न ममासनम् ॥
प्रकाशानन्द आकर्ण्य तदुक्तं प्रश्रयेण तम् ।
गृहीत्वाञ्जलिना हस्ते सभामध्ये न्यषादयत् ॥
सोऽपृच्छद् भगवन् कृष्णचैतन्य इति नाम ते ।
भारती-केशवस्यासि शिष्यस्तद् धन्यता तव ॥
अस्माकं समगोष्ठीको वसस्यत्रैव पत्तने ।
न दृष्टिपथमस्माकमायासि केन हेतुना ॥
नृत्यं करोषि गीतञ्च सन्न्यासं श्रितवानपि ।
भावकान् सममादाय विधत्से पथि कीर्त्तनम् ॥
ध्यानं वेदान्तपाठञ्च धर्मं सन्न्यासिनां त्यजन् ।
भावप्रवणतामेवं कस्मात्त्वमवलम्बसे ॥
साक्षान्नारायणोऽसीति प्रभावैस्तव बुध्यते ।
आचरस्यधमाचारं कथं तत्कारणं वद ॥
प्रभुः प्रोचे शृणु स्वामिन् भगवंस्तस्य कारणम् ।
मूर्खं इत्यवगत्यैव श्रीगुरुर्मामुपादिशत् ॥

मूर्खस्त्वं ह्यधिकारस्ते वेदान्तेषु न युज्यते ।
सदा श्रीकृष्णमन्त्रं त्वं मन्त्रसारमिमं जप ॥७०॥
अनेन कृष्णमन्त्रेण संसारान्मोक्ष्यसे ध्रुवम् ।
लप्स्यसे कृष्णपादाब्जं कृष्णनामप्रभावतः ॥
कृष्णनाम विना धर्मोऽपरो नास्ति कलौ युगे ।
सारं नामैव मन्त्राणां शास्त्रमर्मविदो विदुः ॥
इत्युक्त्वा गुरुपादो मां श्लोकमेकमशिक्षयत ।
हृदि सन्धार्य तं श्लोकं विचारयितुमादिशत ॥

"तथाहि बृहन्नारदीयवचनम्—

हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥३॥"
तामाज्ञां शिरसादाय नामागृह्णामनुक्षणम् ।
तज्जरीगृह्यमाणस्य सञ्जातो मे मतिभ्रमः ॥
अक्षमो रक्षितुं धैर्यमुन्मत्तोऽहं ततोऽभवम् ।
करोमि क्रन्दनं हास्यं नृत्यं गीतञ्च मत्तवत् ॥
कथञ्चिद्धैर्यमालम्ब्य मनसा निश्चितं मया ।
कृष्णनाम्नैव नूनं मे सर्वज्ञानं तिरोहितम् ॥
सम्प्रत्युन्मद एवास्मि धैर्यं मे नास्ति चेतसि ।
इत्येवं चिन्तयन् श्रीमद्गुरवेऽहं न्यवेदयम् ॥
गुरो कमिव मन्त्रं मेऽददास्तस्य बलं कियत् ।
मन्त्रो जाजप्यमानो मां सोन्मादं कृतवानयम् ॥
हासयन् नर्तयत्येष ततो मां रोदयत्यपि ।
इत्याकर्ण्य गुरुर्मह्यं हसन्नेवमवोचत ॥
एवमेव स्वभावो हि कृष्णनाम-महामनोः ।
जपतामेव तन्मन्त्रं भावः कृष्णे प्रजायते ॥८०॥

श्रीकृष्णविषयः प्रेमा पुरुषार्थगणोत्तमः ।
पुरुषार्थाश्च चत्वारस्तृणायन्ते तदग्रतः ॥
पञ्चमः पुरुषार्थोऽयं प्रेमानन्दामृताम्बुधिः ।
मोक्षादिहेतुरानन्दस्तस्य बिन्दुसमोऽपि न ॥
कृष्णनाम्नः फलं प्रेमा सर्वशास्त्रैर्निगद्यते ।
सौभाग्येनैव स प्रेमा साक्षात् समुदितस्तव ॥
प्रेमा चित्ततनुक्षोभं जनयेत्तत्स्वभावतः ।
श्रीकृष्णचरणप्राप्तैर लोभः सञ्जायते ततः ॥
स्वभावेनैव तत्प्रेम्णो भक्तो हसति रोदिति ।
गायत्युन्मत्तवन्नृत्यन्नितश्चेतश्च धावति ॥
स्वेदः कम्पश्च रोमाञ्चा अश्रुवैवर्ण्यगद्गदाः ।
विषादोन्माद-धैर्याणि गर्वो हर्षश्च दीनता ॥
इति भावैश्च स प्रेमा भक्तान्नर्त्तयति ध्रुवम् ।
कृष्णानन्दामृताम्भोधौ तांश्च प्लावयतेऽनिशम् ॥
साधुवृत्तमहो प्राप्तः पुरुषार्थोत्तमस्त्वया ।
एतेनैव तव प्रेम्णा धन्योऽहमपि सर्वथा ॥
नृत्य गाय समं भक्तैः कुरु सङ्कीर्तनं सदा ।
कृष्णनामोपदेशेन निस्तारय जगज्जनान् ॥
इत्येतावद्वदन्नेकं श्लोकं मां गुरुरादिशत् ।
भागवतस्य सारोऽयमित्यवोचत् पुनः पुनः ॥९०॥

तथाहि श्रीमद्भागवते २।४७।३८

एवंव्रतः स्वप्रियनामकीर्त्या
जातानुरागो द्रुतचित्त उच्चैः ।
हसत्यथो रोदिति रौति गाय-
त्युन्मादवन्नृत्यति लोकबाह्यः ॥४॥"

इति श्रीगुरुपादोक्तौ श्रद्धा दृढ़तमा मम ।
भगवत्कृष्णनामानि कीर्तयामि निरन्तरम् ॥
तत्कृष्णनाम मां जातु गापयेदथ नर्तयेत् ।
अहं गायामि नृत्यामि न कदाचिन्निजेच्छया ॥
कृष्णनाम्ना यदानन्द-सिन्धोरास्वादनं भवेत् ।
ब्रह्मानन्दोऽपि तस्याग्रे गोस्पदायेत निश्चितम् ॥

"तथाहि हरिभक्तिसुधोदये—

तत्साक्षात्करणाह्लादविशुद्धाब्धिस्थितस्य मे ।
सुखानि गोस्पदायन्ते ब्रह्माण्यपि जगद्गुरो ॥५॥"
प्रभोर्मधुरवाक्यानि श्रुत्वा सन्न्यासिनां गणः ।
चित्तवृत्तिं परावर्त्य सान्त्ववाक्यमवोचत ॥
यत्किञ्चिद् भगवन्नुक्तं भवता सत्यमेव तत् ।
कृष्णप्रेमाप्नुयात् सोऽयं यस्य भाग्योदयो भवेत् ॥
कृष्णभक्तिं विधेहि त्वं तुष्टाः सर्वे वयं ततः ।
नाकर्णयसि वेदान्तान् कथं किं तेषु दूषणम् ॥
इति तद्वच आकर्ण्य हसन् प्रत्यवदत् प्रभुः ।
अप्रियं चेन्न मन्यध्वे तदा किञ्चिन्निवेद्यते ॥
इति श्रुत्वावदन् सर्वे तत्र सन्न्यासिनो मुदा ।
त्वां निरीक्षामहे स्वामिन् साक्षान्नारायणं यथा ॥
भवद्वचनमाकर्ण्य तृप्यन्ति श्रवणानि नः ।
आलोक्य तव माधुर्यं प्रीयन्ते नयनानि च ॥
प्रभावात्तव सर्वेषामस्माकं नन्दितं मनः ।
अतस्त्वद्वचनं जातु नैव सम्भव्यसङ्गतम् ॥१००॥
प्रभुस्तदाह वेदान्तसूत्रमीश्वरभाषितम् ।
उवाच व्यासरूपेण यच्छ्रीनारायणः स्वयम् ॥

विप्रलिप्सा प्रमादश्च करणापाटवं भ्रमः ।
एते दोषा न चार्हन्ति स्थातुमीश्वरभाषणे ॥
सूत्रैरुपनिषन्मानैर्यत्तत्त्वं सुप्रकाशितम् ।
मुख्यवृत्त्या तदर्थो हि समुत्कृष्टः प्रतीयते ॥
अकरोद् भाष्यमाचार्यो गौणवृत्त्या तु शङ्करः ।
तस्य श्रवणमात्रेण सर्वनाशो भवेद्ध्रुवम् ॥
आचार्यस्य न दोषोऽत्र तं तथेश्वर आदिशत् ।
तेन मुख्यार्थमाच्छाद्य गौणार्थं कृतवानसौ ॥
ब्रह्मशब्दस्य मुख्यार्थो भगवानिति कथ्यते ।
चिदैश्वर्येण सम्पूर्णः सोऽनूर्द्ध्वसम उच्यते ॥
तस्य विभूतयो देहाः सकला एव चिन्मयाः ।
चिद्विभूतीरपह्नुत्य तन्निराकारमौच्यत ॥
चिदानन्दोऽयमेतस्य स्थानं परिकरादयः ।
प्राकृतस्य च सत्त्वस्य विकाराः कथिताः पुनः ॥
तथापि नास्ति दोषोऽस्य भृत्य आज्ञाकरो हि सः ।
यः शृणोति तु तद्वाक्यं तस्य सर्वं विनश्यति ॥
इतोऽधिकतरं किञ्चिन्नास्त्यन्यद् विष्णुनिन्दनम् ।
विष्णोः कलेवरं यत्र प्राकृतं ह्येव मन्यते ॥१०१॥
ईश्वरस्य स्वरूपं हि ज्वलितज्वलनो यथा ।
जीवस्वरूपं तस्यैव स्फुलिङ्गानां कणा इव ॥
जीवतत्त्वं हि शक्तिः स्यात् कृष्णतत्त्वं तु शक्तिमत् ।
गीता-विष्णुपुराणादौ प्रमाणं तस्य विद्यते ॥

"तथाहि भगवद्गीतायाम्—

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥६॥

तथाहि विष्णुपुराणे—६।७।६०

विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथा परा।
अविद्या कर्मसंज्ञान्या तृतीया शक्तिरुच्यते ॥७॥"
ईदृशं जीवतत्त्वं तद्ब्रह्मतत्त्वं न्यरूप्यत।
श्रेष्ठं महत्त्वमीशस्य तेनाच्छाद्यत सुस्फुटम् ॥
परिणाम इति व्यासः सूत्रेणैवाश्रितो मतम्।
तर्कमुत्थाप्य तं भ्रान्तं शङ्करः प्रत्यपादयत ॥
परिणामस्वीकृतौ तु विकारी भवतीश्वरः।
इत्युक्त्वा शङ्कराचार्यो विवर्त्तवादमाश्रितः ॥
वस्तुतः परिणामोऽत्र ग्राह्यो मुख्यप्रमाणतः।
देहादिष्वात्मबुद्धिर्हि विवर्त्तस्थानमुच्यताम् ॥
अचिन्तनीयशक्तिर्यद् भगवान् स्वयमीश्वरः।
स्वेच्छया विश्वरूपेण परिणामं स विन्दति ॥
तथाप्यचिन्त्यशक्तित्वादविकार्यैव तिष्ठति।
तस्योदाहरणं चिन्तामणिः प्राकृत ईक्ष्यते ॥
नानारत्नानि जायन्ते यथा चिन्तामणेः स्वतः।
अविकारी मणिः किन्तु स्वरूपेणैव वर्त्तते ॥
यद्येवं प्राकृतं वस्तु भवेदचिन्त्यशक्तिकम्।
ईशस्याचिन्त्यशक्तित्वे विद्यते कोऽत्र विस्मयः ॥१०२॥
प्रणवो हि महावाक्यं वेदानां मूलमुच्यते।
ईश्वरस्य स्वरूपं तत सर्वविश्वाश्रयो हि सः ॥
सर्वाश्रयेश्वरः साक्षात प्रणवेनैव लक्ष्यते।
तत्त्वमसीति वाक्यन्तु वेदैकदेशमात्रकम् ॥
महावाक्यत्वमाच्छाद्य प्रवणस्य प्रयत्नतः।
तत्त्वमसीति वाक्यस्य तथात्वं प्रतिपादितम् ॥

वेदवेदान्तसूत्रेषु कृष्ण एवाभिधीयते ।
त्यक्त्वा तामभिधावृत्तिं गृहीता तेन लक्षणा ॥
वेदः स्वतः प्रमाणं स्यात् प्रमाणानां शिरोमणिः ।
लक्षणायां गृहीतायां स्वतः प्रामाण्यमाहतम् ॥
इत्येवं सर्वसूत्राणां सरलार्थं परित्यजन् ।
आचार्यः कल्पयित्वैव गौणमर्थमदर्शयत् ॥
प्रतिसूत्रीयभाष्यस्य दोषमित्थं प्रकाशयन् ।
श्रोतॄन् सन्न्यासिनः सर्वानकरोद् विस्मितान् प्रभुः ॥
प्राहुः सन्न्यासिनः श्रीमत्स्वामिपाद यथा त्वया ।
भाष्यार्थः खण्डितो युक्त्या विवादो नात्र कश्चन ॥
आचार्यकल्पितोऽर्थोऽयमस्माभिरपि बुध्यते ।
सम्प्रदायानुरोधेन तथापि बहु मन्यते ॥
इदानीं मुख्यया वृत्त्या कुरु व्याख्यां यथाबलम् ।
इत्युक्तः प्रभुपादो मे तथा कर्तुं समुद्यतः ॥१०३॥
वस्तु बृहत्तमं ब्रह्म भगवानिति कथ्यते ।
षड् विधैश्वर्यसम्पन्नं परतत्त्वस्य धाम तत् ॥
स्वरूपैश्वर्ययोस्तस्य मायागन्धो न विद्यते ।
वाच्यवाचकसम्बन्धो भगवद्वेदयोर्भवेत् ॥
अद्धस्वरूपचिच्छक्तिं न मत्वा ब्रह्मणीश्वरे ।
निर्विशेषे मते तस्य पूर्णता परिहीयते ॥
भगवत्प्राप्त्युपाया ये भक्त्याख्याः श्रवणादयः ।
त एव भगवत्-कृष्णप्राप्तये स्युः सहायकाः ॥
कथिताः सर्ववेदेष्वभिधेयत्वेन ते पुनः ।
तत्साधनाख्यया भक्त्या भवेत् प्रेमसमुद्गमः ॥
कथमप्यनुरागश्चेत् कृष्णस्य चरणे भवेत् ।
तं विनान्यत्र कुत्रापि तस्य रागो न जायते ॥

पञ्चमः पुरुषार्थो हि स प्रेमा परमं धनम् ।
आस्वादयति भक्तान स कृष्णस्य माधुरीरसम् ॥
श्रीकृष्णो निजभक्तस्य प्रेम्णैकेन वशीभवेत् ।
प्रेम्णैव लभ्यते भक्तैः कृष्णसेवासुखामृतम् ॥
सम्बन्धश्चाभिधेयञ्च तृतीयञ्च प्रयोजनम् ।
एतानि त्रीणि सूत्रेषु पर्य्यवस्यन्ति निश्चितम् ॥
इत्येवं सर्वसूत्राणां व्याख्यानं प्रभुणा कृतम् ।
श्रुत्वा सन्न्यासिनः सर्वे विनयेनाब्रुवंस्तदा ॥१०४॥
साक्षान्नारायणोऽसि त्वं मूर्त्तिर्वेदमयी तव ।
पूर्वं त्वं निन्दितोऽस्माभिरपराधं क्षमस्व नः ॥
ततः प्रभृति सन्न्यासिगणो व्यावृत्तमानसः ।
कृष्णकृष्णेति तन्नामग्रहणं कृतवान सदा ॥
प्रभुरेवं हि सर्वेषामपराधममर्षयत् ।
श्रीकृष्णनाम सर्वेभ्यः सप्रसादमुपादिशत् ॥
ततः सन्न्यासिनः सर्वे सहादाय महाप्रभुम् ।
पङ्क्तिमध्यं तमध्यास्यागृह्णन भिक्षां द्विजालये ॥
ततो निवासमायातः कृतभिक्षो महाप्रभुः ।
एवं विचित्रलीलां सोऽकरोद् गौराङ्गसुन्दरः ॥
ततः सनातनश्चन्द्रशेखरस्तपनद्विजः ।
श्रुत्वा दृष्ट्वा च तत् सर्वं सानन्दचेतसोऽभवन ॥
ततः सन्न्यासिनः प्रायः प्रभुं द्रष्टुं समागमन ।
प्रभोः प्रशंसया पूर्णाभवद् वाराणसी तदा ॥
भगवत्कृष्णचैतन्ये वाराणस्यामुपस्थिते ।
सा पुरी सह वास्तव्यै-र्महाधन्यत्वमाययौ ॥
नरा लक्षश आगच्छन प्रभोर्दर्शनकाङ्क्षिणः ।
महती जनता द्वारं प्रवेष्टुं नाशक्त्तदा ॥

प्रभौ विश्वेश्वरं द्रष्टुं मन्दिरं प्रति गच्छति ।
मिलिता युगपल्लोकाः पर्यवृण्वन समन्ततः ॥१०५॥
यदावगाहनं कर्त्तुं गङ्गातीरमुपेयिवान ।
तस्मिन्नप्यभवल्लोकसंघट्टः सुमहत्तमः ॥
उद्यद्बाहौ ब्रुवत्येव हरे हर इति प्रभौ ।
रोदसी व्याप्य लोकानामभूदुच्चैर्हरिध्वनिः ॥
इत्थं निस्तारयन्मर्त्यांस्ततो गन्तुमनाः प्रभुः ।
श्रीमद् वृन्दावनं धाम प्रैरयच्छ्रीसनातनम् ॥
वीक्ष्य नक्तन्दिवं लोकान् कोलाहलसमाकुलान ।
वाराणसीं परित्यज्य प्रभुर्लीलाचलं गतः ॥
सविस्तरमिमां लीलां वदिष्याम्यहमग्रतः ।
प्राप्तप्रसङ्ग एवात्र ससंक्षेपमुदाहरम् ॥
एवं श्रीकृष्णचैतन्यः पञ्चतत्त्वात्मकः प्रभुः ।
नाम प्रेम च कृष्णस्य दत्त्वा विश्वमतारयत ॥
प्रैरयन्मथुराधाम स श्रीरूपसनातनौ ।
सेनापतिद्वयं तच्च भक्तिं प्राचारयत्तदा ॥
श्रीनित्यानन्दगोस्वामी स गौड़ान प्रापितोऽमुना ।
अशेषेण विशेषेण भक्तिं तत्राप्यचारयत ॥
दाक्षिणात्ये स्वयं गत्वा ग्रामं ग्रामं परिव्रजन ।
कृष्णनाम्नः प्रचारं स प्रभुर्विहितवान मुदा ॥
गच्छन्नासेतुबन्धं स भक्तिं प्राचारयत स्वयम ।
कृष्णप्रेमधनं दत्त्वा तत्रत्यानुदधारयत ॥१०६॥
इत्येवं कृतवानस्मि पञ्चतत्त्वनिरूपणम् ।
ज्ञानं चैतन्यतत्त्वस्य श्रवणादस्य जायते ॥
श्रीचैतन्यप्रभुर्नित्यानन्दोऽद्वैतश्च ते त्रयः ।
श्रीवासाद्याश्च यावन्तो भक्ता गदाधरादयः ॥

सर्वेषां चरणे तेषां कृत्वा कोटिं नमस्कृतीः ।
किञ्चिद्वदामि चैतन्यविहारञ्च यथायथम् ॥
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स कृष्णदास आह श्रीचैतन्यचरितामृतम् ॥११०॥

इति श्रीचैतन्यचरितामृत आदिखण्डे पञ्चतत्त्वार्थनिरूपणं नाम सप्तमः परिच्छेदः ।

श्रीचैतन्यचरितामृत आदिलीलायां

अष्टमः परिच्छेदः

"वन्दे चैतन्यदेवं तं भगवन्तं यदिच्छया ।
प्रसभं नृत्यते चित्रं लेखरङ्गे जड़ोऽप्यहम् ॥१॥"
जयतात् कृष्णचैतन्यः श्रीमान् गौराङ्गचन्द्रमाः ।
जयतात् परमानन्दो नित्यानन्दः कृपानिधिः ॥
जयत्वद्वैत आचार्यः करुणासागरः प्रभुः ।
जयतात् सुमहाभागः श्रीगदाधरपण्डितः ॥
श्रीमद् गौराङ्गभक्ता ये श्रीवासाद्या जयन्तु ते ।
सर्वेषां पादपद्मानि वन्देऽहं प्रणतो भुवि ॥
येषां स्मरणमाहात्म्यान्मूको भवति सत्कविः ।
गिरिं लङ्घयते पङ्गुरन्धः पश्यति तारकाः ॥
इत्येवं ये न मन्यन्ते सर्वं पण्डितमानिनः ।
विद्यानां पठनं तेषां भेककोलाहलं यथा ॥
अमन्यमानस्तत् सर्वं कृष्णभक्तिं करोति यः ।
तस्मिन् कृष्णकृपा न स्याद् गतिस्तस्य भवेन्न च ॥

जरासन्धादयः पूर्वं राजानोऽपूजयन् भृशम् ।
वेदधर्मानुसारेण विष्णुं नारायणं पुरा ॥
कृष्णं नाद्रियमाणास्ते दैत्या एव मता तथा ।
तं चैतन्यममन्वाना जना दैत्या मतास्तथा ॥
मयि भक्तिमकुर्वाणा विनश्यन्ति जना इति ।
मत्वा जग्राह सन्न्यासं कृपयासौ महाप्रभुः ॥
मां च सन्न्यासि-बुद्ध्यापि मानवानां नमस्यताम् ।
सर्वे दोषा विनश्यन्ति भवेच्च भवनिष्कृतिः ॥१०॥
इत्येवं करुणावन्तं प्रभुं नैव भजन्ति ये ।
असुरेष्वेव गण्यन्ते ते हि सर्वोत्तमा अपि ॥
अतोऽहमूर्द्ध्वबाहुः सन् कथयामि पुनः पुनः ।
श्रीनित्यानन्दचैतन्यौ भज तर्कं त्यजन्निति ॥
अपि चेत्तार्किको वक्ति तर्कः प्रमाणमित्यतः ।
यत्तर्कशास्त्रसिद्धं स्यात्तत् सेव्येतेति तं वद ॥
विचारं कृष्णचैतन्यकृपाया हृदये कुरु ।
विचारे विहिते चित्ते प्राप्स्यस्येव चमत्कृतिम् ॥
करोषि बहु जन्मानि यदि श्रवणकीर्त्तने ।
नैव कृष्णपदे प्रेमधनं तह्यपि लप्स्यसे ॥

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे—१।२२—

ज्ञानतः सुलभा मुक्तिर्भुक्तिर्यज्ञादिपुण्यतः ।
सेयं साधनसाहस्रैर्हरिभक्तिः सुदुर्लभा ॥२॥"

कृष्णोऽवकाशमाप्नोति भुक्तिमुक्ती यदार्पयन् ।
दत्ते तदा न भक्ताय प्रेमभक्तिं सुगूहिताम् ॥

तथाहि श्रीमद्भागवते ५।६।१८—

राजन् पतिर्गुरुरलं भवतां यदूनां
दैवं प्रियः कुलपतिः क्व च किङ्करो वः ।

अस्त्वेवमङ्ग भजतां भगवान मुकुन्दो
मुक्तिं ददाति कर्हिंचित् स्म न भक्तियोगम् ॥३॥"
श्रीनित्यानन्दचैतन्यावदत्तां यत्र तत्र च ।
तत्प्रेम का कथान्येषां तज्जगा-माधयोरपि ॥
स्वतन्त्र ईश्वरः सोऽयं तत्प्रेमगूढ़भाण्डकम् ।
पात्रापात्राविचारेण यस्मै कस्मैचिदार्पयत् ॥
पश्याद्यापीह गृह्णाति चैतन्य इति नाम यः ।
कृष्णप्रेम्नाश्रुरोमाञ्चविह्वलः स भवेत सदा ॥
नित्यानन्द इति प्रोक्ते कृष्णप्रेमोदयो भवेत ।
रोमाञ्चोऽङ्गेऽस्फुटा वाक् च प्रवहत्यश्रुजाह्नवी ॥२०॥
कृष्णनाम्नापराधानां विचारः क्रियते स्फुटम् ।
गृह्यमाणेऽपि तन्नाम्नि विकारो नापराधिनाम् ॥

"तथाहि श्रीमद्भागवते—२।३।२४—

तदश्मसारं हृदयं वतेदं
यद् गृह्यमाणैर्हरिनामधेयैः ।
न विक्रियेताथ यदा विकारो
नेत्रे जलं गात्ररुहेषु हर्षः ॥४॥"

कृष्णनाम्नि सकृत प्रोक्ते सर्वपापं विनश्यति ।
जायते भावभक्तिश्च या प्रेमभक्तिकारणम् ॥
प्रेमोदयेन चित्तस्य द्रवीभावो भवेत्ततः ।
वेपथु-स्वेदरोमाञ्चनेत्राम्बु-गद्गदादयः ॥
भवक्षयो विनायासं भगवतकृष्णसेवनम् ।
गृहीतस्य सकृत कृष्णनाम्नः प्राप्यमियत फलम् ॥
बहुकृत्वो गृहीतेऽपि तादृशे कृष्णनामनि ।
जायते यदि न प्रेमा न वा नेत्राम्बुनिर्गमः ॥

तदा तत्र विजानीयादपराधो महानिति ।
श्रीकृष्णनामबीजस्य नाङ्कुरस्तत्र जायते ॥
नित्यानन्दे च चैतन्ये न तथास्ति विचारणा ।
तौ नाम गृह्णते प्रेम दत्त्वा सेचयतोऽश्रुभिः ॥
अत्युदारस्तु चैतन्यः स्वतन्त्रः प्रभुरीश्वरः ।
नास्ति कस्यापि निस्तारो जातु तद्भजनं विना ॥
आकर्णयत हे मूढ़ा जनाश्चैतन्यमङ्गलम् ।
येन चैतन्यमाहात्म्यं सर्वमवगमिष्यथ ॥
श्रीमद्भागवते कृष्णलीला व्यासेन वर्णिता ।
चैतन्यचरिते व्यासः श्रीवृन्दावनदासकः ॥३०॥
श्रीवृन्दावनदासेन कृतं चैतन्यमङ्गलम् ।
यस्य श्रवणमात्रेण सर्वं नश्यत्यमङ्गलम् ॥
श्रीनित्यानन्द-चैतन्य-महिमा बुध्यते यतः ।
श्रीकृष्णभक्तिसिद्धान्तसीमा येनावगम्यते ॥
भक्तिसिद्धान्तसारो हि यावान् भागवते स्थितः ।
तस्मादुद्धृत्य तावन्तमलिखत् सर्वमत्र सः ॥
यवनोऽपि च पाषण्डी यदि चैतन्यमङ्गलम् ।
आकर्णयेत्तदा तावत् स महावैष्णवो भवेत् ॥
धन्यमेतादृशं ग्रन्थं न निर्मातुं नरः क्षमः ।
श्रीवृन्दावनदासस्य मुखेनाह स्वयं प्रभुः ॥
श्रीवृन्दावनदासाङ्घ्रौ कोटिः प्रणतयो मम ।
निर्मायैतादृशं ग्रन्थं स संसारमतारयत् ॥
यासौ नारायणी देवी चैतन्योच्छिष्टभोजिनी ।
श्रीवृन्दावनदासोऽयं तस्या गर्भादजायत ॥
तेन चैतन्यचारित्रं वर्णितं तत् किमद्भुतम् ।
यस्य श्रवणमात्रेण पूयते भुवनत्रयम् ॥

अतो भजत चैतन्यनित्यानन्दौ जगज्जनाः ।
संसारदुःखनाशेन प्रचुरानन्दमाप्स्यथ ॥
श्रीवृन्दावनदासेन कृतं चैतन्यमङ्गलम् ।
समग्रा तत्र चैतन्यलीला तेनास्ति वर्णिता ॥४०॥
प्रथमं ग्रथिता लीलामालिका तेन सूत्रवत् ।
ततः सविस्तरं पश्चाद्विवृतौ रचिता पुनः ॥
चैतन्यचन्द्रलीलाया न पारो नावधिः क्वचित् ।
लीलायां वर्ण्यमानायां ग्रन्थोऽसौ विस्तृतिं गतः ॥
तथा विस्तृतिमालोक्य तस्य सङ्कुचितं मनः ।
काश्चित् सूत्रधृता लीलास्तस्मात्तेन न वर्णिताः ॥
श्रीनित्यानन्दलीलाया बर्णनाविष्टमानसः ।
चैतन्यस्यान्तिमां लीलां लिखितुं सोऽक्षमोऽभवत् ॥
सर्वासां तस्य लीलानां विवृतिं श्रोतुमुत्सुकाः ।
वर्त्तन्ते वैष्णवाः सर्वे श्रीवृन्दावनवासिनः ॥
कल्पवृक्षतले वृन्दावने काञ्चनसद्मनि ।
सिंहासनं महायोगपीठेऽस्ति रत्ननिर्मितम् ॥
तत्र शोभत आसीनः सदा ब्रजेन्द्रनन्दनः ।
गोविन्ददेवनामासौ मदनो मूर्त्तिमानिव ॥
राजोपकरणैस्तस्य सेवा भवति चित्रधा ।
दिव्यैश्च द्रव्यसम्भारैर्दिव्यैर्वसनभूषणैः ॥
सेवकानां सहस्राणि सेवन्ते तं प्रतिक्षणम् ।
सा सेवा-वर्णनाऽशक्या सहस्रेण मुखैरपि ॥
सेवाध्यक्षः प्रभोस्तत्र श्रीहरिदासपण्डितः ।
व्याप्तं सर्वं जगद् यस्य कीर्त्या च गुणसम्पदा ॥५०॥
सुशीलो मधुराचारः शान्तो गम्भीरधीरधीः ।
दाता सूनृतवादी च सहिष्णुः सोऽभवत् सुधीः ॥

सर्वेषां मानदाता च सर्वेषां हितकारकः ।
हिंसा-कौटिल्य-मात्सर्य्य-हीनचित्तः सदाशयः ॥
आसन् कृष्णस्य पञ्चाशद् ये च साधारणा गुणाः ।
निखिलास्ते गुणास्तस्य देहे सन्ति प्रकाशिताः ॥

"तथाहि श्रीमद्भागवते—५।१८।१२—

यस्यास्ति भक्तिर्भगवत्यकिञ्चना
सर्वैर्गुणैस्तत्र समासते सुराः ।
हरावभक्तस्य कुतो महद्गुणा
मनोरथेनासति धावतो वहिः ॥५॥"

योऽनन्ताचार्य्य इत्याख्यः शिष्योऽभूत पण्डितप्रभोः ।
कृष्णप्रेममयाकारो महार्य्योदारमानसः ॥
तस्यानन्तान गुणान को वा प्रकाशयितुमर्हति ।
तस्य प्रियतमः शिष्यः श्रीहरिदासपण्डितः ॥
विश्वासस्तस्य चैतन्ये नित्यानन्दे च सुस्थिरः ।
चैतन्यचरितं श्रोतुं सदोल्लसितमानसः ॥
वैष्णवानां गुणग्राही न तेषां दोषमीक्षते ।
कायेन मनसा वाचा तांस्तोषयति सर्वदा ॥
चैतन्यमङ्गलं ग्रन्थं स शृणोति निरन्तरम् ।
सर्व्वे तस्य प्रसादेन तत्र शृण्वन्ति वैष्णवाः ॥
गौराङ्गस्यान्त्यलीलाया वर्णनाय यथाक्रमम् ।
महत्या कृपयाविष्टः स आज्ञापयदेव माम् ॥
श्रीकाशीश्वरगोस्वामि-शिष्यो गोविन्दनामकः ।
अनन्यसदृशः प्रेष्ठः श्रीगोविन्दस्य सेवकः ॥६०॥
यादवाचार्य्यगोस्वामी श्रीरूपनित्यसङ्गतः ।
चैतन्यचरिते यस्य बलवान सरसाग्रहः ॥

श्रीमान भूगर्भगोस्वामी शिष्यः श्रीपण्डितप्रभोः ।
वचो नान्यन्मुखे यस्य श्रीगौराङ्गकथां विना ॥
तस्य शिष्यश्च चैतन्यदासो गोविन्दपूजकः ।
चक्रवर्त्ती मुकुन्दश्च प्रेमिकः कृष्णदासकः ॥
चक्रवर्त्ती शिवानन्दो महात्मासौ दिवानिशम् ।
श्रीनित्यानन्द-चैतन्यचिन्तया वर्त्ततेऽनिशम् ॥
लीलामृतं सदा राधाकृष्णयोः पिबतोप्सितम् ।
नान्यं कञ्चन जानाति विना मदनमोहनम् ॥
यावन्तश्चापरे भक्ताः श्रीवृन्दावनवासिनः ।
गौराङ्गस्यान्तिमां लीलां श्रोतुं सर्वे समुत्सुकाः ॥
अददुः कृपया मह्यमाज्ञां सर्वे तथैव ते ।
अतो लिखामि निर्लज्जस्तेषामादेशगौरवात् ॥
वैष्णवानां तथादेशं प्राप्य चिन्ताकुलान्तरः ।
गत्वा मदनगोपालमाज्ञां याचितवानहम् ॥
दृष्ट्वा श्रीभगवन्तं तं कृतवान् पादवन्दनम् ।
तदा गोस्वामिदासाख्यः पूजकस्तमसेवत ॥
पादपद्मे स देवस्य तथादेशमयाचत ।
पुष्पमाला प्रभोः कण्ठात्तदैव प्रच्युतापतत् ॥१०॥
तद्दृष्ट्वा वैष्णवाः सर्वे कृतवन्तो हरिध्वनिम् ।
गोस्वामिदास आनीय मत्कण्ठे तां समादधात् ॥
आज्ञामाल्यमहं प्राप्य परमानन्दितोऽभवम् ।
ग्रन्थस्यास्य समारम्भे तत्प्राप्तिर्हेयेव कारणम् ॥
मया लेखयति ग्रन्थं देवो मदनमोहनः ।
मम लेखनमेतत्तु शुकस्य पठनं यथा ॥
मया मदनगोपालो यथा लेखयते तथा ।
अहं लिखामि पाञ्चाली नर्त्यते मायिना यथा ॥

सनातनेन रूपेण रघुनाथेन चार्च्चितः ।
मत्कुलस्याधिदेवोऽसौ श्रीमन्मदनमोहनः ॥
श्रीवृन्दावनदासस्य पादपद्मं विचिन्तयन् ।
तस्याज्ञां शिरसादाय लिखामोदं शुभङ्करम् ॥
व्यासश्चैतन्यलीलायां श्रीवृन्दावनदासकः ।
नान्यो वक्तुमलं किञ्चित्तस्यैवानुग्रहं विना ॥
मूर्खो नीचाधमः क्षुद्रो विषयामिषलोलुपः ।
वैष्णवाज्ञाबलेनैव कुर्य्यामेतद्धि साहसम् ॥
बलमेतच्च पादानां श्रीरूप-रघुनाथयोः ।
सिध्यन्ति स्मरणाद् येषां सकलानीप्सितानि च ॥
पादपद्मेषु यस्याशा श्रीरूपरघुनाथयोः ।
स ब्रुते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥८०॥

इति श्रीचैतन्यचरितामृत आदिलीलायां ग्रन्थकरणे
वैष्णवाज्ञारूपकथनं नामाष्टमः परिच्छेदः ।

श्रीचैतन्यचरितामृत आदिलीलायां

नवमः परिच्छेदः ।

"तं श्रीमत्कृष्णचैतन्यदेवं वन्दे जगद्गुरुम् ।
यस्यानुकम्पया श्वापि महाब्धिं सन्तरेत् सुखम् ॥१॥"
जयतात् कृष्णचैतन्यो जयताद् गौरचन्द्रमाः ।
जयत्वद्वैत आचार्य्यो नित्यानन्दो जयत्वसौ ॥
श्रीनिवासादयः सर्वे गौरभक्ता जयन्त्यमी ।
येषां स्मरणसौभाग्यं सर्वाभीष्टं प्रपूरयेत् ॥
श्रीरघुनाथभट्टश्च श्रीरूपश्रीसनातनौ ।
श्रीजीवभट्टगोपालौ दासश्च रघुनाथकः ॥

इत्येतेषां प्रसादेन श्रीचैतन्यगुणावलीम् ।
अहं जानन्नजानन् वा लिखाम्यात्मविशुद्धये ॥
"मालाकारः स्वयं कृष्णः प्रेमामरतरुः स्वयम् ।
दाता भोक्ता तत्फलानां यस्तं चैतन्यमाश्रये ॥२॥"
प्रभुणोक्तमहं विश्वम्भरेत्याख्यां गृहीतवान् ।
विश्वं बिभर्मि चेत् प्रेमृणा सार्थक्यं याति सा तदा ॥
इति ध्यात्वा स जग्राह मालाकारव्रतं प्रभुः ।
आरब्धवान्नवद्वीपे फलाद्यानविधिं ततः ॥
समानीय पृथिव्यां स कृष्णचैतन्यमालिकः ।
सिञ्चन्निच्छाम्बुना भक्तिकल्पवृक्षमरोपयत् ॥
श्रीमाधवपुरीस्वामी कृष्णप्रेममहाम्बुधिः ।
भक्तिकल्पतरोः सोऽयं जयतात् प्रथमोऽङ्कुरः ॥
तत्रेश्वरपुरीरूपः सुपुष्टः सोऽयमङ्कुरः ।
अजायत महास्कन्धः स्वयं चैतन्यमालिकः ॥
निजयाचिन्त्यशक्त्यैव स्कन्धोऽभून्मालिकः स्वयम् ।
शाखानां किल सर्वासां स्कन्धोऽसौ मूलमाश्रयः ॥१०॥
पुरीश्रीपरमानन्दस्तथा केशवभारती ।
ब्रह्मानन्दपुरी स्वामी श्रीब्रह्मानन्दभारती ॥
पुरीविष्णुः पुरीकृष्णानन्दश्च केशवः पुरी ।
तीर्थाख्यः श्रीनृसिंहश्च सुखानन्दपुरी तथा ॥
एतानि नव मूलानि निर्ययुर्वृक्षमूलतः ।
अष्टौ मूलानि वृक्षस्य स्थिरत्वं समपादयन् ॥
पुरी श्रीपरमानन्दो मध्यमूलं महादृढम् ।
मूलाष्टकेन तं वृक्षं दिक्ष्वष्टासु व्यधात् स्थिरम् ॥
ततः स्कन्धादचीयन्त बह्वयः शाखाः समन्ततः ।
उपर्य्युपरि चासंख्याः शाखास्ताभ्यो विनिर्गताः ॥

जातं विंशतिशः शाखागणैरेकैकमण्डलम् ।
ब्रह्माण्डगणमातन्वन्शाखा विपुलविस्तृताः ॥
एकैकस्याश्च शाखाया उपशाखाः सहस्रशः ।
उपाचीयन्त यावत्यस्ताः संख्यातुं क्षमेत कः ॥
प्रथमं मुख्यशाखानां नामानि गणयाम्यहम् ।
यूयं शृणुत सश्रद्धं करोमि वृक्षवर्णनम् ॥
वृक्षस्योपरिशाखातः स्कन्धद्वयमजायत ।
अद्वैतः प्रथमः स्कन्धो नित्यानन्दस्तथापरः ॥
तस्मात् स्कन्धद्वयाच्छाखा भूयिष्ठाश्च समुद्गताः ।
ताभ्यो जातोपशाखाभिर्व्याप्तश्च निखिलं जगत ॥२०॥
महाशाखोपशाखाश्च तदुद्भिन्नाश्च शाखिकाः ।
व्याप्नुवन सकलं विश्वं कस्ता वर्णयितुं क्षमः ॥
शिष्य-प्रशिष्यवृन्देनोपशिष्याणां गणेन च ।
असंख्येयेन विश्वानि व्याप्तानि च निरन्तरम् ॥
यथा फलन्ति सर्वाङ्गं फलान्युडुम्बरद्रुमे ।
तथा फलानि जातानि सर्वतो भक्तिपादपम् ॥
प्रधानस्कन्धशाखाभ्यः प्रशाखाभ्यश्च सर्वतः ।
जितामृतानि जातानि नानाप्रेमफलानि च ॥
प्रेमफलानि पक्वानि पीयूषमधुराणि च ।
ददौ विनैव मूल्येन कृष्णचैतन्यमालिकः ॥
यावन्ति धनरत्नानि वर्त्तन्ते जगतीत्रये ।
तावन्त्येकफलस्यापि न मूल्यं गणयाम्यहम् ॥
योग्यं पात्रमपात्रं वा याचको वा न याचकः ।
नेत्थं चक्रे विचारं स ददामीत्येव बुद्धवान ॥
चिक्षेपाञ्जलिपूर्णानि फलान्येष समन्ततः ।
उच्छ्रित्याभक्षयन्दीना मालाकारो जहास च ॥

मालाकारोऽब्रवीदेवं भो भो वृक्षपरिग्रहाः ।
मूलशाखोपशाखाश्च यूयं शृणुत मद्वचः ॥
अलौकिको हि वृक्षोऽयं सकलेन्द्रियकर्मकृत ।
स्थावरोऽपि स्वयं धर्मान जङ्गमस्य वहत्यसौ ॥३०॥
सर्वाण्यङ्गानि वृक्षस्य चेतनानि भवन्ति हि ।
क्रमशो वर्द्धमानानि व्याप्नुवन्त्यखिलं जगत ॥
मालाकारोऽहमेकाकी गच्छेयं कुत्र कुत्र वा ।
फलानि कति वैकाकी पातयन वितराम्यहम ॥
एकाकी स्वयमुच्चित्य ददच्छ्रान्तो भवाम्यहम् ।
कः प्राप्नोति नवाप्नोतीत्येष मे जायते भ्रमः ॥
आज्ञापयाम्यतः सर्वान युष्मानेव पृथक् पृथक् ।
यस्मै कस्मैचन प्रेमफलानि दत्त सर्वतः ॥
मालाकारोऽहमेकाकी कियद्भुञ्जीय वा फलम् ।
अप्रदत्तैः फलैरेभिः किमियद्भिः करोम्यहम् ॥
आत्मवाञ्छानुसारेण वृक्षं सिञ्चाम्यनारतम् ।
यस्मात फलान्यसंख्यानि वर्त्तन्ते पादपोपरि ॥
अतः फलानि सर्वाणि सर्वेभ्यो दत्त सर्वदा ।
अजरा अमराः सन्तु भुक्त्वा तान्यखिला जनाः ॥
भुवनव्यापिनी पुण्या ख्यातिर्मम भविष्यति ।
यशांसि मम गास्यन्ति प्राप्नुवन्तः सुखं जनाः ॥
अस्मिन् भारतवर्षे यो नररूपेण जायते ।
सोऽन्येषामुपकुर्वाणो जन्मसाफल्यमृच्छतु ॥

"तथाहि श्रीमद्भागवते १०।२२।२४ :—

एतावज्जन्मसाफल्यं देहिनामिह देहिषु ।
प्राणैरर्थैर्धिया वाचा श्रेय आचरणं सदा ॥३॥

विष्णुपुराणे १३।१२।४५ :—

प्राणिनामुपकाराय यदेवेह परत्र च ।
कर्मणा मनसा वाचा तदेव मतिमान् भजेत ॥४॥
मालाकारो मनुष्योऽहं न मे राज्यं धनानि वा ।
उपार्जयाम्यहं पुण्यं फलं पुष्पं समर्पयन ॥४०॥
मालिकोऽपि स्वयं वृक्षः संवृत्तोऽस्मि तथेच्छया ।
सर्वप्राण्युपकारो हि वृक्षादेव प्रजायते ॥

"तथाहि श्रीमद्भागवते १०।२२।२३ :—

अहो एषां वरं जन्म सर्वप्राण्युपजीविनाम् ।
सुजनस्येव येषां वै विमुखा यान्ति नार्थिनः ॥५॥"
चैतन्यमालिकेनैवं समादेशे कृते ततः ॥
सर्वे वृक्षपरीवाराः परमानन्दमाप्नुवन ॥
प्रेमफलानि सर्वेभ्यो ददुस्ते यत्र तत्र च ।
मत्ताः प्रेमफलास्वादाद् व्याप्नुवन्निखिलं जगत ॥
भुक्त्वा स्वोदरपूरं तान्यत्यन्तं मादकानि ते ।
प्रमत्ताः सकला लोका जहसुर्ननृतुर्जगुः ॥
धरायां लुलुठुः केऽपि हुङ्कारं केऽपि चुक्रुशुः ।
एवमालोक्य सानन्दं मालाकारो जहास च ॥
मालिकोऽस्वाविदं प्रेमफलं भुक्त्वा निरन्तरम् ।
प्रमत्तो विह्वलो भूत्वा सर्वदा विवशोऽभवत ॥
असौ सर्वजनानात्मसमान मत्तांश्चकार च ।
न केचित् समदृश्यन्त प्रेममत्तान विना जनान् ॥
प्रमत्तोऽयमिति प्रोच्य ये निनिन्दुर्जनाः पुरा ।
ननृतुस्तेऽपि तद्भुक्त्वा साधु साध्विति चाब्रुवन ॥
एषा प्रेमफलानां हि विवृतिर्विहिता मया ।
शाखानां फलदात्रीणां श्रूयतां नाम सम्प्रति ॥

Bhaja Nitai Gour Radhe Syam Japa Hare Krishna Hare Ram.

य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स कृष्णदास आह श्रीचैतन्यचरितामृतम् ।।५०।।

इति श्रीचैतन्यचरितामृते आदिखण्डे भक्तिकल्पतरु-
वर्णनं नाम नवमः परिच्छेदः ।

श्रीचैतन्यचरितामृत आदिलीलायां

दशमः परिच्छेदः

"श्रीचैतन्यपदाम्भोजमधुपेभ्यो नमो नमः ।
कथञ्चिदाश्रयाद् येषां श्वापि तद्गन्धभाग्भवेत् ।।१।।"
जयतात् कृष्णचैतन्यो नित्यानन्दो जयत्यसौ ।
जयत्यद्वैतचन्द्रश्च गौरभक्ता जयन्ति च ।।
मालिकस्यास्य वृक्षोऽयमनिर्वाच्यस्वरूपकः ।
श्रूयतामधुना मुख्यशाखानां नामवर्णनम् ।।
ये ये पारिषदा आसन् श्रीचैतन्यमहाप्रभोः ।
तेषां शक्यं न निश्चेतुमन्योन्यं गुरुलाघवम् ।।
महान्तो ये च यावन्तस्तान सर्वान गणयाम्यहम् ।
कोऽपि कर्तुं न शक्नोति तेषां ज्येष्ठलघुक्रमम् ।।
अत एवास्मि सर्वेषां तेषां पादाम्बुजे नतः ।
तन्नामान्येव गृह्णामि दोषो मा गृह्यतां मम ।।

"तथाहि—

वन्दे श्रीकृष्णचैतन्य-प्रेमामरतरोः प्रियान् ।
शाखारूपान् भक्तगणान् कृष्णप्रेमफलप्रदान् ।।२।।"

श्रीवासपण्डितो नाम नाम्ना श्रीरामपण्डितः।
द्वे शाखे भ्रातरौ तौ द्वौ जगतीजनविश्रुतौ ॥
श्रीपति-श्रीनिधी नामापरौ द्वौ तत्सहोदरौ।
तस्य भ्रातृचतुष्कस्य दास्यो दासाः परिग्रहाः ॥
शाखाद्वयस्य ते सर्वे उपशाखाश्च सम्मताः।
सदा सङ्कीर्तनं तेषामालयेऽभून्महाप्रभोः ॥
चत्वारो भ्रातरौ वंश्यैरसेवन्त महाप्रभुम्।
गौरचन्द्रं विना देवं देवीं वा नैव तेऽविदुः ॥
अपरा महती शाखाचार्यरत्नोपनामिका।
तस्याः शाखोपशाखाश्च तत्परीवारमण्डलम् ॥१०॥
आसीदाचार्यरत्नस्य नाम श्रीचन्द्रशेखरः।
देवीभावेन यद्गेहेऽनृत्यच्चैतन्य ईश्वरः ॥
विद्यानिधिर्महाशाखा श्रीपुण्डरीकनामकः।
यन्नाम व्याहरन्नुच्चैः स्वयं रुदितवान् प्रभुः ॥
महाशाखा च गोस्वामी श्रीगदाधरपण्डितः।
स्वयं लक्ष्मीस्वरूपोऽसौ यत्तुल्यो नैव कश्चन ॥
तस्य शिष्योपशिष्यास्त उपशाखाः प्रकीर्तिताः।
एवं सकलशाखानामुपशाखा उदाहृताः ॥
प्रभोः प्रेष्ठोऽभवद्धृद्यः श्रीवक्रेश्वरपण्डितः।
चतुर्विंशतिकान् यामान् यो ननर्तैकभावतः ॥
यस्मिन्नृत्यति चैतन्यो गीतवांश्च स्वयं प्रभुः।
वक्रेश्वर उवाचेदं गृहीत्वा चरणौ प्रभोः ॥
मह्यं दश सहस्राणि गन्धर्वान् देहि सुन्दर।
तेषु नृत्यत्सु गायेयं यद्यहं स्यां सुखी तदा ॥
प्रभुणोक्तश्च पक्षोऽसि त्वमेको मम पक्षतौ।
गच्छाम्याकाशमुत्प्लुत्य यदि पक्षान्तरं लभे ॥

पण्डितो जगदानन्दः प्रभोः प्राणस्वरूपकः ।
सत्यभामास्वरूपोऽसावित्येषा लोकविश्रुतिः ॥
कर्तुमैच्छत् स सम्प्रीत्या प्रभोर्लालनपालने ।
लोकभीत्या च वैराग्यात्तद्वचो नाश्रृणोत् प्रभुः ॥२०॥
उभौ विवदमानौ तौ कटूक्तिं चक्रतुः सदा ।
तस्य प्रीतिकथामग्रे वर्णयिष्यामि सर्वदा ॥
प्रभोरनुचरो मुख्यो नाम्ना राघवपण्डितः ।
मुख्या शाखा च तस्यै का करः श्रीमकरध्वजः ॥
तत्स्वसा दमयन्त्याख्या प्रियदासी महाप्रभोः ।
सा प्रभोर्भोज्यसम्भारांश्चक्रे द्वादशमासिकान ॥
तैः सर्वैर्भोज्यसम्भारैः पूरयित्वा करण्डिकाम् ।
राघवस्तां समादाय सुगुप्तं प्रभुमानयत ॥
प्रभुर्द्वादश मासांस्तानुपायुङ्क्त स्वयेच्छया ।
मञ्जूषा राघवस्येति यस्याः ख्यातिरभूत्तदा ॥
तां सर्वां भोज्यसामग्रीमग्रे वक्ष्ये सविस्तरम् ।
यां श्रृण्वतां हि भक्तानामश्रुधारा वहन्त्यहो ॥
प्रभोरासीदतिप्रेष्ठः श्रीगङ्गाधरपण्डितः ।
यस्य स्मरणमात्रेण भवबन्धो विनश्यति ॥
श्रीमान पुरन्दराचार्यः कृष्ण-चैतन्य-पार्षदः ।
यं पितेति स्वयं प्रोचे प्रभुर्गौराङ्गसुन्दरः ॥
प्रेमोदग्रा च शाखासौ श्रीदामोदरपण्डितः ।
श्रीमन्महाप्रभौ साक्षाद् वाक्यदण्डं व्यधत्त यः ॥
वाक्यदण्डकथामग्रे कथयिष्यामि विस्तृताम् ।
यं प्राहिणोन्नवद्वीपं तुष्टो दण्डेन स प्रभुः ॥३०॥
अथ शाखानुजस्तस्य श्रीमान् शङ्करपण्डितः ।
प्रभुपादोपधानाख्यः सर्वेषां विदितो हि यः ॥

यस्याशा प्रभुपादाब्जे स सदाशिवपण्डितः ।
अवसत प्रथमं तावन्नित्यानन्दो यदालये ॥
उपासको नृसिंहस्य प्रद्युम्नब्रह्मचार्यसौ ।
नृसिंहानन्द इत्याख्यां ददौ यस्मै महाप्रभुः ॥
शाखान्या परमोदारश्रीनारायणपण्डितः ।
ज्ञातवान्न किमप्यन्यद् यश्चैतन्यमदं विना ॥
शाखा च पण्डितः श्रीमान स प्रभोर्निजकिङ्करः ।
उदगृह्णात प्रदीपं यो नृत्यति श्रीमहाप्रभौ ॥
शाखा शुक्लाम्बरो ब्रह्मचारी सौभाग्यवान परम् ।
यस्यान्नं भगवान याचन् प्रसह्याच्छिद्य भुक्तवान् ॥
आचार्यो नन्दनो नाम शाखा भुवनविश्रुता ।
प्रभुद्वयं गृहे यस्य सुगुप्तं समवस्थितम् ॥
शाखा मुकुन्ददत्तश्च सहाध्यायी महाप्रभोः ।
अनृत्यत प्रभुचैतन्यो यस्मिन् गायति कीर्तनम् ॥३८॥
श्रीवासुदेवदत्तो हि प्रभोर्भृत्यो महाशयः ।
यद्गुणा नैव कथ्येरन् सहस्रेण मुखैरपि ॥३९॥
यावन्तो भुवने जीवास्तेषां पापानि यः स्वयम् ।
गृहीत्वा नरकं भोक्तुमैच्छत्तान रक्षितुं ततः ॥४०॥
शाखान्याद्भुतचारित्रो हरिदासो हि ठक्कुरः ।
अभङ्गेनाजपन्नाम प्रत्यहं यस्त्रिलक्षशः ॥
तस्यानन्ता गुणा आसन दिङ्मात्रं कथ्यते मया ।
यं भोजयितुमाचार्यः श्राद्धपात्रं न्यवेदयत ॥
प्रह्लादस्येव तस्यासीत् सर्वभक्तगुणावली ।
यवनैस्ताड्यमानोऽपि नाक्षुभ्यद् यो मनागपि ॥
तस्य सिद्धौ मृतं देहं क्रोड़े कृत्वा महाप्रभुः ।
महाकौतूहलाक्रान्तो मुहुर्नर्त्तितवान स्वयम् ॥

श्रीवृन्दावनदासेन तस्य लीलाः सुवर्णिताः ।
अवशिष्टास्ति या काचिदग्रे सा वक्ष्यते मया ॥
उपशाखाश्च तस्यैव कुलीनग्रामवासिनः ।
सत्यराजादयस्तस्य कृपाभाजनतां गताः ॥
मुरारिगुप्तनामासौ गुप्तप्रेमधनालयः ।
यद्दैन्यं शृण्वतो नूनं गलितं हृदयं प्रभोः ॥
अप्रतिग्राहकः सोऽयं न कस्याप्याददे धनम् ।
कृतवानात्मवृत्त्यैव कुटुम्बप्रतिपालनम् ॥
यश्चिकित्साश्चकारासौ सदा सदयमानसः ।
देहव्याधि-भवव्याधी उभौ तस्य क्षयं गतौ ॥
श्रीमान् मुरारिसेनोऽयं श्रीप्रभोः सेवकोत्तमः ।
नान्यत् किमप्यजानात स चैतन्य-चरणौ विना ॥५०॥
श्रीगदाधरदासो हि शाखा सर्वोपरि स्थिता ।
यवनप्राड्विवाकैर्यो हरिध्वनिमकारयत् ॥
श्रीशिवानन्दसेनोऽसौ प्रभोरान्तर-किङ्करः ।
सर्वं प्राप्तुं प्रभोः पादौ तस्य साहाय्यमाश्रयन् ॥
प्रभोर्गणान् समादाय पथि तांश्च सुपालयन् ।
नीलाचले प्रभुस्थानं सोऽगच्छत् प्रतिवत्सरम् ॥
साक्षाद्रूपन्तथावेशरूपाविर्भावरूपके ।
इत्येवं त्रिविधै रूपैः स्वभक्तान् दयते प्रभुः ॥
निर्विशेषं समैक्षन्त भक्ताः साक्षान्महाप्रभुम् ।
आवेशो नकुलब्रह्मचारिदेहेऽभवत् प्रभोः ॥
प्रदुम्नब्रह्मचारीति नाम तस्याभवत् पुरा ।
नृसिंहानन्द इत्याख्यां तस्मै पश्चाद्ददौ प्रभुः ॥
आविर्भावोऽभवत्तस्मिंश्चैतन्यस्य महाप्रभोः ।
बहवोऽलौकिका भावा एवमेवाभवन् प्रभोः ॥

एतान् सेनशिवानन्दः सर्वानास्वादयद्रसान् ।
सर्वमानन्दवृत्तान्तमग्रे वक्ष्ये सविस्तरम् ॥
शिवानन्दोपशाखा हि तद्भृत्यतनुजादयः ।
सर्वे परिकरास्तस्य कृष्णचैतन्यकिङ्कराः ॥
तनयास्तस्य चैतन्यदासोऽथ रामदासकः ।
तृतीयः कर्णपूरश्च भक्तशूरास्त्रयो मताः ॥६०॥
श्रीमान् बल्लभसेनश्च सेनश्रीकान्त इत्यमू ।
शिवानन्दस्य सम्पर्कात् प्रभावेकान्तभक्तिकौ ॥
गोविन्दानन्द इत्याख्यो महाभागवतः प्रियः ।
प्रभोर्गोविन्ददत्तश्च प्रियः कीर्त्तनगायकः ॥
श्रीमान् विजयदासाह्वः कीर्त्तनाक्षरिकः प्रभोः ।
नानाग्रन्थाँल्लिखित्वासौ प्रभवे प्रददौ पुरा ॥
उपनाम चकारास्य रत्नबाहुरिति प्रभुः ।
प्रभोरकिञ्चनो भृत्यः कृष्णदासाभिधानकः ॥
रम्भावल्कल-विक्रेता श्रीधरः प्रियकिङ्करः ।
परिहासं प्रभुर्नित्यं येन सार्द्धं समाचरत् ॥
रम्भापुष्पफलादीनि यस्माज्जग्राह चान्वहम् ।
छिद्रितायसपात्रेण यस्य वारि पपौ प्रभुः ॥
प्रभोः प्रियतमो दासो भगवान्नाम पण्डितः ।
श्रीकृष्णोऽधिष्ठितः पूर्वं यस्य पूत-कलेवरम् ॥
पण्डितो जगदीशश्च हिरण्यश्च महाशयः ।
दयामयः प्रभुर्बाल्ये करुणां कृतवान् ययोः ॥
याचन् श्रीविष्णुनैवेद्यमेकादश्यां तिथौ प्रभुः ।
उभयोरेतयोर्गेहे स्वयं भक्षितवान् मुदा ॥
प्रभोरन्तेवसन्तौ द्वौ पुरुषोत्तम-सञ्जयौ ।
वैयाकरणशिष्याणां वरेण्यौ तौ महाशयौ ॥७०॥

पण्डितो वनमालीति शाखासौ लोकविश्रुता ।
यो ददर्श प्रभोर्हस्ते हैमे मुषललाङ्गले ॥
श्रीबुद्धिमन्त-खानाख्यः श्रीचैतन्यस्य सुप्रियः ।
सेवकानामसौ मुख्यस्तस्याज्ञापालकः सदा ॥
पण्डितो गरुड़ो नाम श्रीनाममङ्गलाश्रयः ।
असौ नामबलेनैव विषशक्तिमपाहरत ॥
श्रीगोपीनाथसिंहाह्वः श्रीचैतन्यस्य किङ्करः ।
उक्तवान परिहासार्थं यमक्रूर इति प्रभुः ॥
देवानन्दस्तथा वक्रेश्वरो भागवताश्रितौ ।
भागवतस्य भक्त्यर्थं प्रापतुः कृपया प्रभोः ॥
ये तु श्रीखण्ड-वास्तव्या मुकुन्दो रघुनन्दनः ।
नरहरिश्चिरञ्जीवस्तथैव श्रीसुलोचनः ॥
ते च सर्वे महाशाखाश्चैतन्यानुग्रहाश्रिताः ।
प्रेमपुष्पफलान्येते व्यतरन यत्र तत्र च ॥
सत्यराजस्तथा रामानन्दश्च यदुनाथकः ।
पुरुषोत्तम इत्याख्यो विद्यारत्नाख्यशङ्करः ॥
श्रीवाणीनाथवस्वाद्याः कुलीन-ग्रामवासिनः ।
चैतन्य-जीवनाः सर्वे श्रीचैतन्यस्य किङ्कराः ॥
कुलीनग्रामवास्तव्यः कुक्कुरोऽपि मम प्रियः ।
तत्रत्यानां मनुष्याणां का कथेत्यवदत प्रभुः ॥८०॥
कुलीनग्रामसौभाग्यं व्यक्तं वक्तुं न शक्यते ।
कृष्णं गायति नीचोऽपि शूकरांश्चारयन् वने ॥
श्रीमाननुपमः ख्यातौ श्रीरूपश्रीसनातनौ ।
तिस्रः शाखा हि वृक्षस्य पश्चिमाः सकलोत्तमाः ॥
तत्र शाखे महत्यौ द्वे श्रीरूपश्रीसनातनौ ।
उपशाखा ह्यनुपमजीवराजेन्द्रमुख्यकाः ॥

ते द्वे शाखे अवर्द्धेतां मालाकारस्य वाञ्छया ।
ते वृद्धे पश्चिमं देशं समग्रं व्याप्नुतां क्रमात् ॥
ते आसिन्धुनदीतीरं तथैवाहिमपर्वतम् ।
वृन्दावनं तथा देशान् मथुरादींश्च सर्वतः ॥
ते च प्रेमफलैः सर्वान् समाच्छादयतां ततः ।
लोकाः प्रेमफलास्वादं लब्ध्वोन्मत्तहृदोऽभवन् ॥
आसन् मूढ़ा अनाचारा मनुजास्तत्र पश्चिमे ।
ताभ्यां भक्तिसदाचारौ द्वाभ्यां तत्र प्रचारितौ ॥८७॥
शास्त्रावलोकनेनैव लुप्ततीर्थं समुद्धतम् ।
कृतं श्रीमूर्तिसेवाया वृन्दारण्ये प्रचारणम् ॥८८॥
श्रीरघुनाथदासश्च प्रियभृत्यो महाप्रभोः ।
स सर्वस्वं परित्यज्यावसत् पादतले प्रभोः ॥
दामोदरस्वरूपाय प्रभुणासौ समर्पितः ।
स्वरूपेण समं गुप्तसेवां स कृतवान् प्रभोः ॥९०॥
चक्रे षोड़शवर्षाणि सोऽन्तरङ्गनिषेवनम् ।
स्वरूपेऽन्तर्हिते तत्र स श्रीवृन्दावनं गतः ॥
वृन्दारण्ये द्वयोर्भ्रात्रोर्वन्दमानः पदाम्बुजम् ।
त्यक्ष्यामि भृगुपातेव देहं गोवर्द्धने गिरौ ॥
इति निश्चित्य चित्तेन स वृन्दावनमागतः ।
विलोकयाञ्चकारासौ श्रीरूपश्रीसनातनौ ॥
तं न्यवारयतां मृत्योस्ताबुभौ भ्रातरौ तदा ।
तृतयं भ्रातरं कृत्वाऽन्तिकेऽस्थापयताञ्च तम् ॥
वाह्याश्चान्तरिकीर्लीलास्तावतीः श्रीमहाप्रभोः ।
तन्मुखाद्भ्रातरौ तौ द्वौ श्रुतवन्तौ निरन्तरम् ॥
अन्नं पानञ्च तत्याज मुमोचान्याः कथास्ततः ।
असौ द्वित्रपलं मस्तु केवलं प्रत्यहं पपौ ॥

लक्षकृत्वोऽजपन्नाम सहस्रकृत्व आनमत्।
दण्डवत् प्राणमन्नित्यं सहस्रं वैष्णवानसौ ॥
राधाकृष्णौ द्विवारात्रं मानसेन न्यषेवत।
याममात्रमुवाचाथ चरितं श्रीमहाप्रभोः ॥
अभग्ननियमं सस्नौ राधाकुण्डे त्रिसन्ध्यकम्।
वैष्णवान व्रजवास्तव्यानाश्लेषेण समार्चयत् ॥
स सार्द्धसप्तयामांश्च प्रेमभक्तिमसाधयत।
चतुर्दण्डमिता निद्रा तस्य सापि क्वचिन्नवा ॥१००॥
तस्यैषा साधनारीतिः श्रोतुर्विस्मयकारिणी।
सरूपो रघुनाथश्च द्वावुभौ हि मम प्रभू ॥
यथा सर्वे महात्मानस्ते चैतन्येन सङ्गताः।
अग्रतो वर्णयिष्यामि तथा सर्वं सविस्तरम् ॥
आचार्यः शङ्करारण्यः शाखैका तस्य वै तरोः।
काशीनाथो मुकुन्दश्च रुद्रस्तस्योपशाखिकाः ॥
चैतन्यस्य कृपापात्रं श्रीनाथो नाम पण्डितः।
कृष्णसेवां समालोक्य वशे यस्य जगत्रयम् ॥
आचार्यश्च जगन्नाथः प्रभोः स प्रियकिङ्करः।
गङ्गावासः कृतो येन निदेशेन महाप्रभोः ॥
श्रीकृष्णदासवैद्यश्च तथा पण्डितशेखरः।
कविचन्द्रस्तथा षष्ठीवरः कीर्तनगायकः ॥

नाथमिश्रः शुभानन्देशानौ श्रीराम एव च ।
श्रीनिधिर्भगवान मिश्रः श्रीगोपीकान्त इत्यपि ॥
कमलो हृदयानन्दः सुबुद्धिर्नयनस्तथा ।
पण्डितश्च महेशाख्यः करश्रीमधुसूदनः ॥
श्रीजगन्नाथदासश्च पुरुषोत्तमपालितः ।
श्रीचन्द्रशेखरो वैद्यो हरिदासद्विजस्तथा ॥११०॥
कविचन्द्रो रामदासः श्रीगोपालाख्यदासकः ।
श्रीभागवत आचार्यो दासः शारङ्गठक्कुरः ॥
द्विजश्च जानकीनाथः श्रीजगन्नाथतीर्थकः ।
श्रीगोपालाख्य आचार्यो वाणीनाथस्तथा द्विजः ॥
गोविन्दो माधवो वासुदेवश्च सोदरास्त्रयः ।
येषु गायत्सु चैतन्यनित्यानन्दावनृत्यताम् ॥
रामदासाभिरामो हि सख्यप्रेममहाम्बुधिः ।
द्वात्रिंशज्जनवाह्यं यः काष्ठं वंशीमिवाचरत् ॥
नित्यानन्दः प्रभोराज्ञां लब्ध्वा गौड़ान यदागमत् ।
तदा ये प्रभुणादिष्टास्त्रयस्तेन समं गताः ॥
ते वासुदेवघोषश्च श्रीरामदासमाधवौ ।
गोविन्दस्त्वाप्तसन्तोषः स्थितवान् प्रभुसन्निधौ ॥
चिरञ्जीवस्तथाचार्यौ श्रीभागवतमाधवौ ।
तथैव कमलाकान्तो नन्दनान्तौ यदू रघुः ॥
भ्रातरौ द्वौ जगामाधौ कृपापात्रे महाप्रभोः ।
पतितोद्धारधर्मस्य साक्षिणौ यौ बभूवतुः ॥
भक्ताः संक्षेपतः प्रोक्ताः श्रीनवद्वीपवासिनः ।
नतु चैतन्यभक्तानामानन्त्याद् गणना भवेत् ॥
एते सर्वे प्रभोः पार्श्वे भक्ता नीलाचले स्थिताः ।
प्रभुं नानाविधैर्भावैरसेवन्त पुरद्वये ॥१२०॥

ये भक्ताः केवलं नीलाचल एव स्थिताः प्रभोः ।
इदानीं ते समासेन गण्यन्ते नामतो मया ॥
नीलाचले स्थिता भक्ता यावन्तः प्रभुणा सह ।
सर्वेभ्योऽभ्यधिकं मर्मग्राहिणौ द्वौ महाप्रभोः ॥
दामोदरस्वरूपश्च परमानन्दकः पुरी ।
शङ्करो जगदानन्दो वक्रेश्वरगदाधरौ ॥
ठाकुरोहरिदासश्च श्रीदामोदरपण्डितः ।
रघुनाथाख्यवैद्यश्च दासश्रीरघुनाथकः ॥
इत्यादयो महाभक्ताः पूर्वसंसर्गिणः प्रभोः ।
सर्वे प्रभुमसेवन्त नीलाचलमधिष्ठिताः ॥
यावन्तोऽन्ये प्रभोर्भक्ता गौड़देशनिवासिनः ।
ते नीलाचलमागत्यापश्यंस्तं प्रतिवत्सरम् ॥
नीलाचले प्रभुर्यैश्च प्रथमं समगच्छत ।
तेषां श्रीप्रभुभक्तानां गणना क्रियते मया ॥
सार्वभौमो महाशाखा भट्टाचार्योपनामकः ।
श्रीगोपीनाथ आचार्यस्तस्य सोऽभूत् स्वसुः पतिः ॥
काशी प्रद्युम्नमिश्रौ च श्रीभवानन्दरायकः ।
सम्प्राप्तोऽत्यन्तमानन्दमेतैः सम्मेलनात् प्रभुः ॥
समालिङ्ग्य भवानन्दमेकदोचे महाप्रभुः ।
पाण्डुस्त्वमसि पञ्च ते पाण्डवास्तव नन्दनाः ॥१३०॥
श्रीरामानन्दरायोऽयं तथासौ पट्टनायकः ।
गोपीनाथो वाणीनाथनायकश्च कलानिधिः ॥
सुधानिधिरितीमे ते पञ्चपुत्रा मम प्रियाः ।
रामानन्देन भेदो मे देहेनैव भवेदिति ॥
राजा प्रतापरुद्रश्च श्रीकृष्णानन्द ओड्रकः ।
परमश्च महापात्रः श्रीशिवानन्द ओड्रकः ॥

आचार्यो भगवान्नाम श्रीब्रह्मानन्दभारती।
श्रीशिखिमाहितिर्नाम मुरारिमाहितिस्तथा ॥
श्रीमती माधवीदेवी भगिनी शिखिमाहितेः।
श्रीराधाया हि दासीषु या नाम परिगण्यते ॥
यौ द्वौ काशीश्वरब्रह्मचारिगोविन्दनामकौ।
पुरीश्वरस्य शिष्यौ तौ तत्प्रियानुचरोत्तमौ ॥
स्वामिन्यन्तर्हिते तस्मिंस्तावुभौ हि तदाज्ञया।
प्रभुणा समगच्छेतामेत्य नीलाचले तदा ॥
प्रभुः स्वगुरुसम्बन्धात् कृतवानर्हणं तयोः।
गुरोराकर्णयन्नाज्ञां चकार स्वीकृतिं प्रभुः ॥
स्वाङ्गसेवाधिकारं स गोविन्दाय प्रदत्तवान्।
काशीश्वरेऽग्रगत्वञ्च जगन्नाथेक्षणक्षणे ॥
अपसार्य जनान काशीश्वरश्चक्रे पथो बलात।
जगाम प्रभुरस्पृष्टः पथि मानुषसङ्कुले ॥१४०॥
रामोनन्दश्च विख्यातौ द्वावेव प्रभुकिङ्करौ।
गोविन्देन समं देवमसेवेतां निरन्तरम् ॥
घटान् द्वाविंशतिं रामो भृतवान प्रत्यहं जलैः।
गोविन्दस्य निदेशेन नन्दः प्रभुमसेवत ॥
कुलीनो ब्राह्मणः शुद्धः कृष्णदासाभिधानकः।
अगच्छद् दक्षिणं देशं सममादाय यं प्रभुः ॥
बलभद्राभिधो भट्टाचार्योऽसौ प्रेमभक्तिमान्।
ब्रह्मचारी सहागच्छत प्रभुणा मथुरां प्रति ॥
वयोज्येष्ठकनिष्ठौ द्वौ हरिदासाभिधानकौ।
स्थितौ महाप्रभोः पार्श्वे श्रीसङ्कीर्त्तनगायकौ ॥
आचार्यो रामभद्रश्च श्रीसिंहेश्वर औड्रकः।
तथैव तपनाचार्यो रघुनीलाम्बरश्च ते ॥

सिङ्गः कामश्च भट्टौ द्वौ शिवानन्दश्च दन्तुरः ।
गौड़ीयः कमलानन्दः पूर्वभृत्यः प्रियः प्रभोः ॥
अद्वैताचार्यपुत्रोऽसावच्युतानन्दनामकः ।
सोऽपि नीलाचले तस्थौ प्रभोः पादावुपाश्रयन् ॥
गङ्गादासश्च निर्लोमा विष्णुदासादयस्तथा ।
सर्वे नीलाचले वासमकुर्वन प्रभुणा सह ॥
अभवंश्च त्रयो भक्ता वाराणस्यां महाप्रभोः ।
चन्द्रशेखरवैद्यश्च मिश्रः श्रीतपनस्तथा ॥१५०॥
रघुनाथाभिधो भट्टाचार्यस्तन्मिश्रनन्दनः ।
प्रभुर्वृन्दावनं दृष्ट्वा वाराणस्यामुपस्थितः ॥
प्रत्युवास च मासौ द्वौ चन्द्रशेखरवेश्मनि ।
गृहे तपनमिश्रस्य भिक्षां जग्राह च प्रभुः ॥
बालको रघुनाथोऽसौ कृतवान सेवनं प्रभोः ।
उच्छिष्टमार्जनं तस्य पादसंवाहनं तथा ॥
वयः प्राप्तो गतो नीलाचलं सन्निकटे प्रभोः ।
अष्टौ मासानुवासासौ तस्म भिक्षां ददौ क्वचित ॥
लभमानः प्रभोराज्ञां श्रीवृन्दावनमागतः ।
रूपगोस्वामिनः पार्श्वे तदा प्रभृति सोऽवसत ॥
अशृणोद्रूपगोस्वामी श्रीमद्भागवतं ततः ।
कृष्णप्रेम्नाऽभवत सोऽपि प्रमत्तः कृपया प्रभोः ॥
एवं ते गणनातीता भक्ता आसन महाप्रभोः ।
निदर्श्यतेऽत्र दिङ्मात्रं सम्यगवक्तुं न शक्यते ॥
एकस्यामपि शाखायां शाखास्तिष्ठन्ति कोटिशः ।
उपशाखाश्च तच्छिष्यास्तथा तदुपशाखिकाः ॥
सर्वा एव परिव्याप्ताः प्रेमपुष्पफलोच्चयैः ।
प्लावितास्तैस्त्रयो लोकाः श्रीकृष्णप्रेमवन्यया ॥

एकैकस्याश्च शाखाया अनन्ताः किल शक्तयः।
सहस्रवदनो यासां न सीमां कर्तुमर्हति ॥१६०॥
एते संक्षेपतः प्रोक्ता भक्ताः श्रीमन्महाप्रभोः।
न शक्नोति सहस्रास्यो गदितुं निखिलानिमान ॥
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥१६२॥

इति श्रीचैतन्यचरितामृत आदिखण्डे मूलस्कन्धशाखा-
गणनं नाम दशमः परिच्छेदः।

श्रीचैतन्यचरितामृत आदिलीलायां

एकादशः परिच्छेदः

"नित्यानन्दपदाम्भोजभृङ्गान प्रेममधून्मदान।
नत्वाखिलांस्तेषु मुख्या लिख्यन्ते कतिचिन्मया ॥१॥"
जय श्रीकृष्णचैतन्य हे गौराङ्गमहाप्रभो।
जयाद्वैतसुधाधामन् नित्यानन्द कृतिन् जय ॥

"तथाहि—

तस्य श्रीकृष्ण-चैतन्य-सत-प्रेमामर शाखिनः।
ऊर्द्ध स्कन्धावधूतेन्दोः शाखारूपान् गणान्नुमः ॥२॥"
नित्यानन्दोऽस्य वृक्षस्य स्कन्धो गुरुतरो महान्।
यतः शाखाः प्रशाखाश्च वह्वयोऽजायन्त विस्तृताः ॥
तास्ताः शाखा व्यवर्द्धन्त मालाकारस्पृहाम्बुभिः !
प्रेमपुष्पफलैः सर्वं परिपूर्णमिदं जगत ॥
अनन्तासंख्यकाः शाखाः को वा गणयितुं क्षमः।
संशोधयितुमात्मानं मुख्यमुख्यान् जनान ब्रुवे ॥

श्रीवीरभद्रगोस्वामी शाखा स्कन्धइवाभवत् ।
उपशाखाश्च यावत्यस्तासां संख्यां करोतु कः ॥
महाभागवतः प्रोक्तः स स्वयं भगवानपि ।
वेदधर्मरतः सोऽभूद् वेदधर्मातिगोऽपि सन् ॥
वहिर्दम्भविहीनोऽसावन्तरीश्वरचेष्टितः ।
मूलस्तम्भः स चैतन्य-भक्तिमण्डप आवभौ ॥
यस्य कारुण्यमाहात्मथादिदानीमपि सर्वतः ।
श्रीनित्यानन्दचैतन्यौ गीयेते जगतीतले ॥
भवेद् यस्य प्रसादेन भक्तानामिष्टपूरणम् ।
तं वीरभद्रगोस्वामि-चरणं शरणं लभे ॥
तस्य पार्श्वे सदा रामदास-दासगदाधरौ ।
कृष्णचैतन्य-गोस्वामि-भक्तौ द्वौ तावतिष्ठताम् ॥१०॥
गौड़देश-प्रयाणाय नित्यानन्दं समादिशन् ।
प्रभुस्तौ द्वौ समं तेन कृतवाननुयात्रिकौ ॥
अतस्तौ द्वौ हि गण्येते द्वयोरेव गणद्वये ।
माधवो वासुदेवश्च घोषौ गण्यौ तयोः समौ ॥
रामदासोऽग्रिमा शाखा सख्यप्रेममहोत्करः ।
द्वात्रिंशज्जनवाह्यं यः काष्ठं वंशीमिवावहत् ॥
गोपीभावेन सम्पूर्णानन्दो दासगदाधरः ।
नित्यानन्दो गृहे यस्य दानकेलिमकल्पयत् ॥
कीर्त्तनं गायतां मुख्यो नाम्नासौ घोषमाधवः ।
नित्यानन्दः प्रभुर्नृत्यमकरोद् यत्र गायति ॥
गीतेन वासुदेवोऽसौ कृतवान् वर्णनं प्रभोः ।
द्रवीभूता यदाकर्ण्य शुष्ककाष्ठोपला अपि ॥
लीला चैतन्यदासस्य श्रीमुरारेरलौकिकी ।
सर्पैश्चिक्रीड़ च व्याघ्रमाहन् गण्डे चपेटकैः ॥

नित्यानन्दस्य यावन्तो गणास्ते व्रजबन्धवः ।
शृङ्गवेत्रकरा गोपवेशिनो बर्हमस्तकाः ॥
श्रीमान् वैद्य उपाध्यायो रघुनाथो महाशयः ।
यस्य सन्दर्शनात् कृष्णे प्रेमभक्तिरजायत ॥
नित्यानन्दोऽकरोद् येन व्रजनर्मादिलीलया ।
असौ श्रीसुन्दरानन्दः शाखाभृत्यश्च मर्मवित् ॥२०॥
अलौकिकचरित्रोऽसौ कमलाकरपिप्पलः ।
अलौकिकतयाख्यातो यस्य प्रेमा जगत्त्रये ॥
श्रीसूर्य्यदासस्सर्खेलस्तद्भ्राता कृष्णदासकः ।
नित्यानन्दे दृढश्रद्धौ प्रेमरत्नमहोदधी ॥
प्रेमसम्वर्द्धिताभक्तिः श्रीगौरीदासपण्डितः ।
कृष्णप्रेमाणमादातुं दातुञ्चासीत् स शक्तिमान् ॥
श्रीनित्यानन्दचैतन्यौ कृत्वा प्राणपती उभौ ।
स्वजातिं कुलधर्मञ्च नित्यानन्दाय सोऽददात् ॥
नित्यानन्दप्रियश्रेष्ठः पण्डितः श्रीपुरन्दरः ।
प्रेमाम्भोनिधिमध्ये यो लीलयाऽमकरायत ॥
नित्यानन्दैकलम्बोऽसौ दासः श्रीपरमेश्वरः ।
यस्तं स्मरति चित्तेन कृष्णभक्तिं स विन्दति ॥
पण्डितो जगदीशश्च विश्वगभुवनपावनः ।
कृष्णप्रेमामृतं वृष्टः प्रावृषेण्याम्बुवाहवत् ॥
नित्यानन्दप्रियप्रेष्यः पण्डितः श्रीधनञ्जयः ।
अन्तर्वैराग्यसम्पन्नः कृष्णप्रेममयः सदा ॥
उदारो व्रजगोपालो महेशो नाम पण्डितः ।
कृष्णप्रेम्ना सदोन्मत्तो ढक्कावाद्येन नर्त्तितः ॥
श्रीनवद्वीपवास्तव्यः पुरुषोत्तम-पण्डितः ।
नित्यानन्दस्य नाम्नैव यस्योन्मादोऽप्यजायत ॥३०॥

कृष्णप्रेमरसास्वादी बलरामाख्यदासकः ।
नित्यानन्द इति श्रुत्वा परमोन्मत्ततां गतः ॥
महाभागवतः श्रीमान् यदुनाथाभिधः कविः ।
अनृत्यद्धृदये यस्य नित्यानन्दः प्रभुः सदा ॥
कृष्णदासो द्विजश्रेष्ठो राढ़भूमावजायत ।
श्रीनित्यानन्ददेवस्य सोऽयं परमकिङ्करः ॥
श्रीकालाकृष्णदासोऽसौ महावैष्णवशेखरः ।
नापरं कञ्चनावेदीन्नित्यानन्दप्रभुं विना ॥
महान्त महाशयः श्रीमान कविराजः सदाशिवः ।
पुरुषोत्तमदासाख्यो यस्यासीद्गुणवान सुतः ॥
सोऽयमा जन्मनो मग्नो नित्यानन्दपदाम्बुजे ।
विदधे बाल्यलीलां यः श्रीकृष्णेन निरन्तरम् ॥
श्रीकानुठाकुरो नाम तस्य पुत्रो महाशयः ।
कृष्णप्रेमसुधाधारा यस्य देहे व्यराजत ॥
महाभागवतश्रेष्ठो दत्त उद्धारणाभिधः ।
सिषेवे सर्व्वभावेन नित्यानन्दपदद्वयम् ॥
आचार्य्यो वैष्णवानन्दो भक्तिरत्नाधिकारिकः ।
रघुनाथपुरीत्यस्याभिधानमभवत् पुरा ॥
आसंस्त्रयः सहोदर्य्या विष्णुदासोऽथ नन्दनः ।
गङ्गादासश्च तद्गेहे नित्यानन्दोऽवसत पुरा ॥४०॥
परमानन्दोपाध्यायः श्रीनित्यानन्दकिङ्करः ।
नित्यानन्दगुणोद्गाता श्रीजीवो नाम पण्डितः ॥
परमानन्दगुप्तश्च कृष्णभक्तो महामतिः ।
नित्यानन्दस्य वासोऽभूत पूर्वं यस्य निकेतने ॥
नारायणः कृष्णदासो देवानन्दी मनोहरः ।
चत्वारोभ्रातरश्चैते श्रीनित्यानन्दकिङ्कराः ॥

कृष्णदासो विहारी च श्रीनित्यानन्दजीवनौ ।
नित्यानन्दादृते तौ द्वौ ज्ञातवन्तौ न चापरम् ॥
नकड़िश्च मुकुन्दश्च श्रीधरः सूर्य्यमाधवौ ।
रामानन्दवसुर्नाम जगन्नाथमहीधरौ ॥
श्रीमन्तः परमानन्दावधूतो दासगोकुलः ।
शिवो हरिहरानन्दो गोपालश्च सनातनः ॥
नन्दो नवीनहोड़श्च वसन्तो विष्णुहाजराः ।
तथा कंसारिसेनश्च कृष्णानन्दः सुलोचनः ॥
कविराजो रामचन्द्रो रामसेनस्तथैव च ।
कविराजश्च गोविन्दः श्रीरङ्गकुमुदाह्वयः ॥
शङ्करो माधवाचार्य्यो दासदामोदरस्तथा ।
पीताम्बरो मुकुन्दश्च ज्ञानदासो मनोहरः ॥
गौराङ्गदासचैतन्यदासौ गोपालनर्त्तकः ।
नृसिंहो रामदासश्च मीनकेतननामकः ॥५०॥
रामभद्रस्तथा नारायणोगर्भाब्धिचन्द्रमाः ।
श्रीवृन्दावनदासो यश्चक्रे चैतन्यमङ्गलम् ॥
श्रीमद्भागवते कृष्णलीलां व्यासो ह्यवर्णयत् ।
व्यासश्चैतन्यलीलायां श्रीवृन्दावनदासकः ॥
श्रीवीरभद्रगोस्वामी सर्वशाखासु सत्तमः ।
सीमा तस्योपशाखानां तावतीनां न विद्यते ॥
अशक्यगणनोऽनन्तो नित्यानन्दगणो मतः ।
विशोधयितुमात्मानं कियन्तं तं लिखाम्यहम् ॥
पक्वप्रेमफलैः पूर्णाः शाखास्ता निखिला इमाः ।
दृष्टेभ्य एव दत्तैस्तैः सर्वानप्लावयन् जनान् ॥
निर्बाधं प्रेम सर्वासां वाधाहीनञ्च वेष्टितम् ।
दातुं प्रेम च कृष्णञ्च समर्थाः सकला इमाः ॥

एष संक्षेपतः प्रोक्तो नित्यानन्दगणो मया।
सहस्रवदनोऽनन्तो यस्यान्तं नैव गच्छति ॥
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥५८॥

इति श्रीचैतन्य-चरितामृत आदिखण्डे नित्यानन्दस्कन्धशाखावर्णनं नामैकादशः परिच्छेदः।

श्रीचैतन्यचरितामृत आदिलीलायां

द्वादशः परिच्छेदः

"अद्वैताङ्घ्र्यब्जभृङ्गांस्तान् सारासारभृतोऽखिलान्।
हित्वासारान सारभृतो नौमि चैतन्यजीवनान ॥१॥"
जय श्रीकृष्णचैतन्य श्रीगौराङ्ग महाप्रभो
नित्यानन्द जयाद्वैत जय धन्य कृपानिधे ॥
"श्रीचैतन्यामरतरोर्द्वितीयस्कन्धरूपिणः।
श्रीमदद्वैतचन्द्रस्य शाखारूपान् गणान्नुमः ॥२॥"
द्वितीयः स्कन्ध आचार्यगोस्वामी तत्र पादपे।
ततो या उद्गताः शाखास्तासामन्तो न विद्यते ॥
चैतन्य-मालिकस्यानुकम्पासलिलसेचनात।
स स्कन्धः परिपुष्टोऽभूद्वर्द्धमानो दिने दिने ॥
उपजातैस्ततः स्कन्धात कृष्णप्रेमफलैश्च तैः।
तावद्भिर्निखिलैः सर्वं परिपूर्णमभूज्जगत ॥
स्कन्धात समुद्गताः शाखास्तन्मालिककृपाम्बुना।
वर्द्धमानैः फलैः पुष्पैरुपाचीयन्त विस्तृताः ॥

आचार्यस्य गणा एकमता आदौ स्थिताः पुनः ।
दुर्दैववशतः पश्चान्मतद्वैतं समाश्रिताः ॥
आचार्यमतसाम्मत्यमवालम्बन्त केचन ।
दैवाधीनतया केचित् स्वमतं पर्यकल्पयन् ॥
आचार्यस्य मतं यद्धि सारवत्तत् सुनिश्चितम् ।
सारहीनः स विज्ञेयस्तदाज्ञा येन लङ्घिता ॥
अत्रासारस्य नामोक्त्या नास्ति किञ्चित् प्रयोजनम् ।
भेदविज्ञापनायैव युगपद् गण्यते मया ॥
धान्यराशिं वुषैः सार्द्धं परिमाय यथा नरः ।
संस्काराय ततः पश्चाद्बुषाण्युत्क्षिप्य मुञ्चति ॥१०॥
महाशाखाऽच्युतानन्दः श्रीमदाचार्यनन्दनः ।
आजन्म सेवितं येन श्रीचैतन्यपदाम्बुजम् ॥
प्रभोश्चैतन्यदेवस्य गुरुः केशवभारती ।
इत्युक्तिं यः पितुः श्रुत्वा परमं दुःखमाप्तवान ॥
उपदेशं करोष्येवं यदि त्वं श्रीजगद्गुरौ ।
तवानेनोपदेशेन देशः सर्वो विनश्यति ॥
कृष्णचैतन्यगोस्वामी चतुर्दशजगद्गुरुः ।
तस्यान्यो गुरुरस्तीति शास्त्रं किञ्चिन्न विद्यते ॥
इत्यूचे सारसिद्धान्तं यः शिशुः पञ्चवार्षिकः ।
तच्छ्रुत्वाद्वैत आचार्य्यः सन्तोषं परमं गतः ॥
आचार्य्यस्य सुतश्चान्यः कृष्णमिश्राभिधानकः ।
कृष्णचैतन्यगोस्वामी हृदि यस्यावसत् सदा ॥
श्रीगोपाल इति प्रख्य आचार्य्यस्य सुतोऽपरः ।
श्रूयतां तस्य चारित्राख्यानमत्यन्तमद्भुतम् ॥
गुण्डिचामन्दिरे सोऽयमेकदा पुरतः प्रभोः ।
नानाभावमयैरङ्गैर्महाप्रेमसुखाकुलः ॥

हरिसङ्कीर्त्तने कुर्वन्नासीदद्भुतनर्त्तनम् ।
गोस्वामिनोर्द्वयोरेवं हरिध्वानेन नन्दितः ॥
स नरीनृत्यमानः श्रीगोपालो मूर्च्छितोऽभवत् ।
न्यपतच्च तदा भूमौ संज्ञाहीनकलेवरः ॥२०॥
दुःखितोऽभवदाचार्य्यः पुत्रमादाय वक्षसा ।
नृसिंहमन्त्रपाठेन रक्षितुं तमचेष्टत ॥
नत्वसौ चेतनां लेभे तस्मिन्मन्त्रान् पठत्यपि ।
आचार्यस्यातिदुःखेन सर्वऽक्रन्दन परे जनाः ॥
महाप्रभुस्तदा तस्य वक्षः श्रीपाणिना स्पृशन् ।
उत्थानं कुरु गोपालेत्युक्त्वा चक्रे हरिध्वनिम् ॥
प्रभोः स्पर्शध्वनी लब्ध्वा श्रीगोपाले समुत्थिते ।
मुहुर्हरिध्वनिं चक्रुः सर्वे सानन्दमानसाः ॥
आचार्यस्यापरः पुत्रो बलरामाभिधानकः ।
जगदीश इति ख्यातः शाखारूपोऽपरः सुतः ॥
कमलाकान्तविश्वासो नाम्नाचार्य्यस्य किङ्करः ।
सोऽद्वैतस्याधिकारी च व्यावहारिककर्मसु ॥
लिखित्वा पत्रिकामेकां स नीलाचल एकदा ।
तत्र प्रतापरुद्राय राज्ञे प्रेरितवान् रहः ॥
तस्य तत् पत्रिकावार्त्तामाचार्य्यो ज्ञातवान्नहि ।
किन्तु सा पत्रिका प्राप्ता प्रभुपादं कथञ्चन ॥
तस्यां लिखितमेवासीद् यत्तदेवानुलिख्यते ।
आचार्यमीश्वरत्वेन नूनमस्थापयद्भवान् ॥
दुर्दैववशतः किन्तु तस्योद्धारोऽस्ति कश्चन ।
त्वां शोधयितुमुद्धारं याचे मुद्राशतत्रयम् ॥३०॥
पठित्वा पत्रिकां दुःखमाप्तवान्मनसि प्रभुः ।
पूर्णचन्द्राननः किञ्चिदुक्तवांश्च वहिर्हसन् ॥

यत्संस्थापित आचार्य ईश्वरत्वेन तत्र हि।
न कश्चिद्दोषलेशोऽस्ति स देवानामपीश्वरः ॥
ईश्वरस्य स दैन्यं यदुक्त्वा भिक्षामयाचत।
दण्डयित्वा ततस्तन्तु शिक्षयिष्यामि निश्चितम् ॥
इत्यादिदेश गोविन्दं प्रभुरद्यावधि त्वया।
वातुलो जातु विश्वासो नात्र प्रवेश्यतामिति ॥
विश्वासो दण्डमाकर्ण्य परमं दुःखितोऽभवत्।
श्रुत्वा प्रभुकृतं दण्डमाचार्य्यो हर्षमाप च ॥
स विश्वासमुवाचैवं महाभाग्यधरोऽसि भोः।
यतस्ते भगवान्दण्डं कृतवान श्रीमहाप्रभुः ॥
आदौ महाप्रभुर्मह्यं सम्मानं समदर्शयत्।
तेन दुःखितचित्तोऽहमिति स ज्ञातवान् धिया ॥
वाशिष्ठे श्रेष्ठता मुक्तेर्व्याख्यातासीन्मया यदा।
कृतवानपमानं मे तदा क्रुद्धो महाप्रभुः ॥
तस्माल्लब्ध्वा तथा दण्डं परमानन्दितोऽभवम्।
भाग्यवांश्च मुकुन्दोऽसौ ततोदण्डं यथाप्तवान ॥
यथालब्धवती दण्डं सा सौभाग्यवती शची।
तथा दण्डप्रसादं तु कोऽपरो लब्धुमर्हति ॥४०॥
इत्युक्त्वाश्वास्य विश्वासं तमाचार्य्यः स्वकिङ्करम।
प्रभुमभ्येत्य सानन्दचेतसा तमवोचत ॥
नावगच्छामि ते लीलामीदृशीं हे महाप्रभो।
मत्तोऽपि कमलाकान्ते प्रसादस्ते यतोऽधिकः ॥
प्रसादं कृतवान्न त्वं तादृशं जातु मय्यपि।
तव श्रीपादपद्मेषु कोऽपराधः कृतो मया ॥
इत्याचार्यवचः श्रुत्वा हसन्नेव महाप्रभुः।
प्रसीदन् कमलाकान्ते तमाहूयानयत् पुरः ॥

ऊचेऽद्वैतोऽस्य कस्मात्त्वं दत्तवानसि दर्शनम् ।
द्विधैवायं जनो नूनं मां विड़म्बितवानिति ॥
अथ चार्य्योक्तिमाकर्ण्य प्रसन्नोऽभून्महाप्रभुः ।
उभयोरान्तरं भावमुभावेवावजग्मतुः ॥
अथोचे प्रभुरित्थं त्वं कस्माच्चरसि वातुल ।
आचार्य्यस्य प्रभोर्लज्जाधर्मनाशं करोषि किम् ॥
न जातु प्रतिगृह्णीयात् कथञ्चिद्भूपतेर्धनम् ।
अन्ने विषयिणो भुक्ते भवेत सन्दूषितं मनः ॥
दूषितेन हृदा कृष्णस्मरणं नैव सम्भवेत् ।
निष्फलं जीवनं नृणां श्रीकृष्णस्मरणं विना ॥
धर्मः कीर्त्तिश्च हीयेते लोकलज्जा भवेद् यथा ।
मन्ये त्वया तथा भूयः कर्त्तव्यं नैव जात्विति ॥५०॥
शिक्षा सर्वजनीनेति मेनिरे निखिला जनाः ।
अद्वैताचार्यगोस्वामी बभूवानन्दितान्तरः ॥
आचार्यस्याशयं जज्ञौ केवलं श्रीमहाप्रभुः ।
प्रभोर्गम्भीरवाक्यानामाचार्यो ह्येव मर्मवित् ॥
प्रसङ्गस्यावकाशेऽस्मिन सन्ति बह्वयो विचारणाः ।
ग्रन्थबाहुल्यभीत्यैव न शक्यं लेखितुं मया ॥
अद्वैतस्य च शाखाभूदाचार्यो यदुनन्दनः ।
तस्य शाखोपशाखानां लिखनं नैव सम्भवेत् ॥
श्रीवासुदेवदत्तो हि तस्यानुग्रहभाजनम् ।
कृतवान सर्वभावेन स चैतन्यपदाश्रयम ॥
श्रीमान भागवताचार्य आचार्यो विष्णुदासकः ।
चक्रपाणिरथाचार्य आचार्योऽनन्तनामकः ॥
नन्दनी कामदेवश्च चैतन्यदास इत्यमी ।
तथा दुर्लभविश्वासो दासश्च वनमालिकः ॥

जगन्नाथकरो नाम भवनाथकरस्तथा ।
हृदयानन्दसेनश्च पञ्च दासोपनामकाः ॥
यादवो विजयानन्तभोलानाथजनार्दनाः ।
तथैव पण्डितः कानुदासनारायणोऽपि च ॥
श्रीवत्सपण्डितो ब्रह्मचारी च पुरुषोत्तमः ।
हरिदासो ब्रह्मचारी पण्डितः पुरुषोत्तमः ॥६०॥
ख्यातः श्रीवनमालीति कविचन्द्रोपनामकः ।
रघुनाथो वैद्यनाथो लोकनाथश्च पण्डितः ॥
मुरारिः पण्डितो नाम कृष्णदासस्तथा पुनः ।
श्रीहरिचरणो नाम तथा माधवपण्डितः ॥
पण्डितो विजयो नाम श्रीरामो नाम पण्डितः ।
अद्वैतस्यामिताः शाखा नाम लेख्यं कियन्मया ॥
मालिकेनार्पितं तोयमद्वैतस्कन्धसञ्चितम् ।
जीवयित्वाखिलाः शाखाश्चक्रे पुष्पफलोदयम् ॥
एतासां कतिचिच्छाखाः सम्मान्यादौ ततः परम् ।
मेनिरे नैव दुर्दैवात् कृष्णचैतन्यमालिकम् ॥
जनिता जीविताश्चैता येन तं तु न मेनिरे ।
कृतघ्नास्तास्तु संवृत्तास्ताभ्यः स्कन्धश्चुकोप च ॥
तासु स्कन्धेन रुष्टेन नैव सञ्चारितं जलम् ।
जलाभावेन ताः शाखा अम्रियन्त विशोषिताः ॥
चैतन्यरहितो देहः शुष्ककाष्ठसमो मतः ।
जीवन्नपि मृतो ज्ञेयो यमेन दण्ड्यते मृतः ॥
न केवलमयं दण्डोऽभवदेतान् गणान् प्रति ।
स एव खलु पाषण्डो यश्चैतन्यपराङ्मुखः ॥
पण्डितास्तापसा वापि गृहिणो यतिनोऽपि वा ।
चैतन्यविमुखा ये तु तेषामेषा गतिर्भवेत् ॥७०॥

अगृह्णन्नच्युतानन्दमतं ये ये महाजनाः ।
आचार्य्यस्य गणास्ते ते महाभागवता मताः ॥
अच्युतस्य मतं यद्वै तन्मतं सारवद्ध्रुवम् ।
अपरन्तु मतं सर्व्वमभवद् भस्मसात् किल ॥
स एवात्र कृपापात्रमाचार्य्यस्य सुनिश्चितम् ।
लब्धं तेन विनायासं चैतन्यचरणाम्बुजम् ॥
तस्मै कोटिनमस्काराः सन्त्वाचार्य्यगणाय मे ।
अच्युतानन्दतुल्योऽसौ श्रीमच्चैतन्यजीवनः ॥
एवमाचार्य्यगोस्वामिगणोऽयं कथितो मया ।
एताः स्कन्धत्रयीशाखाः संक्षेपाद्गणिताः पुनः ॥
शाखानामुपशाखानां गणना नैव सम्भवेत् ।
अतो दिग्दर्शनन्यायात् किञ्चिन्मात्रं मयोच्यते ॥
भवेन्महोत्तमा शाखा श्रीगदाधरपण्डितः ।
अतस्तदुपशाखानां गणना क्रियते मनाक् ॥
शाखाश्रेष्ठो ध्रुवानन्दः श्रीधरो ब्रह्मचारिकः ।
श्रीमद्भागवतानन्तावाचार्य्यौ मामुठाकुरः ॥
गङ्गामन्त्री कविर्दत्तः कण्ठाभरण इत्यमी ।
हरिदासब्रह्मचारी मिश्रश्च नयनाभिधः ॥
श्रीमद्भूगर्भगोस्वामी दासो भागवतस्तथा ।
श्रीवृन्दावनमागत्य तौ द्वौ न्यवसतां पुरा ॥८०॥
वाणीनाथब्रह्मचारी सर्वश्रेष्ठो महाशयः ।
कृष्णप्रेममयौ श्रीमच्चैतन्यदासवल्लभौ ॥
श्रीनाथश्चक्रवर्त्ती च तथैव दास उद्धवः ।
जितामिश्रो जगन्नाथदासश्च काष्ठतक्षकः ॥
आचार्यः श्रीहरिः सादिपुर्यो गोपालनामकः ।
कृष्णदासब्रह्मचारी पुष्पगोपाल इत्यथ ॥

श्रीहर्षो रघुमिश्रश्च श्रीलक्ष्मीनाथपण्डितः ।
रङ्गवाटीयचैतन्यदासश्च रघुनाथकः ॥
अमोघपण्डितो नाम तथा चैतन्यवल्लभः ।
वैष्णवो मङ्गलो नाम्ना गङ्गोपाध्यायको यदुः ॥
एष संक्षेपतः प्रोक्तः पण्डितस्य गणो मया ।
एवं शाखोपाखानामन्यासां गणना भवेत् ॥
पण्डितस्य गणाः सर्व्वे धन्या भागवता मताः ।
कृष्णचैतन्यगोस्वामी सर्व्वेषां प्राणवल्लभः ॥
एते मया त्रयः स्कन्धा गणिता हि समासतः ।
सर्व्वेषां स्मरणात्तेषां जायते बन्धमोचनम् ॥
प्राप्यते स्मरणात्तेषां चैतन्यचरणाम्बुजम् ।
वाञ्छितं पूर्यते तेषां सर्व्वेषां स्मरणेन च ॥
सकलानामतस्तेषां कृत्वा श्रीपादवन्दनम् ।
चैतन्यमालिकस्यैष लीलानुक्रम उच्यते ॥९०॥
अगाधः पारहीनोऽयं गौरलीलामृताम्बुधिः ।
विधातुं को नु शक्नोति तत्रावगाहनस्पृहाम् ॥
तस्य माधुर्यगन्धेन लुब्धं भवति मानसम् ।
अतएव तटे तिष्ठन्नवलेक्ष्यामि तत्कणम् ॥
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥९३।

इति श्रीचैतन्यचरितामृत आदिखण्डेऽद्वैतस्कन्धशाखावर्णनं
नाम द्वादशः परिच्छेदः ।

Bhaja Nitai Gour Radhe Syam, Japa Hare Krishna Hare Ram.

श्रीचैतन्यचरितामृत आदिलीलायां

त्रयोदशः परिच्छेदः

"स प्रसीदतु चैतन्यदेवो यस्य प्रसादतः।
तल्लीलावर्णने योग्यः सद्यः स्यादधमोऽप्ययम् ॥१॥"
श्रीचैतन्यो मुहुर्जीयाद् गौरचन्द्रो जयत्वलम्।
जयत्यद्वैतचन्द्रश्च नित्यानन्दो जयत्वसौ ॥
जीयाद् गदाधरो भूयः श्रीनिवासो जयत्यथ।
मुकुन्दो वासुदेवश्च हरिदासो जयन्तिमे ॥
दामोदरस्वरूपश्च मुरारिर्जयतां तथा।
चन्द्राणामुदयादेषां तमो लुप्तं समन्ततः ॥
जयन्तु कृष्णचैतन्यभक्तपूर्णसुधांशवः।
प्रेमचन्द्रिकया येषामुज्ज्वलं भुवनत्रयम् ॥
रचितो मुखबन्धोऽयं ग्रन्थस्योपक्रमे मया।
कृष्णचैतन्यलीलायाः कथ्यतेऽनुक्रमोऽधुना ॥
सूत्ररूपेण निर्देशः प्रथमं क्रियते ततः।
पश्चात सविस्तरं सर्वं सुस्पष्टं विवरिष्यते ॥
भगवान कृष्णचैतन्यः पृथिव्यामवतीर्णवान।
प्रकटं विजहाराष्टचत्वारिंशतमब्दकान ॥
द्वीपशून्याब्धिभूमाने शाक आविर्भवन् स्वयम्।
शाके पाण्डव-वाणाब्धिचन्द्रमेऽन्तर्दधे प्रभुः ॥
चतुर्विंशतिमब्दान स गृहवासविधिं चरन।
सङ्कीर्त्तनविलासेन सदा कालमयापयत ॥
तच्चतुर्विंशवर्षान्ते सन्न्यासाश्रममाश्रयन।
चतुर्विंशतिमब्दान् स पुनर्नीलाचलेऽवसत ॥१०॥

कदाचिद्दक्षिणे देशे गौड़े वृन्दावने तथा ।
गमनागमनैस्तेषु षड़ब्दाननयत प्रभुः ॥
शेषानष्टादशाब्दांश्च नीलाचलमधिष्ठितः ।
सर्वानप्लावयत कृष्णप्रेमनामामृतेन सः ॥
गार्हस्थ्ये या प्रभोर्लीला सादिलीलेति कथ्यते ।
शेषलीलेति नामास्य द्वयोर्मध्यान्त्यलीलयोः ॥
चरितान्यादिलीलायां प्रभोर्यावन्ति यानि च ।
तानि मुरारिगुप्तेन ग्रथितानीह सूत्रवत् ॥
दामोदरस्वरूपश्च स्वग्रन्थमधिसूत्रयन ।
प्रभोर्मध्यान्त्यलीले द्वे स्वयं गुम्फितवान पुरा ॥
तयोर्द्वयोश्च सूत्राणि पर्यालोच्य समीक्षया ।
वैष्णवेभ्यः श्रुतं सर्वं वर्ण्यतेऽत्र यथाक्रमम् ॥
बाल्यपौगण्ड-कैशोर-यौवनानीत्यनुक्रमः ।
आदिखण्डे प्रभोर्लीला अतएव चतुर्विधाः ॥

"तथाहि—

सर्वसद्गुणपूर्णां तां वन्दे फाल्गुनपूर्णिमाम् ।
यस्यां श्रीकृष्णचैतन्योऽवतीर्णः कृष्णनामभिः ॥२॥
सायं फाल्गुनमासस्य पूर्णिमायां प्रभोर्जनिः ।
उपरागः शशाङ्कस्य दैवयोगात्तदाभवत ॥
जना हरिध्वनिं चक्रुस्तदा संहृष्टमानसाः ।
आविर्भाव्य हरेर्नाम चैतन्योऽजायत स्वयम् ॥
जन्म-शैशवपौगण्डकैशोरेष्वथ यौवने ।
नानाभिर्हरेर्नाम जनैरग्राहयत प्रभुः ॥२०॥
श्रीचैतन्यप्रभुर्बाल्ये चकार क्रन्दनं छलात ।
हरि कृष्णेति नामासौ श्रृण्वंस्तूष्णीमुपागमत ॥

अतो नार्यस्तथा ये च जनास्तं द्रष्टुमागताः ।
हरिर्हरिरिति प्रोचुः सर्वे ते निजबान्धवाः ॥
नार्यो गौर हरीत्युक्त्वा तं दृष्ट्वा चाहसन यतः ।
स गौरहरिरित्येवं नाम्ना ख्यातोऽभवत्ततः ॥
विद्यारम्भविधिर्बाल्ये वयस्येवास्य कारितः ।
विवाहो नाभवत्तस्य यावत पौगण्डमागतम् ॥
नवीने यौवने प्राप्तमात्रे सोऽभूद्विवाहितः ।
सर्वैरग्राहयन्नाम हरेः सङ्कीर्त्तनेन च ॥
सोऽध्यैष्टाध्यापयच्छिष्यान पौगण्डे वयसि स्थितः ।
व्याख्यानमकरोत् कृष्णनाम्नः सर्वत्र सर्वदा ॥
सूत्र-वृत्ति-पञ्जिकानां टीकाया व्याख्यया तथा ।
कृष्णे तात्पर्यमेवैषामहो शिष्यानबोधयत ॥
यं ददर्श तमेवोचे कृष्णनाम वदेति सः ।
अप्लावयन्नवद्वीपं श्रीकृष्णनामवन्यया ॥
उपाक्रमत कैशोरवयाः सङ्कीर्त्तनं प्रभुः ।
प्रेमाविष्टो दिवारात्रं भक्तैः सार्द्धं ननर्त्त च ॥
नगरं नगरं भ्राम्यन्नकरोत् कीर्त्तनं हरेः ।
त्रिलोकीं प्लावयामास प्रेमभक्तिं समर्पयन ॥३०॥
चतुर्विंशतिमब्दान् स नवद्वीपमधिष्ठितः ।
जनैरग्राहयत् सर्वैः कृष्णस्य प्रेम नाम च ॥
ततः सन्न्यासमालम्ब्य चतुर्विंशतिमब्दकान ।
निजभक्तजनैः सार्द्धं स नीलाचलमावसत ॥
तेषु षड् वत्सरानेव नीलाचलमधिश्रयन ।
प्रददौ प्रेमभक्तिं स नृत्यन् गायंश्च सर्वदा ॥
सेतुबन्धं तथा गौड़ान् श्रीवृन्दावनधाम च ।
प्रेमनाम-प्रचारार्थं विचचार महाप्रभुः ॥

एषा मुख्या हि लीलासु मध्यलीलेति कथ्यते ।
अन्त्यलीला समाख्याता शिष्टाष्टादशवार्षिकी ॥
अष्टादशसु वर्षेषु षड़ब्दान्नृत्यगीतिभिः ।
प्रेमभक्तिं समं भक्तैः स समन्तादजिग्रहत ॥
ततो नीलाचले तिष्ठन् शेषान्द्वादशवत्सरान ।
आस्वादनच्छलात प्रेमवस्तु सर्वानशिक्षयत ॥
अस्फुरत कृष्णविच्छेदव्यथा तस्य दिवानिशम् ।
चकारोन्मादचेष्टां स सप्रलापं वचो ब्रुवन ॥
उद्धवस्य विलोकेन श्रीराधा प्रालपद् यथा ।
तथा प्रलापचेष्टां सोऽकरोद्रात्रिन्दिवं प्रभुः ॥
विद्यापतेस्तथा चण्डिदास-श्रीजयदेवयोः ।
रामानन्द-स्वरूपाभ्यां गीतेरास्वादयद्रसम् ॥४०॥
आस्वाद्य निखिलाः प्रेमचेष्टाः कृष्णवियोगजाः ।
आत्मनो वाञ्छितं सर्वं पूरयामास च प्रभुः ॥
अनन्ताः कृष्णचैतन्यलीलाः को नु सविस्तरम् ।
क्षमते क्षुद्रजीवः सन्नभिवर्णयितुं भुवि ॥
गणयेत सूत्ररूपेण सहस्रेण मुखैरपि ।
यद्यनन्तः स्वयं तासामन्तं जातु न चाप्नुयात ॥
दामोदरस्वरूपेण गुप्तेन च मुरारिणा ।
लीलासूत्राणि मुख्यानि विचार्य्य लिखितानि च ॥
मया तान्यनुसृत्यैव लिख्यतेऽत्र यथाक्रमम् ।
श्रीवृन्दावनदासेन वर्णितं यत सविस्तरम ॥
व्यासश्चैतन्यलीलायां दासो वृन्दावनः खलु ।
तेन माधुर्य्यमापूर्य्य तास्ता लीलाः प्रकाशिताः ॥
ग्रन्थविस्तृतिभीत्यासौ यं यं विषयमत्यजत ।
विवरिष्याम्यहं तं तं स्वल्पशोऽत्र यथामति ॥

स एवास्वादयत् पूर्वं प्रभोर्लीलामृतं महत् ।
तेन भुक्तावशिष्टं यत् किञ्चित्तद्वर्ण्यते मया ॥
श्रूयन्तामादिलीलाया भक्तैः सूत्राणि सर्वथा ।
सम्यग्वक्तुमशक्यानि लेखिष्यामि समासतः ॥
वाञ्छां पूरयितुं काञ्चिद् व्रजराजस्य नन्दनः ।
अवतर्त्तुमनाः सम्यगात्मना समकल्पयत् ॥५०॥
ये ये गुरुजनाः पूर्वं भुवि तेनावतारिताः ।
पृथग्वक्तुमशक्यांस्तान संक्षेपेण ब्रवीम्यहम् ॥
शचीदेवी जगन्नाथो माधवेन्द्रपुरी तथा ।
केशवोभारती स्वामी तथेश्वरपुरीप्रभुः ॥
श्रीमानद्वैत आचार्यस्तथा श्रीवासपण्डितः ।
विद्यानिध्याचार्यरत्नौ हरिदासश्च ठाकुरः ॥
श्रीहट्टदेशवास्तव्य उपेन्द्रमिश्रनामकः ।
वैष्णवः पण्डितो योऽसौ धनी सद्गुणमण्डितः ॥
सप्त मिश्राः सुतास्तस्य यथा सप्त ऋषीश्वराः ।
कंसारिः परमानन्दः पद्मनाथस्तथा पुनः ॥
सर्वेश्वरो जगन्नाथस्तथा षष्ठो जनार्दनः ।
ततस्त्रैलोक्यनाथश्च सप्तमः परिकीर्तितः ॥
जगन्नाथो नवद्वीपे गङ्गावासार्थमागतः ।
पुरन्दरोपनामासौ मिश्रः सद्गुणसागरः ॥
स नन्दवसुदेवात्मा तस्य पत्नी शची सती ।
नीलाम्बरः पिता तस्याश्चक्रवर्त्तीत्युपाधिकः ॥
अगृह्णाज्जन्म राढेषु श्रीनित्यानन्दठाकुरः ।
मुरारिश्च मुकुन्दश्च गङ्गादासश्च पण्डितः ॥
एवं भक्तानसंख्येयानवतार्य ततः स्वयम् ।
परिशेषेऽवतीर्णोऽभूच्छ्रीव्रजेश्वरनन्दनः ॥६०॥

आविर्भावात् प्रभोः पूर्वं यावन्तो वैष्णवा जनाः ।
निरूपाद्वैतमाचार्यं सर्वे गत्वा तमाश्रिताः ॥
गीताभागवतव्याख्यां कृत्वा सोऽश्रावयच्च ताम् ।
भक्तिप्राधान्यमस्तौषीद् विनिन्दन् ज्ञानकर्मणी ॥
व्याख्यां सर्वेषु शास्त्रेषु कृष्णभक्तेश्चकार सः ।
ज्ञानं योगं तपोधर्मं न मेने कञ्चनापरम् ॥
आनन्दं प्राप्नुवंस्तेन सार्द्धं सर्वे च वैष्णवाः ।
कृष्णस्य कथनं पूजां विदधुर्नामकीर्त्तनम् ॥
किन्तु सर्वान् जनानन्यान् दृष्ट्वा कृष्णबहिर्मुखान् ।
विषयासक्तचित्तांश्च महद्दुःखमवाप्नुवन् ॥
निस्तारणाय लोकानामाचार्योऽचिन्तयद् भृशम् ।
एते सर्वे तरिष्यन्ति केनोपायेन मानवाः ॥
अवतीर्य स्वयं कृष्णः स्वभक्तिं चेत् प्रचारयेत् ।
तदैवैते हि निस्तारं लभेरन् मानवा इति ॥
सोऽवतारयितुं कृष्णं प्रतिज्ञामकरोत् किल ।
तुलसीगाङ्गवारिभ्यामाचार्यः कृष्णमार्चयत् ॥
मुहुश्चकार हुङ्कारमद्वैतः कृष्णमाह्वयन् ।
हुङ्कृत्याभवदाकृष्टः श्रीव्रजेश्वरनन्दनः ॥
श्रीजगन्नाथमिश्रस्य पत्न्याः शच्या अनुक्रमम् ।
उदरात् कन्यका अष्टौ जातमात्रा मृताः किल ॥७०॥
तदपत्यवियोगेन मिश्रोऽभूद्दुःखितान्तरः ।
असौ पुत्रकृते विष्णोः पदमाराधयत्ततः ॥
पुत्रस्तस्य ततो जज्ञे श्रीविश्वरूपनामकः ।
बलदेवस्वरूपोऽभूत् स महागुणसागरः ॥
प्रकाशो बलदेवस्य व्योम्नि सङ्कर्षणः परे ।
उपादानं निमित्तञ्च विश्वस्य सोऽभवत् स्वयम् ॥

विश्वं नामापरं किञ्चिद् वर्त्तते नैव तं विना।
अत एवास्य नामाभूद् विश्वरूप इति प्रभोः ॥

"तथाहि श्रीमद्भागवते १०।१५।२५—

नैतच्चित्रं भगवति ह्यनन्ते जगदीश्वरे।
ओतं प्रोतमिदं यस्मिंस्तन्तुष्वङ्ग यथा पटः ॥३॥"

अत एवाग्रजो भ्राता बभूवासौ महाप्रभोः।
श्रीचैतन्यो निताइश्च द्वौ कृष्णबलरामकौ ॥
दम्पती तौ सुतं प्राप्याभवतां नन्दितान्तरौ।
सविशेषमसेवेतां श्रीगोविन्दपदाम्बुजम् ॥
शकाब्दे रसशून्याब्धिचन्द्रमे तपसोऽन्तिमे।
जगन्नाथस्य शच्याश्च तन्वोः कृष्णः प्रकाशितः ॥
मिश्रोऽब्रवीच्छचीदेवीमयथापूर्वमीक्ष्यते।
तव ज्योतिर्मयो देहो लक्ष्म्या चाधिष्ठितं गृहम् ॥
यत्र तत्र जनाः सर्वं मानयन्तश्च सर्वथा।
धनं वस्त्राणि धान्यञ्च प्रेरयन्त्यपि नो गृहे ॥
शची प्रत्यवदन्मिश्रं दृश्यन्ते गगने मया।
दिव्यमूर्त्तिधरा लोकाः स्तुवन्तोवेत्य मामिति ॥८०॥
जगन्नाथोऽवदत् स्वप्ने ददर्शाहं स्वपन्निशि।
किञ्चिज्ज्योतिर्मयं धाम हृदयं प्रविशन्मम ॥
हृदयान्मम तद्धाम प्रविष्टं हृदयं तव।
मन्ये कोऽपि महात्मासौ तव गर्भाज्जनिष्यते ॥
इत्येवं कथयन्तौ द्वौ तौ हर्षाप्लुतमानसौ।
शालग्रामशिलाविष्णुं सिषेवाते विशेषतः ॥
वर्द्धमानः क्रमाद् गर्भः प्राप्तो मासं त्रयोदशम्।
भूमिष्ठो नाभवद्बालो मिश्रस्त्रासमुपागतः ॥

नीलाम्बरचक्रवर्त्ती गणयित्वाब्रवीद्वचः ।
पुत्रः शुभक्षणं प्राप्य मासेऽस्मिन्नुद्भवेदिति ॥
चतुर्दशशततमे शाके सप्ताधिकेऽभवत ।
पौर्णमास्यां तिथौ सायं काले सोऽयं शुभक्षणः ॥
सिंहराशिं गते चन्द्रे सिंहलग्ने ग्रहेषु च ।
उच्चस्थितेषु षड्‌वर्गेऽष्टवर्गे च सुलक्षणे ॥
कलङ्करहिते गौरचन्द्रे दत्तविलोकने ।
सकलङ्केन चन्द्रेण जनानां किं प्रयोजनम् ॥
इति ज्ञात्वेव चन्द्रोऽसौ राहुणा जगृहे तदा ।
कृष्णः कृष्णो हरिश्चेति नाम्नाघुष्टं जगत्त्रयम् ॥
यदा हरिहरिध्वानैर्जनानां पूरितं जगत् ।
तदा पुण्यक्षणे गौरकृष्णो भूमाववातरत ॥६०॥
प्रसन्नान्यभवन सर्वजगज्जनमनांसि च ।
यवना हरिरित्युक्त्वा हिन्दुजातिमुपाहसन ॥
नार्यो हरिहरीत्युक्त्वा कृतवत्यो हुलुध्वनिम् ।
स्वर्गे कौतुकिनो देवाः सातोद्यं ननृतुस्तदा ॥
प्रसन्नं सरितां वारि प्रसन्नाश्च दिशो दश ।
स्थावरा जङ्गमाः सर्वेऽभवन्नानन्दविह्वलाः ॥

"यथा रागः" ।

श्रीगौरे पूर्णचन्द्रे सदयमिह नवद्वीपधामोदयाद्रौ
उद्यत्येव त्रिलोकी हरिहरिनिनदैर्ध्वस्तपापान्धकारा ।
आचार्योऽद्वैतरायः सपदि च हरिदासान्वितः स्वस्य गेहे
हुङ्कारैः कीर्त्तनैश्चानटदिति विविदुः कारणं नास्य लोकाः ॥
दृष्ट्वा चन्द्रोपरागं सहसितमचिराज्जाह्नवीमेत्य सस्ना-
वाचार्यो हृष्टचेता व्यतरदति बहु स्वेच्छया स्वं द्विजेभ्यः ।

हर्षोऽयं ते मनोऽच्छं मम च भुवनमानन्दितञ्चेति मत्य-
आभासोऽभीष्टसिद्धेरयमिति हरिदासोऽब्रवीत सेङ्गितं तम् ॥
श्रीवासाचार्यरत्नौ प्रमुदितमनसौ सस्नतुर्गाङ्गवारि
सानन्दं दत्तवन्तौ सुबहु गुणगणान श्रीहरेः कीर्त्तयन्तौ।
एवं सर्वेऽपि भक्ताः परमसुखभृतः संस्थिताः स्वस्वदेशे
राहुग्रासच्छलात स्वान्यपि ददुरनटन कीर्त्तनं संजगुश्च ॥
विप्राः सन्तश्च नार्यो बहुविधविभवैर्यौतुकैः पूर्णपात्रा
गत्वा दृष्टा च बालं कनकरुचिमथो आशिषावर्द्धयंश्च।
सावित्र्याद्याश्च देव्यो द्विजवररमणीवेशमाधाय पात्रं
नानाद्रव्यैः प्रपूर्य स्वयमवनिमितास्तं शिशुं दृष्टवत्यः ॥
गन्धर्वा वन्दिमुख्या अमृतभुज ऋषिव्यूह एत्यान्तरीक्षं
चक्रुस्तौर्यत्रिकाणि स्तुतिमतिविमलाश्चैकनः सङ्घबद्धाः।
सूतश्च कुंसनाटा ननृतुरधिनवद्वीपमानन्दमूढ़ा
यातायाताश्च सर्वे नहि विदितगिरो नर्त्तका गायकाश्च ॥
लोका निर्दुःखशोकाः प्रमुदितहृदया नन्दितात्मा च मिश्रः
श्रीवासाचार्य्यरत्नौ त्वरितमुपगतौ श्रीजगन्नाथमिश्रम्।
कृत्वासौ जातकर्माण्यखिलविधियुतान्यार्पयद्भूरिदानं
प्राप्तं यद् यौतुकं स्वं निजमपि च धनं विप्रसात्तच्चकार ॥
श्रीवासस्य च मालिनीति वनिता साचार्य्यरत्नप्रिया
पीताभ्यञ्जन-नारिकेल-कदली-सिन्दूर-लाजांस्तथा।
दत्त्वापूजयदङ्गना अविधवा अद्वैतभार्य्याप्यथो
सीता भर्त्तुरनुज्ञया शिशुमणिं द्रष्टुं ययौ वन्दिता ॥१००॥
सौवर्णे वटकुण्डले चरणयो रौप्योर्मिकाकिङ्किणी-
हैमानङ्गदकङ्कणांश्च कटकौ शाङ्खौ च बाह्वोर्द्वयोः।
रौप्यौ वक्रकहंसकौ करशिफामुद्राश्च हारावली-
रौक्मं व्याघ्रनखञ्च पट्टरसना भूषाश्च हस्ताङ्घ्रिगाः ॥

चित्रे पट्टदशोत्तरीयवसने चित्रञ्च पट्टाम्बरं
मुद्राः काञ्चनराजनीश्च बहुशो वित्तञ्च गोरोचनाम् ।
दूर्वा-धान्य-हरिद्रिका मलयजान काश्मीरजं कुङ्कुमं
माङ्गल्यान्यपराणि सन्निदधती पात्रेषु पेड़ाश्च सा ॥
वासोऽलङ्कृतिभिः प्रपूर्य वसनाच्छन्नाञ्च दोलां श्रिता
भक्ष्योपायनभारसञ्चययुता चेटीजनैरन्विता ।
श्रीशच्याः समुपस्थिता च भवने दृष्ट्वा शिशोर्विग्रहं
मेने तं धृतभिन्नवर्णवपुषं श्रीगोकुलेन्दुं स्वयम ॥
सर्वाङ्गञ्च सुसंष्ठुलं सुकनकज्योतिः सुलक्ष्मान्वितं
बालस्यास्य विलोक्य दिव्यविभवैरानन्दितासौ बहु ।
वात्सल्यद्रुतचेतसा च विदधे ब्रह्माशिषं मूर्द्धनि
दूर्वाधान्यसमर्पणेन सुचिरं भ्रात्रा च जीव्या इति ॥
डाकिन्यादिभयेन सा कृतवती नाम्ना निमाइं शिशुम्
आशौचान्तदिने ददौ च वसनालङ्काररराशींश्च तान् ।
सम्वर्द्धैरवमसौ सपुत्रकजगन्नाथं सपर्य्यां शची
मिश्राभ्यां विहितां प्रसन्नहृदया लब्धा च गेहं ययौ ॥
पुत्रं प्राप्य रमापतिं खलु शचीमिश्रौ प्रपूर्णेप्सितौ
गेहं धान्यधनैश्च सम्भृतमभूद्देहो जनैः सम्मतः ।
आनन्दोऽभवदन्वहं किल जगन्नाथो महावैष्णवः
शान्तोऽलम्पटशुद्धदान्तचरितो भोगेष्वनुत्कण्ठितः ॥
लब्धान्येव सुतप्रभाववशतः सर्वाणि वित्तान्यसौ
विप्रेभ्यः प्रददौ सदैव हि मुदा विष्णोः परप्रीतये ।
श्रीनीलाम्बर एकदा हि गणयँल्लग्नं शिशोर्मोदितो
मिश्रं निर्जनमाह्वयन् कथितवानेवं भविष्यत् फलम् ।
लग्नेऽङ्गे च शिशोः सुलक्षणचया माहात्म्यसंसूचका
लक्ष्यन्तेऽत्र पृथग् भवाब्धिमचिरात्सन्तारयिष्यत्ययम् ।

एवं श्रीभगवान प्रभुः करुणया शच्यालयेऽवातरत
शृण्वंस्तल्लभते जनः खलु कृपां गौरस्य पादौ तथा ॥
यो लब्ध्वापि मनुष्यजन्म शृणुयान्नैवंगुणान श्रीप्रभो-
स्तज्जन्मैव वृथा भवेत स हि कथं जन्मक्षणे नो मृतः।
नूनं स श्रमपीड़ितोऽमृतनदीं प्राप्यापि मोहात्त्यजन
दूरस्थं विषगर्त्तवर्त्तिसलिलं पातुं मुधा चेष्टते ॥
श्रीचैतन्यपदं नित्यानन्दाद्वैतपदाम्बुजम् ।
श्रीरूप-श्रीस्वरूप-श्रीरघुनाथपदाम्बुजम् ॥
आत्मजीवनसर्व्वस्वं शिरस्याधाय यत्नतः ।
कृष्णदासेन गीतेयं जन्मलीला महाप्रभोः ॥११०॥

इति श्रीचैतन्यचरितामृत आदिखण्डे जन्ममहोत्सववर्णनं
नाम त्रयोदशः परिच्छेदः ॥

श्रीचैतन्यचरितामृत आदिलीलायां

चतुर्दशः परिच्छेदः ।

"कथञ्चन स्मृते यस्मिन्दुष्करं सुकरं भवेत् ।
विस्मृतिश्च स्मृतिं याति श्रीचैतन्यममुं भजे ॥१॥"
श्रीचैतन्यो मुहुर्जीयान्नित्यानन्दो जयत्वसौ ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥
गौरस्य जन्मलीलायाः सूत्रमुक्तं महाप्रभोः ।
यशोदानन्दनो येन श्रीशचीनन्दनोऽभवत् ॥
क्रमोऽयं जन्मलीलाया मया प्रोक्तः समासतः ।
सूत्रं तद्बाल्यलीलाया विस्तरेणोच्यते पुनः ॥
"वन्दे चैतन्यकृष्णस्य बाल्यलीलां मनोहराम् ।
लौकिकीमपि तामीशचेष्टया बलितान्तराम् ॥२॥"
प्रथमं बाल्यलीलायामुत्तानशयनं प्रभोः ।
आत्मनः पदचिह्नानि स पितृभ्यामदर्शयत् ॥
क्षुद्राणि पदचिह्नानि तावैक्षेतां गृहान्तरे ।
रेजुस्तत्र ध्वजं चक्रं मीनवज्रे च कम्बु च ॥
चित्तेऽतिविस्मयो जात उभयोस्तानि पश्यतोः ।
कुट्टिमे पदचिह्नानि कस्येमानीत्यनिश्चयात् ॥
मिश्र ऊचेऽस्त्ययं बालगोपालः शिलया सह ।
कौतुकेन चलन्मूर्त्तिर्गेहे क्रीड़त्यसाविति ॥
इत्थमुक्ते निमाइस्तु त्यक्तनिद्रो रुरोद च ।
शची क्रोड़े तमाधाय स्तन्यदुग्धमपाययत् ॥

पाययन्ती सुतं स्तन्यमपश्यत्तत्पदोत्तलम् ।
तत्र तान्येव चिह्नानि दृष्ट्वा मिश्रं न्यवेदयत् ॥
दृष्ट्वा मिश्रेण चिह्नानि परमानन्दितात्मना ।
रहो विज्ञापितश्चक्रवर्त्ती नीलाम्बरस्तदा ॥१०॥
चक्रवर्त्ती हसन्नूचे तदा तानि विलोकयन् ।
लग्नं गणयता पूर्वं लिखित्वा स्थापितं मया ॥
द्वात्रिंशत्संख्यमेवोक्तं महापुरुषलक्षणम् ।
तत्सर्वमस्य बालस्य नूनमङ्गेषु दृश्यते ॥

तथाहि सामुद्रके तृतीयश्लोक :—

पञ्चदीर्घः पञ्चसूक्ष्मः सप्तरक्तः षडुन्नतः ।
त्रिह्रस्वपृथुगम्भीरो द्वात्रिंशल्लक्षणो महान् ॥७॥
नारायणस्य चिह्नानि सन्त्यस्य करयोः पदोः ।
बालोऽयं निश्चितं सर्वान जनान सन्तारयिष्यति ॥
अयं वैष्णवधर्मस्य सुप्रचारं करिष्यति ।
कुलद्वयस्य निस्तारः शिशोरस्माद्भविष्यति ॥
अद्य पुण्यदिनं सर्वेऽनुतिष्ठन्तु महोत्सवम् ।
विप्रानामन्त्र्य नामास्य कुर्वन्तु च यथाविधि ॥
करिष्यत्येष विश्वेषां यतो धारणपोषणे ।
तद् विश्वम्भर इत्यस्य नामान्वर्थं भवेदिति ॥
तदाकर्ण्य शचीमिश्रौ परमानन्दमाप्नुताम् ।
विप्रानानीय सस्त्रीकांश्चक्रतुश्च महोत्सवम् ॥
अहोभिरथ गच्छद्भिर्जानुभ्यामचलत् प्रभुः ।
तत्र नाना चमत्कारान्दर्शयामास भूतले ॥
अवाचयद्धरेर्नाम जनान् स्वक्रन्दनच्छलात ।
हरिरित्यब्रुवन्नार्य्यः श्रीगौराङ्गो जहास च ॥

स कियद्भिरहोभिस्तु पदाभ्यामव्रजत् स्वयम् ।
वयस्यैः शिशुभिः सार्द्धमक्रीड़द्बहुधा तथा ॥२०॥
शचीमातैकदा पात्रं लाजामिक्षिकसम्भृतम् ।
पुत्राय ददती भुंक्ष्वोपविश्येत्यब्रवीन्मुदा ॥
एवमुक्त्वा व्यापृतायां श्रीशच्यां गृहकर्मणि ।
आरेभे मृत्तिकां भोक्तुं शिशू रहसि संस्थितः ॥
शची विलोक्य धावन्ती हाहेत्युक्त्वा समागता ।
आच्छिद्य च मृदं प्रोचे किं भुङ्क्षे मृत्तिकामिति ॥
प्रत्युवाच रुदन् बालः कथं मातः प्रकुप्यसि ।
को मे दोषस्त्वया दत्ता भोजनार्थं मृदेव मे ॥
लाजा आमिक्षिकं चान्नं सर्वं मृद्विकृतिः खलु ।
मृत्तिकैषा मृदस्तानि को भेदोऽत्र विचार्य्यताम् ॥
देहो मृन्मयः तद्भक्ष्यं विचार्य्य तत् समीक्ष्यताम् ।
दूषयस्यविचारेण मामित्यत्र ब्रवीमि किम् ॥
अन्तर्विस्मयमापन्ना शचीमाताब्रवीत् सुतम् ।
मृद्भोजनाय को नु त्वां ज्ञानयोगमशिक्षयत् ॥
मृद्विकारेऽपि भुक्तेऽन्ने शरीरं पुष्टिमाप्नुयात् ।
भुक्तायां मृदि रोगः स्यादाप्नुयाच्च तनुः क्षयम् ॥
घटेन मृद्विकारेण पूर्णमानीयते जलम् ।
मृतपिण्डे निहितं वारि निःशेषं शुष्यति ध्रुवम् ॥
सङ्गोपयितुमात्मानं प्रभुर्मातरमब्रवीत् ।
पूर्वमेव कथं मातरित्थमुक्तवती न माम् ॥३०॥
अधुना ज्ञातवांस्तावन्नैवं भोक्ष्ये मृदं पुनः ।
क्षुधायां मम जातायां तव स्तन्यं पिबाम्यहम् ॥
इत्युक्त्वा जननीक्रोड़मारुरोह महाप्रभुः ।
ईषद्धासमुखाब्जेन मातुः स्तन्यं पयः पपौ ॥

नानाविधच्छलेनैवं स ऐश्वर्याण्यदर्शयत् ।
गोपयामास पश्चात्तु बालभावं प्रकाशयन् ॥
अतिथिब्राह्मणस्यान्नं भुक्त्वा वारत्रयं प्रभुः ।
रहः सन्दर्श्य चात्मानं तं पश्चादुदधारयत् ॥
गृहाद्बहिः स्थितो जातु चौरेणापहृतः प्रभुः ।
तस्य स्कन्धं समारुह्य मोहयंस्तं समाययौ ॥
व्याधिच्छलाद् गृहं गत्वा जगदीशहिरण्ययोः ।
बुभुजे विष्णुनैवेद्यमेकादश्यां तिथौ प्रभुः ॥
वयस्यान् सभमादाय प्रतिवेशिगृहान् गतः ।
चोरयन् भुक्तवान् भक्ष्यं शिशूंश्चाहतवान् क्वचित् ॥
आहताः शिशवस्तेन शचीदेव्यै न्यवेदयन् ।
सा तेषां वाक्यमाकर्ण्य पुत्रं किञ्चिदभर्त्सयत् ॥
चौर्यमालम्बसे कस्मात् कथमाहंसि बालकान् ।
कथं परगृहं यासि स्वगृहे तव नास्ति किम् ॥
इति मातुर्वचः श्रुत्वा क्रुद्धो गेहान्तरं विशन् ।
तत्र यावन्ति भाण्डानि सर्वाण्येव बभञ्ज सः ॥४०॥
तदा माता निजोत्सङ्गे कृत्वा तं समतोषयत् ।
आत्मदोषन्तु विज्ञाय लज्जमानोऽभवत् प्रभुः ।
कदाचिन्मृदु हस्तेन स मातरमताड़यत् ।
ततस्तां मूर्च्छितां दृष्ट्वा मुहुः क्रन्दितवान् स्वयम् ॥
नार्यः प्रोचुर्विलोक्यैवं नारिकेलं त्वमानय ।
तथा कृते हि माता ते सुस्थदेहा भवेदिति ॥
द्वे फले प्रभुणानीते गच्छतैव गृहाद्बहिः ।
तथावलोक्य नार्यस्ताः सर्वा विस्मयमाययुः ॥
वयस्यैः सह गङ्गायां तस्मिन् स्नानार्थमुद्यते ।
कदाचित् कन्यकाः सर्वा देवपूजार्थमागताः ॥

गङ्गास्नानं समाप्यैता यावत् पूजार्थमासत।
तासां मध्ये समेत्यासौ समासीनोऽब्रवीच्च ताः॥
मां पूजयत भो यूयमहं दास्यामि वो वरान्।
गङ्गा दुर्गा च दास्यौ मे किङ्करश्च महेश्वरः॥
स्वयं चन्दनमालिम्पन् पुष्पमालामधारयत्।
आच्छिद्याभुङ्क्त नैवेद्यं रम्भामिक्षिकतण्डुलम्॥
सकोपं कन्यकाः प्रोचुर्निमाए शृणु नो वचः।
ग्रामसम्पर्कतो भ्राता सर्वासामपि नो भवान्॥
अस्मास्वीदृश आचारो भवतो नैव युज्यते।
नादत्तस्व देवतासज्जामन्याय्यं नैव कुर्विति॥५०॥
प्रभुरूचेऽथ युष्मभ्यं सर्वाभ्यो दीयते वरः।
युष्माकं भविता भर्त्ता श्रेष्ठः परमसुन्दरः॥
धनधान्यैः समृद्धश्च विदग्धः पण्डितो युवा।
भूयासुः सप्तशः पुत्रा मतिमन्तश्चिरायुषः॥
इति तद्वरमाकर्ण्य ता अन्तस्तोषमाप्नुवन्।
बहिर्भर्त्सितवत्यस्तं मिथ्यारोषेण कन्यकाः॥
काचिदुद्गृह्य नैवेद्यं कन्यका च पलायत।
प्रभुः क्रोधसमाविष्टस्तामाहूयाब्रवीदिदम्॥
कार्पण्याद् यदि मह्यं त्वं नैवेद्यं नैव दास्यसि।
भर्त्ता ते भविता वृद्धः सपत्नीनाञ्च सप्तकम्॥
इत्याकर्ण्य वचस्तस्य सर्वास्ता भीतमानसाः।
स्याच्चेत् किञ्चित् स जानाति देवाविष्टोऽपि किन्त्विति॥
ततो नैवेद्यमानीय पुरस्तस्य च सा न्यधात्।
नैवेद्यं भक्षयित्वासौ तस्या इष्टं वरं ददौ॥
इत्थंकारं स चापल्यं सर्वाभ्योऽदर्शयत प्रभुः।
प्राप्तवत्यः सुखं सर्वा न काचिद्दुःखिताभवत॥

एकदा वल्लभाचार्यकन्या लक्ष्मीतिनामिका ।
गङ्गायां विहितस्नाना देवपूजार्थमागता ॥
तस्यां बभूव दृष्टायां साभिलाषं प्रभोर्मनः ।
लक्ष्मीश्चाप परां प्रीतिं लब्ध्वा तत् प्रभुदर्शनम् ॥६०॥
उभयोः सहजः प्रेमा तदा समुदितोऽभवत् ।
छन्नोऽपि बालभावेन निश्चितं सुप्रकाशितः ॥
उभयोः पश्यतोश्चेतस्युल्लासोऽभूत परस्परम् ।
देवपूजाच्छलेनैव द्वाभ्यां ताभ्यां प्रकाशितः ॥
प्रभुणोक्तमहं देवो महेशोऽर्च्चय मां ततः ।
मयि सम्पूजितेऽभीष्टाँल्लप्स्यसे त्वं वरानिति ॥
लक्ष्मीः सचन्दनं पुष्पं तदङ्गेषु समार्पयत् ।
तत्कण्ठे स्रजमारोप्य ववन्दे तत्पदद्वयम् ॥
प्रभुर्हसितुमारब्धस्तत्कृतं प्राप्य पूजनम् ।
अङ्गीचकार तद्भावमेवं श्लोकं पठन्नसौ ॥

"तथाहि श्रीमद्भागवते १०।२२।१६—
सङ्कल्पो विदितः साध्व्यो भवतीनां मदर्च्चनम् ।
मयानुमोदितः सोऽसौ सत्यो भवितुमर्हति ॥४॥"
इत्थं लीलां विधायैव तावुभौ स्वगृहं गतौ ।
गम्भीरां को नु चैतन्यलीलां वेदितुमर्हति ॥
दृष्ट्वा चैतन्यचापल्यं प्रेम्णा सर्वजनाः शचीम् ।
जगन्नाथञ्च सम्प्राप्य सोपालम्भं वचोऽब्रुवन् ॥
एकदा श्रीशचीदेव्यां भर्त्सयन्त्यां निजात्मजम् ।
ग्रहीतुञ्चानुधावन्त्यां पुत्रस्तस्याः पलायत ॥
उच्छिष्टविवरस्थाने त्यक्तस्थाल्या उपर्यसौ ।
सुखेनोपविशन्नासीद् विश्वम्भरमहाप्रभुः ॥

तमुपेत्य शची प्रोचे किममेध्यं त्वमस्पृशः ।
जाह्नवीमवगाहस्व तवापूता तनूरिति ॥७०॥
आकर्ण्यैतज्जनन्यै स ब्रह्मज्ञानमुपादिशत ।
तनयं स्नापयामास जननी विस्मयान्विता ॥
शची तनयमादाय शयानासीत् कदाचन ।
दिव्यमूर्तिधरैर्लोकैः पूर्णं चत्वरमैक्षत ॥
शच्योक्तं याहि पुत्र त्वं पितरञ्चाह्वयाश्विति ।
मातुरादेशमादाय बहिर्यातो महाप्रभुः ॥
चलतः पदयोस्तस्योत्थितो नूपुरनिक्वणः ।
माता पिता च तं श्रुत्वा विस्मितौ तौ बभूवतुः ॥
मिश्रेणोक्तमिदं तावद् घटते महदद्भुतम् ।
शिशो रिक्तपदे कस्माच्छ्रूयते नूपुरध्वनिः ॥
शची प्रोक्तवती दृष्टं मयान्यत् पुनरद्भुतम् ।
दिव्यदिव्यैर्जनैरेत्य चत्वरं मम सम्भृतम् ॥
कोलाहलः कृतस्तैश्च न तच्छक्नोमि वेदितुम् ।
ते कञ्चन स्तुवन्तीति मयैवमनुमीयते ॥
मिश्रेणोक्तं भवत्येवं चिन्तया किं प्रयोजनम् ।
विश्वम्भरस्य कल्याणं भवत्वित्येव कामना ॥
मिश्रः पुत्रस्य चापल्यं कदाचिदवलोकयन ।
बहु भर्त्सयमानस्तं धर्मनीतिमशिक्षयत ॥
ततः स्वप्ने ददर्शासौ निशि कञ्चित् समागतम् ।
विप्रं रोषसमाविष्टं दूषयन्तं कटूक्तिभिः ॥८०॥
मिश्र त्वं नैव जानासि स्वरूपं तनयस्य ते ।
निर्भर्त्सयन सुतं मत्वा ताडयस्यपि निर्दयम् ॥
मिश्रः प्रत्यवदद्विप्रं देवः सिद्धोऽथवा मुनिः ।
असौ योऽपि महानस्तु सोऽयं खलु सुतो मम ॥

लालनं शिक्षणं सूनोः स्वधर्मः पितुरेव हि ।
धर्ममर्मं कथं तेन ज्ञेयं मच्छिक्षणं विना ॥
प्रत्युवाच ततो विप्रो देवः सिद्धो नु यन्तयम ।
ज्ञानमस्य स्वतःसिद्धं तदा ते शिक्षणं वृथा ॥
मिश्रः प्रत्याह पुत्रश्चेद् भवेन्नारायणः स्वयम् ।
तथापीह पितुर्धर्मो भवेत् पुत्रस्य शिक्षणम् ॥
इत्थं धर्मविचारं तौ व्यदधातां परस्परम् ।
मिश्रो विशुद्धवात्सल्यान्न किञ्चिद्बुबुधेऽपरम् ॥
विप्र एतावदाकर्ण्य सानन्दहृदयो गतः ।
वीतनिद्रस्तदा मिश्रः प्राप्तः परमविस्मयम् ॥
स्वबन्धुबान्धवेभ्योऽसौ स्वप्नोदन्तं न्यवेदयत् ।
श्रुत्वा सर्वे जनास्तत्र विस्मयं परमं ययुः ॥
एवं शैशवलीलां स व्यदधाद् गौरचन्द्रमाः ।
प्रत्यहं हृदयानन्दो मातापित्रोरवर्द्धत ॥
मिश्रेण कारितः पुत्रो विद्यारम्भं कियद्दिनैः ।
युक्तव्यञ्जनवर्णेषु शिक्षितोऽल्पदिनैरभूत् ॥६०॥
गौरस्य बाल्यलीलायाः सूत्रानुक्रम ईरितः ।
इमां विस्तारयामास दासवृन्दावनः कविः ॥
अतोऽस्याः प्रभुलीलायाः कृतं सूत्रं समासतः ।
लिखितं नैव विस्तार्य पुनरुक्तिभयान्मया ॥
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥६३॥

इति श्रीचैतन्यचरितामृत आदिखण्डे बाल्यलीलासूत्रवर्णनं नाम चतुर्दशः परिच्छेदः ।

श्रीचैतन्यचरितामृत आदिलीलायां

पञ्चदशः परिच्छेदः

"कुमनाः सुमनस्त्वं हि याति यस्य पदाब्जयोः ।
सुमनोऽर्पणमात्रेण तं चैतन्यप्रभुं भजे ॥१॥"
जयतात् कृष्णचैतन्यो नित्यानन्दो जयत्यथ ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥
सूत्रं पौगण्डलीलायाः क्रियते साम्प्रतं मया ।
मुख्यमध्ययनं कर्म पौगण्डवयसि प्रभोः ॥

"तथाहि—

पौगण्डलीला चैतन्यकृष्णस्यातिसुविस्तृता ।
विद्यारम्भमुखा पाणिग्रहणान्ता मनोहरा ॥२॥"
स व्याकरणमध्यैष्ट श्रीगङ्गादासपण्डितात् ।
शृण्वन्नेव हि कण्ठेन सूत्रवृत्तीर्गृहीतवान् ॥
टीकायां पञ्जिकायाञ्च सोऽल्पाहैर्निपुणोऽभवत् ।
असौ पुरातनच्छात्रानजयन्नूतनोऽपि सन् ॥
तस्याध्ययनलीलासौ वर्णितास्ति सविस्तरम् ।
चैतन्यमङ्गले वृन्दावनदासेन धीमता ॥
एकदा चरणौ मातुर्वन्दमानो महाप्रभुः ।
विनयेनावदन्मातरेकं मे देहि याचितम् ॥
माता प्रोवाच दास्यामि यत्त्वं याचसि मामिति ।
प्रभुः प्रत्यब्रवीदेकादश्यां भुञ्जीय नौदनम् ॥
शची प्रोचे न भुञ्जीथा वत्स साधु त्वमुक्तवान् ।
असौ तदा प्रभृत्येकादश्यां न भुक्तवान् प्रभुः ॥

समालोक्य ततो मिश्रो विश्वरूपस्य यौवनम् ।
याचित्वा कन्यकां काञ्चित्तस्योद्वाहाय चेष्टितः ॥
विश्वरूपस्तदाकर्ण्य गृहं त्यक्त्वा पलायितः ।
ततो गृहीतसन्न्यासस्तीर्थयात्रां चकार सः ॥१०॥
ज्ञात्वा पुरन्दरो मिश्रोऽभवद्दुःखितमानसः ।
मातापित्रोः समाश्वासं चकारासौ प्रभुस्तदा ॥
साधुवृत्तं यतो विश्वरूपः सन्न्यासमग्रहीत् ।
समुद्धारितवान यत् स मातापित्रोः कुलद्वयम् ॥
अहं तावत् करिष्यामि सेवनं युवयोर्द्वयोः ।
इत्याकर्ण्य ससन्तोषं मातापित्रोरभून्मनः ॥
अथ नैवेद्यताम्बूलमेकदा भक्षयन प्रभुः ।
विलुप्तसंज्ञ एवासावपतद्धरणीतले ॥
मात्रा पित्रा च दत्तेन वारिणा सत्वरं मुखे ।
सुस्थः सन् प्रभुरुत्थाय प्रोवाचोदन्तमद्भुतम् ॥
विश्वरूप इतो दूरं मां नीत्वा गतवान् पुनः ।
सन्न्यासमवलम्बस्व त्वमित्यकथयच्च माम् ॥
मयोक्तं कथमेवं स्यादनाथौ पितरौ मम ।
अहं बालक एवास्मि सन्न्यासस्यास्ति का कथा ॥
गृहस्थः सन् करिष्यामि मातापित्रोर्निषेवणम् ।
लक्ष्मीनारायणौ देवौ तेनैव मयि तुष्यतः ॥
इति प्रत्युदितो विश्वरूपो मां प्राहिणोदिह ।
कोटिशश्च नमस्कारानसौ मात्रे न्यवेदयत ॥
एवं गौरहरिर्लीला बहुधा कृतवान स्वयम् ।
कारणं किञ्च लीलाया इति बोद्धुं न शक्यते ॥२०॥
कियद्दिनेषु यातेषु मिश्रो लोकान्तरं गतः ।
शोकः संववृधे मातापुत्रयोर्हृदि दारुणः ॥

बन्धवो बान्धवाश्चेत्य तावुभौ पर्यसान्त्वयन् ।
अन्वतिष्ठत् पितुः कृत्यमीश्वरोऽसौ यथाविधि ॥
अहःकतिपयेनैवं चेतसाचिन्तयत् प्रभुः ।
गृह्यधर्मो विधेयो मे गृहस्थोऽस्मि यतोऽधुना ॥
गृहिणीमन्तरा किन्तु गृहधर्मो न शोभते ।
इति चिन्तयतस्तस्य परिणेतुं मनोऽभवत् ॥

"तथाहि स्मृतिवचनम्—

न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।
तया हि सहितः सर्वान् पुरुषार्थान् समश्नुते ॥३॥"
पठित्वा प्रभुरागच्छन्नेकदा दैवयोगतः ।
बल्लभाचार्यकन्यां स दृष्टवान् जाह्नवीपथे ॥
पूर्वसिद्धो द्वयोर्भावः पुनरभ्युदितोऽभवत् ।
घटको वनमालीति शचीं दैवादुपस्थितः ॥
सम्बन्धे घटिते तेन शचीदेव्यानुमोदिते ।
लक्ष्मीं परिणिनायासौ श्रीशचीनन्दनः प्रभुः ॥
श्रीवृन्दावनदासोऽस्य विवाहं वह्ववर्णयत् ।
पुनरुक्तिभयेनाहं कृतवान्नेह विस्तृतिम् ।
प्रभोर्वयसि पौगण्डे लीला आसन्ननेकधा ।
दासवृन्दावनेनासां बहुधा वर्णना कृता ॥
अतएवात्र दिङ्मात्रं मयेदानीमुदाहृतम् ।
चैतन्यमङ्गले लोके लीलास्ताः ख्यातिमागताः ॥३०॥
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥३१॥

इति श्रीचैतन्यचरितामृत आदिखण्डे पौगण्डलीलासूत्रवर्णनं
नाम पञ्चदशः परिच्छेदः ।

श्रीचैतन्यचरितामृत आदिलीलायां

षोड़शः परिच्छेदः ।

"कृपासुधासरिद् यस्य विश्वमाप्लावयन्त्यपि ।
नीचगैव सदाभाति तं चैतन्यप्रभुं भजे ॥१॥"
जय श्रीकृष्ण चैतन्य नित्यानन्द जय प्रभो ।
जयाचार्य्य त्वमद्वैत गौरभक्ता जयोऽस्तु वः ॥
"जीयात् कैशोरचैतन्यो मूर्त्तिमत्या गृहागमात् ।
लक्ष्म्यार्च्चितोऽथ वाग्देव्या दिशां जयिजयच्छलात् ॥२॥"
सूत्रं कैशोरलीलाया इदानीमनुबध्यते ।
अध्यापयितुमारेभे प्रभुः शिष्यगणं तदा ॥
यत्नतः शतशः शिष्यान् शास्त्राण्यध्यापयत् सदा ।
शास्त्रव्याख्यानमाकर्ण्य जनाः सर्वेऽतिविस्मिताः ॥
सर्वशास्त्रविचारेण पण्डितेषु जितेष्वपि ।
प्रभोर्विनयभङ्गया तु न कश्चिद्दुःखितोऽभवत् ॥
निजशिष्यगणैः सार्द्धं प्रागल्भ्यं बहुधाचरन् ।
जलकेलिं चकारासौ गङ्गायां तैः सकौतुकम् ॥
एवं गच्छति काले च वङ्गदेशं गतः प्रभुः ।
ग्राहयामास तत्रत्यान् समन्तान्नामकीर्त्तनम् ॥
तस्य विद्याप्रभावेण विस्मयाक्रान्तचेतसः ।
उपेत्य शतशश्छात्रास्तस्मादध्येतुमुद्यताः ॥
विप्रस्तद्देशवास्तव्यो मिश्रस्तपननामकः ।
अशक्नोन्नैव कर्त्तुं स साध्यसाधननिश्चयम् ॥
विभ्रान्तो बहुभिः शास्त्रैर्बहूनां वचनैश्च सः ।
साध्यानां साधनानाञ्च श्रेष्ठतां बोद्धुमक्षमः ॥

स्वप्ने केनचिदुक्तोऽसौ तपन श्रूयतां वचः ।
इदानीमुपगच्छ त्वं निमाइं नाम पण्डितम् ॥१०॥
स साध्यसाधनानां ते श्रेष्ठतामुपदेक्ष्यति ।
सोऽयमेवेश्वरः साक्षादिति नास्त्यत्र संशयः ॥
स्वप्नं विलोक्य मिश्रोऽसौ प्रभोः पादमुपागतः ।
निखिलं स्वप्नवृत्तान्तं सम्यक् तस्मै न्यवेदयत् ॥
प्रभुस्तुष्टोऽवदत्तस्मै साध्यसाधननिश्चयम् ।
उपादिशच्च तं नामकीर्त्तनं कुर्व्विति स्फुटम् ॥
अधिवस्तुं नवद्वीपं स ऐच्छत् प्रभुणा समम् ।
आदिदेश प्रभुस्तन्तु गच्छ वाराणसीमिति ॥
मया सार्द्धं हि तत्रैव सङ्गस्ते भावतेति च ।
मिश्रः प्राप्य तदादेशं काशीधामागमत्तदा ॥
अतर्क्या हि प्रभोर्लीला न समर्थोऽस्मि वेदितुम् ।
स्वसङ्गात्त्याजयंस्तं स काशीं प्रेरितवान् कथम् ॥
एवं वङ्गजनास्तेन महाकल्याणमापिताः ।
नाम दत्त्वा कृता भक्ताः पाठयित्वा च पण्डिताः ॥
इत्थं वङ्गेष्वसौ लीलाः कृतवान् बहुधा पुनः ।
लक्ष्मीरासीन्नवद्वीपे प्रभोर्विच्छेदकातरा ॥
प्रभोर्विरहसर्पेण सा सन्दष्टाभवत्तदा ।
विषाद् विरहसर्पस्य सा च लोकान्तरं गता ॥
मनसा ज्ञातवान् सर्वमन्तर्य्यामितया प्रभुः ।
दुःखं बुद्ध्वा शचीदेव्याः स्वदेशं तत आगतः ॥२०॥
गृहीत्वा बहु वित्तानि समागत्य निजालयम् ।
तत्त्वज्ञानोपदेशेन शच्याः शोकं व्यमोचयत् ॥
पुनर्विद्याविलासं स कृतवान् शिष्यमण्डलैः ।
विद्याभिरजयत सर्वान् प्राग् लभ्यश्च समाश्रयत ॥

अथ विष्णुप्रियां देवीं पर्य्यणैषीन्महाप्रभुः ।
विजिग्ये च ततस्तावदसौ दिग्जयिपण्डितम् ॥
श्रीवृन्दावनदासेन कृतास्य बहुविस्तृतिः ।
न स्फुटं रचितस्तेन विचारो गुणदोषयोः ॥
तमेवाहं नमस्कृत्य तमेवांशं हि वर्णये ।
यत्रासौ दिग्जयी विद्वानात्मानमजुगुप्सत ॥
ज्योत्स्नास्नातविभावर्य्यां सशिष्यः प्रभुरेकदा ।
विद्यालापप्रसङ्गेन गङ्गातीर उपाविशत् ॥
तदा दिग्विजयी कश्चित्तमुपागत्य पण्डितः ।
गङ्गाया वन्दनं कुर्वन प्रभुणा सह सङ्गतः ॥
कृत्वा सादरसम्मानं तमुपावेशयत प्रभुः ।
सावज्ञहृदयेनासौ दिग्जयी पण्डितोऽवदत ॥
निमाइ-पण्डिताख्योऽसि त्वं व्याकरणशिक्षकः ।
यशो गायन्ति लोकास्ते बाल्यशास्त्रीयविद्यया ॥
ज्ञातं व्याकरणं नाम कलापं पाठ्यते त्वया ।
अतस्ते शिष्यसंलापः समस्यासङ्कुलो मया ॥३०॥
प्रभुः प्रोचेऽभिमानो मे वैयाकरणिकोऽस्मि यत् ।
शिष्याः किन्तु न बुध्यन्ते नाहं बोधयितुं क्षमः ॥
क भवान सर्वशास्त्रेषु कवित्वे च सुकौशली ।
क वयं शिशवः सर्वे छात्रा नव्यतमाः खलु ॥
कवित्वं भवतः श्रोतुं किञ्चित् काङ्क्षति मे मनः ।
गङ्गाया वर्णनं कृत्वा यदि मामनुकम्पसे ॥
इत्याकर्ण्योद्यतो विप्रो गर्वाद् वर्णयितुं तथा ।
दण्डेनैकेन स गङ्गां शतश्लोक्या ह्यवर्णयत ॥
तदाकर्ण्य प्रभुस्तस्मै साधुवादान बहून ददौ ।
भवता सदृशः कोऽपि कविर्नान्योऽस्ति भूतले ॥

श्लोकस्यार्थं तव ज्ञातुं सामर्थ्यं कस्य विद्यते ?
वेत्थ त्वमेव तस्यार्थमुत वेत्ति सरस्वती ॥
श्लोकस्यैकतमस्यार्थं स्वमुखेन करोषि चेत् ।
तं श्रुत्वा सुखिनः सर्वे भविष्यन्ति जना इति ॥
तदा दिग्विजयी श्लोकं व्याख्येयं पृष्टवान् प्रभुम् ।
ततः श्लोकशतादेकः प्रभुणोदीरितस्तदा ॥

"तथाहि दिग्विजयि-वाक्यम्—

महत्त्वं गङ्गायाः सततमिदमाभाति नितरां
यदेषा श्रीविष्णोश्चरणकमलोत्पत्तिसुभगा ।
द्वितीयश्रीलक्ष्मीरिव सुरनरैरर्च्यचरणा
भवानीभर्त्तुर्या शिरसि विभवत्यद्भुतगुणा ॥३॥"
श्लोको व्याख्यायतामेष इत्युक्तः प्रभुणा द्विजः ।
परं विस्मयमापन्नो दिग्जयी पृष्टवान प्रभुम् ॥
वात्यातुल्येन वेगेन श्लोकानुद्गीतवानहम् ।
तेषामेष कथं श्लोकस्त्वया कण्ठेन धारितः ॥४०॥
प्रत्युवाच प्रभुर्देववरेण त्वं कविर्यथा ।
तथा देववरेणैव कोऽपि श्रुतिधरो भवेत् ॥
तस्य वाक्येन सन्तुष्टः श्लोकं व्याख्यातवान कविः ।
प्रभुरूचे गुणान् दोषान् श्लोकस्यास्य वदेति तम् ॥
विप्रेणोक्तमिह श्लोके दोषो नास्त्येव लेशतः ।
सन्ति केचिदनुप्रासा उपमालङ्कृतिगुणाः ॥
प्रभुः प्रत्यब्रवीद् वच्मि न चेत् कुप्यसि मे द्विज ।
अत्र त्वद्रचिते श्लोके को दोषोऽस्तीति तद्वद ॥
तवैतत् प्रातिभं काव्यं देवतातोषकारणम् ।
गुणदोषाः प्रतीयन्ते श्लोके साधु विचारिते ॥

अतः सम्यक्तया श्लोकस्त्वयैवायं विचार्यताम् ।
प्रत्युवाच कविः शुद्धं वेदवद् यन्मयोदितम् ॥
नाधीतवानलङ्कारांस्त्वं वैयाकरणोऽसि भोः ।
कवित्वस्यास्य सारं त्वं कथं विज्ञातुमर्हसि ॥
प्रत्युक्तं प्रभुणा तस्मात् प्रार्थये त्वां महाकवे ।
गुणदोषान् विचार्यास्य त्वं हि बोधय मामिति ॥
नाधीतवानलङ्कारान् केवलं श्रुतवानहम् ।
अत एवात्र पश्यामि गुणदोषान् बहूनिति ॥
के दोषाः के गुणाश्चेति वदेति कविनोदितः ।
प्रत्युवाच प्रभुर्वच्मि शृणु मह्यं न कुप्य च ॥५०॥
दोषाः पञ्चात्र विद्यन्ते तथालङ्कारपञ्चकम् ।
विवृणोमि क्रमेणाहं त्वया श्रुत्वा विचार्यताम् ॥
अविमृष्टविधेयांशदोषौ द्वौ क्रमभग्नता ।
विरुद्धमतिकारित्वं समाप्तपुनरात्तता ॥
श्लोके विधेयं गङ्गाया महत्त्वमिति यत् पदम् ।
इदमित्यनुवाद्यं तत्-पश्चाद् वक्तुं न युज्यते ॥
आदावुक्त्या विधेयस्यानुवाद्यस्य च तत्परम् ।
श्लोकस्य प्रकृतोऽर्थोऽत्र प्रतीतावेव बाधितः ॥

"तथाहि काव्यप्रकाशे—

अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत् ।
न ह्यलब्धास्पदं किञ्चित् कुत्रचित् प्रतितिष्ठति ॥४॥"
तथा द्वितीयश्रीलक्ष्मीरित्यत्र च द्वितीयता ।
विधेया गौणता तस्याः समासात्तदनर्थता ॥
विधेयं तद्द्वितीयत्वं समासाद् गौणतां गतम् ।
लक्ष्म्याः सादृश्यमित्यर्थप्रकाशे विघ्नकारकम् ॥

अविमृष्टविधेयांशभावो दोषोऽयमाख्यया।
दोषमन्यं पुनर्वच्मि श्रूयतामवधानतः॥
भवानीभर्त्तुरित्येतत् पदं न्यस्तं त्वया सुखम्।
विरुद्धमतिकारित्वं नाम दोषो महांस्ततः॥
भवानीति पदेनात्र भवस्य स्त्रीति कथ्यते।
तस्या भर्त्तेति सम्प्रोक्ते द्वितीयः पतिरूहितः
भवपत्न्याः स भर्त्तेति श्रोतुरर्थो विरुध्यते।
विरुद्धमतिकारित्वं सर्वशास्त्रेषु दूष्यते॥६०॥
भर्त्रे ब्राह्मणभार्याया यत्किञ्चिद्दीयतामिति।
वाक्यं श्रुत्वा द्वितीयोऽस्या भर्त्तेत्यर्थः प्रतीयते॥
विभवतीत्यनेनैव वाक्ये सम्यक् समाप्यते।
अथाद्भुतगुणेत्येवं पुनरात्तं विशेषणम्॥
श्लोके यद्यपि पादेषु त्रिष्वनुप्राससौष्ठवम्।
एकपादे तु नास्तीति भग्नप्रक्रमदूषणम्॥
श्लोकेऽस्मिन वर्त्तमानेऽपि सदलङ्कारपञ्चके।
दोषैः पञ्चभिरेतैस्तु श्लोकोऽयं भस्मसात् कृतः॥
यदि स्यात् कश्चन श्लोको दशालङ्कारमण्डितः।
एको दोषस्तदा हन्यात् सर्वालङ्कारगौरवम्॥
देहः सौन्दर्य्ययुक्तोऽपि भूषितोऽपि च भूषणैः।
एकेन श्वित्ररोगेण कुत्सितः क्रियते यथा॥

"तथाहि भरतमुनिवाक्यम्—

रसालङ्कारवत् काव्यं दोषयुक् चेद्विभूषितम्।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्॥५॥"
शृणु तावदलङ्कारपञ्चकस्य विचारणम्।
शब्दगो द्वावलङ्कारौ त्रयः सन्त्यत्र चार्थगाः॥

शब्दगोऽस्मिन्ननुप्रासस्त्रिषु पादेषु वर्त्तते ।
पुनरुक्तवदाभासः श्रीलक्ष्मीरिति शब्दतः ॥
प्रथमे चरणे सन्ति तकाराः पञ्चसंख्यकाः ।
पञ्च रेफाश्च तिष्ठन्ति तृतीये चरणे पुनः ॥
भकाराः सन्ति चत्वारश्चतुर्थे चरणे तथा ।
अतोऽनुप्रासनामायं शब्दालङ्कार उच्यते ॥१०॥
श्रीर्लक्ष्मीरिति शब्दौ द्वावेकार्थवस्तुवाचकौ ।
पुनरुक्ताविव प्रोक्तौ पुनरुक्तौ तु नेह तौ ॥
सा लक्ष्मीः श्रीमतीत्यर्थं कृताशब्दार्थयोर्भिदा ।
पुनरुक्तवदाभासः शब्दालङ्कार एष तु ॥
अथ लक्ष्मीरिवेत्यर्थालङ्कारोऽत्रोपमाह्वयः ।
अर्थालङ्कार एवान्यो विरोधाभासनामकः ॥
सर्वं जानन्ति गङ्गायाः कमलं जायते ध्रुवम् ।
कमलाज्जायते गङ्गेतीयमेव विरोधिता ॥
अत्र विष्णोः पदाम्भोजाद् गङ्गोत्पत्तिरभूदिति ।
विरोधाभासनामायमर्थालङ्कार इत्यहो ॥
ईशस्याचिन्त्यशक्त्यैव गङ्गा प्रादुरभूत्तथा ।
नास्ति विरोधगन्धोऽपि विरोधाभास इत्यतः ॥

"तथाहि—

अम्बुजमम्बुनि जातं क्वचिदपि न जातमम्बुजादम्बु ।
मुरभिदि तद्विपरीतं पादाम्भोजान्महानदी जाता । ६॥"
साध्यमत्र हि गङ्गाया महत्त्वं विष्णुपादतः ।
उत्पत्तिः साधनञ्चेत्यत्रानुमानमलङ्कृतिः ॥
पञ्च दोषा इमे स्थूलाः पञ्चालङ्कृतयस्तथा ।
सूक्ष्मेक्षया विचारे तु बहवः सन्ति चापरे ॥

तव प्रतिभया काव्यं प्रसादयति देवताः
अविचार्य कृते काव्येऽवश्यं दोषाः पतन्ति ते ॥
सुविचार्य कृतं काव्यं भवत्यतिसुनिर्मलम् ।
तत्रालङ्कारसद्भावादर्थो देदीप्यते परम् ॥८०॥
आकर्ण्यैतां प्रभोर्व्याख्यां दिग् जयी विस्मितोऽभवत् ।
नास्याद्वाङ् निःसृता तस्य प्रतिभा स्तब्धतां गता ॥
नागच्छदुत्तरं किञ्चिद् विवक्षोरपि तस्य च ।
किंकर्त्तव्यविमूढः सन मनसासौ व्यतर्कयत् ॥
अधीयानेन बालेन मम बुद्धिर्विलोपिता ।
मन्ये सरस्वती देवी परिक्रुद्धास्ति मामिति ॥
यथार्थं कृतवान व्याख्यां न शक्नोति नरस्तथा ।
निमाएर्वदने स्थित्वा मन्ये वक्ति सरस्वती ॥
इत्यसौ चिन्तयन्नूचे निमाए श्रृणु पण्डित ।
श्रुत्वा त्वद्विवृतां व्याख्यामहं प्राप्तोऽस्मि विस्मयम् ॥
नाध्यैष्ठास्त्वमलङ्कारान्न शास्त्राभ्यासवानसि ।
तथापि कथमेतावानर्थः सम्यक् कृतस्त्वया ॥
इति पृष्टः प्रभुस्तेन प्राप्तः परमकौतुकम् ।
ज्ञात्वा तस्य मनोभावमिङ्गितेनावदत्तदा ॥
विचारं नैव जानामि शास्त्राणां साध्वसाधु वा ।
यद् वाचयति मां देवी भारती तद् ब्रवीम्यहम् ॥
इति दिग् विजयी विद्वान् श्रुत्वाभूत् कृतनिश्चयः ।
देवी मां बालकद्वारा पराजितवती ध्रुवम् ॥
जपन् ध्यायंश्च तामद्यावेदयिष्यामि निश्चितम् ।
सापमानमियन्तं मे शिशुनाकारयत् कथम् ॥६०॥
श्लोकोऽशुद्धो मया नूनं सरस्वत्यैव कारितः ।
विचारसमये बुद्धिं मम सैवावृणोदिति ॥

अथ दृष्ट्वा निजान शिष्यांस्तदा हसितुमुद्यतान ।
सर्वान्निवारयन्नूचे प्रभुर्दिग्‌जयिनं कविम् ॥
महापण्डित एवासि कवीनाञ्च शिरोमणिः ।
मुखाद् यस्य वहिर्याति कवित्वं तादृगद्भुतम् ॥
गङ्गासलिलधारेव कविता ते निरर्गला ।
न मया दृश्यते क्वापि त्वया तुल्योऽपरः कविः ॥
भवभूतिः कालिदासो जयदेवादयश्च ये ।
बभूवुः कवयस्तेषां कवित्वे दोष ईक्ष्यते ॥
मन्येऽहं तुच्छमत्यन्तं विचारं गुणदोषयोः ।
कवित्वरचनाशक्तिः सर्वत्रैव प्रशस्यते ॥
मम शैशवचापल्यं न किञ्चिद् गृह्यतां त्वया ।
नैवाहं तव शिष्यस्य समानोऽस्मि कदाचन ॥
अद्य गच्छ निवासं ते पुनः श्वो भावि मेलनम् ।
विचारं खलु शास्त्राणां श्रोष्यामि भवतो मुखात ॥
इत्युक्ते तावुभावेव गतवन्तौ निजालयम् ।
कविराराधयामास रात्रावेव सरस्वतीम् ॥
ततः सरस्वती देवी स्वप्ने तं यदुपादिशत ।
तेनैव ज्ञातवान सोऽयं तं प्रभुं स्वयमीश्वरम् ॥१००॥
प्रातरागत्य स प्राप्तः शरणं चरणं प्रभोः ।
कृपया प्रभुणा तस्य खण्डितं भवबन्धनम् ॥
भाग्यवान् दिग्‌जयी विद्वान् सफलं तस्य जीवनम् ।
प्राप्तो विद्याबलेनासौ पादपद्मं महाप्रभोः ॥
श्रीवृन्दावनदासेन तल्लीला वर्णिता इमाः ।
मया प्रकाशिता अत्र विशेषास्तासु केचन ॥
सुधाधारेव सा लीला श्रीचैतन्यमहाप्रभोः ।
सर्वेन्द्रियाणि तृप्यन्ति यामाकर्णयतां नृणाम् ॥

य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥१०५॥

इति श्रीचैतन्यचरितामृत आदिखण्डे कैशोरलीलासूत्रवर्णनं
नाम षोड़शः परिच्छेदः ।

श्रीचैतन्यचरितामृत आदिलीलायां

सप्तदशः परिच्छेदः

"वन्दे स्वैराद्भुतेहं तं चैतन्यं यत्प्रसादतः ।
यवनाः सुमनायन्ते कृष्णनामप्रजल्पकाः ॥१॥
भूयो जयतु चैतन्यो नित्यानन्दो जयत्यलम् ।
जयत्यद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥
सूत्रं कैशोरलीलाया गौरस्य रचितं मया ।
सूत्रं यौवनलीलायाः कर्त्तुमारभ्यतेऽधुना ॥
"विद्या-सौन्दर्य-सद्वेश-सम्भोग-नृत्य-कीर्तनैः ।
प्रेमनामप्रदानैश्च गौरो दीव्यति यौवने ॥२॥"
गौराङ्गो यौवनारम्भे स्वाङ्गानि भूषणान्यपि ।
दिव्यवेशाम्बरैः स्रग्भिश्चन्दनैश्च व्यभूषयत् ॥
विद्याप्रभावधार्ष्ट्येन कश्चिन्नागणयत् प्रभुः ।
विजित्य पण्डितान् सर्वान् शास्त्राण्यध्यापयच्च तान् ॥
प्रेम प्रकाशितं तेन वायुव्याधिच्छलेन च ।
नानाविधा विलासाश्च कृता भक्तगणैः सह ॥

ततः श्रीमद्गयाधाम गतवान श्रीमहाप्रभुः।
तत्रेश्वरपुरीस्वामी समगच्छत तेन च ॥
तस्माद् गृहीतदीक्षस्य प्रेमास्य सुप्रकाशितः।
ततः स्वं देशमागत्य प्रेम्ना विलसितः प्रभुः ॥
शच्यै तेनार्पितः प्रेमाद्वैतेन मेलनं कृतम्।
अद्वैतः प्राप्तवांस्तस्माद् विश्वरूपस्य दर्शनम् ॥
अभिषेकं प्रभोस्तावच्छ्रीवासः कृतवान प्रभोः।
प्रभुः खट्वां समारूढः स्वमैश्वर्यमदर्शयत् ॥
नित्यानन्दः स्वरूपश्च नवद्वीपमथागतौ।
दृष्टवन्तौ प्रभुं प्राप्य तस्य रूपञ्च षड्भुजम् ॥१०॥
शङ्खचक्रगदापद्मशार्ङ्गवेणुधरं निजम्।
षड्भुजं दर्शयामास रूपं गौराङ्ग ईश्वरः ॥
पश्चात्त्रिभङ्गमूर्तिः सन् संवृत्तोऽसौ चतुर्भुजः।
कराभ्यां वेणुमन्याभ्यां शङ्खं चक्रमधारयत् ॥
द्विभुजोऽभूत्ततो वंशीवदनः केवलं प्रभुः !
श्यामाङ्गः पीतवासाश्च श्रीव्रजेन्द्रस्य नन्दनः ॥
श्रीनित्यानन्दगोस्वामी ततो व्यासमपूजयत्।
आवेशाद्बलरामस्य धृतवान मुषलं ततः ॥
शच्यद्राक्षीत्ततस्तौ द्वौ रामकृष्णौ सहोदरौ।
ततो जगाइ-माधाइयोरुद्धारं कृतवान प्रभुः ॥
सप्त यामांस्ततो भावाविष्ट आसीन्महाप्रभुः।
तत्र तत्र च तद्भक्ता ददृशुस्तं पृथक् पृथक् ॥
वराहावेश एवासीन्मुरारिभवने प्रभोः।
मुरारेः स्कन्धमारुह्य ननर्तासौ तदङ्गने ॥
शुक्लाम्बरस्य तत्पश्चात्तण्डुलास्तेन भक्षिताः।
श्लोकस्याथ हरेर्नामेत्यस्यार्थो विवृतोऽमुना ॥

"तथाहि वृहन्नारदीये—

हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥३॥"

नामरूपेण कृष्णस्यावतारोऽस्ति कलौ युगे ।
नाममात्रेण निस्तारं लभते निखिलं जगत् ॥
हरेर्नामेति दार्ढ्यार्थमुक्तं वारत्रयं खलु ।
जडानामपि बोधार्थमेवकाराः पुनस्तथा ॥२०॥
पुनः केवलशब्दोऽपि निश्चयार्थः प्रयोजितः ।
ज्ञान-योग-तपःकर्मादिकं तेन निवारितम् ॥
तेषां नास्त्येव निस्तारो ये मन्यन्ते ततोऽन्यथा ।
नास्ति नास्ति च नास्तीत्यत्रैवकारास्त्रयस्ततः ॥
सर्वदा नाम गृह्णीयान्नीचो भूत्वा तृणादपि ।
स्वयं निरभिमानः सन्नन्येषां मानदो भवेत् ॥
तितिक्षामवलम्बेत वैष्णवस्तरुवत् सदा ।
न कस्यापि प्रयुञ्जीत जातु भर्त्सनताड़ने ॥
न ब्रवीति यथा किञ्चित् कृत्यमानोऽपि पादपः ।
शोषितो म्रियमाणोऽपि नापरं याचते जलम् ॥
इत्थमाचारवान् किञ्चिन्नैव याचेत वैष्णवः ।
जीवेदयाच्ञया वृत्त्या फलशाकाशनेन वा ॥
यदृच्छालाभसन्तुष्टो जपेन्नाम निरन्तरम् ।
एवमाचारवान् कुर्याद्भक्तिधर्मस्य पोषणम् ॥

"तथाहि पद्यावल्यां विंशाङ्के—

तृणादपि सुनीचेन तरोरपि सहिष्णुना ।
अमानिना मानदेन कीर्तनीयः सदा हरिः ॥४॥"

युष्माभिः श्रूयतां सर्वैरुच्यतामूर्द्ध्वबाहुभिः ।
श्लोकोऽयं नामसूत्रेण ग्रथित्वा धार्यतां गले ॥

Bhaja Nitai Gour Radhe Syam Japa Hare Krishna Hare Ram.

आश्चर्यतामयं श्लोक आदेशेन महाप्रभोः ।
श्रीकृष्णचरणाम्भोजं तदावश्यं हि लप्स्यते ॥
एवं संवत्सरं नित्यं रात्रौ श्रीवासमन्दिरे
ततो निरन्तरं नामकीर्तनं विदधे प्रभुः ॥३०॥
जगौ कीर्तनमावेशाद्रुद्धद्वारे गृहे प्रभुः ।
हासायागत्य पाषण्डैः प्रवेशो नत्वलभ्यत ॥
श्रुत्वा तद्बहिरेवैते दग्धप्रज्वलितान्तराः ।
श्रीवासोत्पीड़नायैव नानायुक्तीरचिन्तयन् ॥
नाम्ना गोपालचापालो जात्या विप्रश्च कश्चन ।
वाचालः कटुभाषी च पाषण्डानां शिरोमणिः ॥
भवान्यर्चनसम्भारान समानीयैकदा निशि ।
श्रीवासस्य गृहद्वारे पूजास्थानमलेपयत् ॥
तत्रैव कदलीपत्रे जवापुष्पाणि तण्डुलान् ।
रक्तचन्दन-सिन्दूर-हरिद्राश्च न्यधादसौ ॥
तत्पार्श्वे मदिराभाण्डं संस्थाप्य स्वगृहं गतः ।
श्रीवासः प्रातरुत्थाय तत्सर्वं द्वारि दृष्टवान् ॥
ततो महाजनान् भद्रानाहूयासौ समागतान् ।
श्रीवासः कथयामास हसन्नेवं सकौतुकम् ॥
निशायां क्रियते नित्यं भवानीपूजनं मया ।
ब्राह्मणाः सज्जना यूयं माहात्म्यं मम पश्यत ॥
तद्दृष्ट्वा साधवः सर्वे शुचा हाहेति चुक्रुशुः ।
हन्त कोऽयं दुराचारः कृतवान् कार्यमीदृशम् ॥
इत्युक्त्वा हड्डिपैः सर्वं द्रव्यं तैरपसारितम् ।
तत्स्थानं लेपितं सर्वं वारिणा गोमयेन च ॥४०॥
स सर्वाङ्गेषु गोपालचापालोऽभूत्त्रिभिर्दिनैः ।
कुष्ठेन महताक्रान्तोऽसृग्धाराश्च ततोऽस्रवन् ॥

सर्वाङ्गं वेष्टितं कीटैः कृन्तते स्म निरन्तरम् ।
न शक्तो यन्त्रणां सोढुं दुःखेन ज्वलितान्तरः ॥
गङ्गातीर्थे तरोर्मूलमाश्रयन स उपाविशत् ।
एकदासौ प्रभुं दृष्ट्वा कथयामास किञ्चन ॥
एषोऽहं मातुलो ग्रामसम्पर्केण भवामि ते ।
भागिनेय महाकुष्ठव्याधिनाहं समाकुलः ॥
जनान् सर्वान् समुद्धर्तुमवतारस्तवाधुना ।
महाक्लेशाभिभूतं मां कृपयोद्धारय द्रुतम् ॥
इति तद्वचनं श्रुत्वा क्रुद्धचित्तोऽभवत् प्रभुः ।
तर्जयित्वा महारोषावेशादेवं तमब्रवीत् ॥
रे पापिन् भक्तविद्वेषिंस्तवोद्धारं करोम्यहम् ।
त्वामित्थं भक्षयिष्यामि कीटांश्च जन्मकोटिषु ॥
श्रीवासेन भवान्यास्त्वं पूजां कारितवानसि ।
रौरवे नरके कोटिजन्मानि त्वं पतिष्यसि ॥
पाषण्डानां विनाशार्थमवतारो मम ह्ययम् ।
भक्तिं प्रचारयिष्यामि पाषण्डांश्च विनाशयन् ॥
इत्युक्त्वा गतवान् गङ्गास्नानाय श्रीमहाप्रभुः ।
तस्य पाषण्डदुःखात्तु प्राणाश्चञ्चलतां गताः ॥५०॥
प्रभुर्गृहीतसन्न्यासो गत्वा नीलाचलं यदा ।
प्रत्यावृत्तः पुनस्तस्मात् कुलियाग्राममागतः ॥
तस्मिंस्तदैव पाषण्डे प्रभुं शरणमागते ।
कारुण्येन प्रभुस्तस्मै हितमेवमुपादिशत् ॥
श्रीवासपण्डितस्यैवापराधं कृतवानसि ।
अमुमेवोपगच्छ त्वं प्रसन्नश्चेद् भवेदसौ ॥
तर्हि त्वं सर्वपापेभ्योऽवश्यमेव विमोक्ष्यसे ।
पुनस्तादृशमाचारं यदि न त्वं करिष्यसि ॥

इत्युक्तः प्रभुणा विप्रः श्रीवासं शरणं ययौ ।
श्रीवासकृपया तस्याभवत् पापविमोचनम् ॥
अन्येद्युः श्रोतुमागत्य कीर्तनं कश्चन द्विजः ।
रुद्धद्वारगृहस्यान्तः प्रवेष्टुं न क्षमोऽभवत् ॥
प्रत्यावर्त्तत विप्रोऽसौ स्वगृहं दुःखितान्तरः ।
अपरेद्युः स गङ्गायां विलोक्य प्रभुमब्रवीत् ॥
त्वामेवाहं शपिष्यामि दुःखं मे दत्तवानसि ।
इति छित्त्वोपवीतं सोऽशपच्चण्डोऽतिदुर्मुखः ॥
संसारस्य सुखं शश्वद् विनाशं तव यात्विति ।
अभिशापं तमाकर्ण्योल्लसितात्माभवत् प्रभुः ॥
शापवार्त्तां प्रभोरेतां श्रद्धावाञ् शृणुयाच्च यः ।
ब्रह्मशापादपि त्राणं तस्यावश्यं भवेदिति ॥६०॥
प्रभुर्मुकुन्ददत्तस्य कृत्वा दण्डमनुग्रहम् ।
तस्य चित्तस्थितान् सर्वानवसादानखण्डयत् ॥
प्रभुरद्वैत आचार्येऽकरोद्भक्तिं गुराविव ।
तस्मादाचार्यगोस्वामी मनसा दुःखमन्वभूत ॥
व्याजेन ज्ञानमार्गस्य व्याख्यां स कृतवान् यदा ।
क्रोधाविष्टः प्रभुस्तस्मै तदावज्ञामदर्शयत् ॥
तदैवाचार्यगोस्वामी परमानन्दितोऽभवत् ।
प्रसादमकरोत्तस्मिंल्लज्जमानो महाप्रभुः ॥
मुखान्मुरारिगुप्तस्य श्रुत्वा रामगुणावलीम् ।
रामदासेति नामास्यालिखद् भाले महाप्रभुः ॥
सलिलं लोहपात्रेण श्रीधरस्य पपौ प्रभुः ।
ततोऽसौ सर्वभक्तेभ्यः स्वानभीष्टान् वरान्ददौ ॥
ठाकुरे हरिदासे च प्रसादमकरोत् स्वयम् ।
आचार्यं कारयामास मार्जनां मातुरागसः ॥

भगवन्नाममाहात्म्यं भक्तान् कथयति प्रभौ ।
तथाकर्ण्यार्थवादोऽयमित्यूचे कोऽपि पाठकः ॥
स्तुतिवादं हरेर्नाम्नि श्रुत्वा दुःखमनाः प्रभुः ।
मुखं नास्य निरीक्षध्वमिति सर्वान्निषिद्धवान् ॥
गङ्गायां स्वगणैः सार्द्धं सचेलं स्नानमाचरत् ।
भक्तेश्च महिमोत्कर्षं तत्र व्याख्यातवानसौ ॥७०॥
ज्ञानं कर्म च योगश्च कृष्णं कुर्वन्ति नो वशम् ।
प्रेमभक्तिरसो ह्येव कृष्णस्य वशकारणम् ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुर्दशाध्याये

एकोनविंशः श्लोकः—

न साधयति मां योगो न सांख्यं धर्म उद्धव ।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥५॥"

मुरारिः प्रभुणा प्रोक्तस्त्वया कृष्णो वशीकृतः ।
इति श्रुत्वा मुरारिस्तु श्लोकमेवमुदैरयत् ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे एकाशीतितमाध्याये

षोड़शः श्लोकः—

क्वाहं दरिद्रः पापीयान् क्व कृष्णः श्रीनिकेतनः ।
ब्रह्मबन्धुरिति स्माहं बाहुभ्यां परिरम्भितः ॥६॥"

एकदा सकलान् भक्तान् सममादाय च प्रभुः ।
नामसङ्कीर्त्तनं कृत्वा श्रमक्लान्त उपाविशत् ॥
रसालवीजमेकं स रोपयामास चत्वरे ।
सद्यो जातस्ततो वृक्षस्तत्क्षणात् समवर्द्धत ॥
पश्यतां तत्र सर्वेषां स वृक्षः फलितोऽभवत् ।
दृष्ट्वा फलान्यनेकानि पक्वानि ते च विस्मिताः ॥
फलानि द्वे शते शीघ्रं तदा प्रभुरपातयत् ।
तानि प्रक्षाल्य कृष्णाय भोगार्थञ्च न्यवेदयत् ॥

अष्टि-वल्कलहीनानि रक्तपीतानि तानि च ।
तेषामेकतमं भुक्तमेकस्योदरपूरकम् ॥
श्रीशचीनन्दनो दृष्ट्वा परं सन्तोषमाप्तवान् ।
प्रथमं तत् स्वयं भुक्त्वा गणान् सर्वानभोजयत् ॥
अष्ठ्यंशुवल्कलोनं तत् पीयूषरसपूरितम् ।
एकमेव फलं भुक्तं रसैरुदरपूरकम् ॥
फलानि फलितानीत्थं प्रतिमासं दिने दिने ।
अखादन् वैष्णवाः सर्वे प्रभुश्चोल्लसितोऽभवत् ॥८०॥
एवं सर्वा इमा लीलाश्चकारासौ शचीसुतः ।
विना भक्तगणानन्ये ज्ञातवन्तो न मानवाः ॥
कीर्त्तनस्यावसानेऽथ स नित्यमेवमन्वहम् ।
अकरोत् कृष्णचैतन्यः प्रभुराम्रमहोत्सवम् ॥
मेघा आकाशमावृण्वन् कीर्त्तनं कुर्वति प्रभौ ।
ततो निवारिता मेघाः प्रभोरेव स्वयेच्छया ॥
आज्ञापयाञ्चकारासौ श्रीवासं प्रभुरेकदा ।
बृहत्सहस्रनामानि पठ्यन्तां श्रवणाय मे ॥
पठ्यमाने स्तवे नाम नृसिंहस्य यदोदितम् ।
श्रीगौराङ्गस्तदाकर्ण्य समाविष्टोऽभवत्तदा ॥
नृसिंहावेशमाविष्टो गदापाणिर्महाप्रभुः ।
ययौ पाषण्डिनो हन्तुं नगरं प्रति धावितः ॥
नृसिंहावेशमालोक्य महातेजोमयं जनाः ।
पलायन्त महाभीत्या त्यक्त्वा पन्थानमग्रतः ॥
दृष्ट्वा जनसमुद्वेगं वाह्यज्ञानमभूत् प्रभोः ।
श्रीवासालयमागत्य निचिक्षेप गदां प्रभुः ॥
श्रीवासं प्रोक्तवान् देवो विषादाक्रान्तमानसः ।
जनानां भीतिदानान्मेऽपराधोऽभून्महानिति ॥

श्रीवासः कथयामास यो हि गृह्णाति नाम ते ।
अपराधा विनश्यन्ति कोटिशस्तस्य निश्चितम् ॥९०॥
कृतो लोकस्य निस्तारो नापराधः कृतस्त्वया ।
येन दृष्टोऽसि भाग्येन संसारान्मुक्त एव सः ॥
इति श्रीवास उक्त्वा तं श्रीगौराङ्गमसेवत ।
तत्सेवापरितुष्टोऽसौ प्रत्यागच्छन्निजालयम् ॥
कश्चिच्छिवगुणान गायन् शिवभक्तोऽपरेद्यवि ।
डमरुं वादयन्नृत्यं कृतवानङ्गने प्रभोः ॥
महेशावेशमापन्नः श्रीशचीनन्दनस्तदा ।
तस्य स्कन्धं समारूढ़ः सुचिराय ननर्त्त च ॥
अन्येद्युर्भिक्षुकः कश्चिद् भिक्षणार्थं समागतः ।
दृष्ट्वा महाप्रभोर्नृत्यमारेभे नर्त्तितुं स्वयम् ॥
परमावेशसम्पन्नो ननर्त्त प्रभुणा सह ।
ददौ प्रेम प्रभुस्तस्मै सोऽभूत् प्रेमरसाकुलः ॥
सर्वज्ञो ज्योतिषी कश्चिदन्येद्युर्गृहमागतः ।
तं ससम्मानमभ्यर्थ्य पर्यपृच्छन्महाप्रभुः ॥
कोऽहं जन्मनि पूर्वस्मिन्नासं तद् गणयन् वद ।
इति श्रुत्वैव सर्वज्ञो गणनार्थं समुद्यतः ॥
गणयित्वाथ सर्वज्ञो ध्यात्वा ज्योतिर्मयं प्रभुम् ।
ददर्शानन्तवैकुण्ठब्रह्माण्डानां समाश्रयम् ॥
परं तत्त्वं परं ब्रह्म तं साक्षात् परमेश्वरम् ।
प्रभोर्विग्रहमालोक्य हतबुद्धिर्बभूव सः ॥१००॥
तदा तूष्णीं बभूवासौ वक्तुं किञ्चिदशक्नुवन् ।
प्रभुणा च पुनः पृष्टः शनैर्वक्तुं प्रचक्रमे ॥
भवान् जन्मनि पूर्वस्मिन्नभवज्जगदाश्रयः ।
सम्पूर्णभगवान् साक्षात् सर्वैश्वर्यमयः प्रभुः ॥

पूर्वं भवान यथैवासीदिदानीमपि भोस्तथा ।
नित्यानन्दस्वरूपत्वाद्दुर्विज्ञेयो भवानिति ॥
प्रभुणा हसतोचेऽसौ न किञ्चिज्ज्ञातवानसि ।
अहं गोपाल एवासं जात्या पूर्वत्र जन्मनि ॥
तथा गोपगृहे जातो धेनूनां रक्षकोऽभवम् ।
साम्प्रतं तेन पुण्येन जातोऽस्मि ब्राह्मणात्मजः ॥
प्रत्युवाच स सर्वज्ञो ध्यात्वाहं दृष्टवांस्तथा ।
तस्मिन्नैश्वर्यमालोक्य मूढ़चित्तोऽस्मि सर्वथा ॥
अदोरूपमिदं रूपमेकमेव मयेक्ष्यते ।
कदाचिल्लक्ष्यते भिन्नं तवैव खलु मायया ॥
योऽसि वा सोऽसि वा देव नमस्तुभ्यं नमो नमः ।
इति नंनम्यमानं तं प्रेम्णालङ्कृतवान प्रभुः ॥
एकदाध्यासीनो विष्णुमण्डपं श्रीमहाप्रभुः ।
मध्वानयानयेत्युच्चैराजुहाव मुहुर्मुहुः ॥
श्रीनित्यानन्दगोस्वामी ज्ञात्वावेशं महाप्रभोः ।
गङ्गाम्भःपात्रमानीय धृतवांस्तस्य सम्मुखे ॥११०॥
प्रभुर्गङ्गाजलं पोत्वानरीनृत्यत विह्वलः ।
यमुनाकर्षणलीलां तत्रत्या ददृशुर्जनाः ॥
मदप्रमत्तसञ्चारं बलदेवानुकारिणम्
आचार्यशेखरो देवं दृष्टवान् रामविग्रहम् ॥
आचार्यो वनमाली च ददर्श स्वर्णलाङ्गलम् ।
मिलित्वा ननृतुः सर्वे जना आनन्दविह्वलाः ॥
इत्थमेवाभवन्नृत्यं व्याप्य यामचतुष्टयम् ।
सायं स्नात्वा च गङ्गायां सर्वे स्वं स्वं गृहं गताः ॥
प्रभुर्नागरिकान् सर्वान् जनानाज्ञापयद् यदा ।
प्रतिगेहं तदारब्धं नामसङ्कीर्त्तनं हरेः ॥

"हरि हरये नमः कृष्ण यादवाय नमः ।
गोपाल गोविन्द राम श्रीमधुसुदन ॥"
मृदङ्गकरतालैश्च कीर्त्तनस्योत्थितो ध्वनिः ।
नाकर्णितोऽपरः शब्दो विना हरि-हरिध्वनिम् ॥
श्रुत्वैवं यवनाः सर्वे कुपिता नगराधिपम् ।
काजिनं प्रति गत्वैव सर्वं वृत्तं न्यवेदयन् ॥
क्रोधाध्मातमनाः काजी सायं कस्यचिदालयम् ।
आगत्य मुरजं भङ्क्त्वा पौरान वक्तुं प्रचक्रमे ॥
हिन्दुत्वं चिरमेतावत् प्रकाशं कोऽपि नाचरत् ।
इदानीमुद्यता यूयं ब्रूत कस्य बलेन भोः ॥१२०॥
न कश्चित् कीर्त्तनं कुर्यात् समग्रे नगरे पुनः ।
मार्जयित्वापराधं वो गृहं स्वं यामि साम्प्रतम् ॥
कीर्त्तयन्तं पुनः कञ्चिद् यदि लप्स्ये कथञ्चन ।
तस्य जातिं हरिष्यामि सर्वस्वं दण्डयन्नहम् ॥
एवमुक्त्वा गते तस्मिन सर्वे नागरिका जनाः ।
प्रभुं निवेदयामासुः शोकसन्तप्तचेतसः ॥
प्रभुराज्ञापयत्तांश्च यात कुरुत कीर्त्तनम् ।
संहरिष्याम्यहं सर्वान् यवनानद्य निश्चितम् ॥
स्वं स्वं गेहं गता लोका अकुर्वन्नामकीर्त्तनम् ।
काजिभीत्या त्वसच्छन्दं सदा चलितमानसाः ॥
प्रभुस्तेषाञ्च सर्वेषां ज्ञात्वा भीतिं मनोगताम् ।
शीघ्रमाहूय तान सर्वान प्रकाशं प्रोक्तवानिदम् ॥
नगरे नगरेऽद्यैव करिष्ये नामकीर्त्तनम् ।
यूयं कुरुत सन्ध्यायां सर्वे नगरमण्डनम् ॥
प्रदीपयत सायं भो दीपयष्टिं गृहे गृहे ।
अहं पश्यामि कः काजी मामभ्येत्य निषेधति ॥

इत्युक्त्वा भगवान् गौरः सायं चलितवानसौ ।
कृतवान सम्प्रदायांश्चोन्नामसङ्कीर्त्तनस्य च ॥
हरिदासोऽकरोन्नृत्यं सम्प्रदाये पुरोगते ।
मध्ये चाचार्यगोस्वामी ननर्त्त प्रेमविह्वलः ॥
सम्प्रदाये च पाश्चात्येऽनृत्यद् गौरहरिः स्वयम् ।
नित्यानन्दप्रभुस्तेन सार्द्धं पर्यभ्रमन्नटन ॥
श्रीवृन्दावनदासेन श्रीमच्चैतन्यमङ्गले ।
प्रभोः कृपाबलेनैतद्वर्णितञ्च सविस्तरम् ॥
एवं सङ्कीर्त्तनं कुर्वन नगरं सर्वतो भ्रमन ।
काजिनः प्राड्विवाकस्य गृहद्वारं ययौ प्रभुः ॥
गर्जन्तस्तर्जयन्तश्च चक्रुः कोलाहलं जनाः ।
गौरचन्द्रबलेनैव बाधाभङ्गोन्मदिष्णवः ॥
कीर्त्तनध्वनिमाकर्ण्य काजी लुक्कायितो गृहे ।
तेषां श्रुत्वाप्युपालम्भं न गृहाद्बहिरागमत् ॥
आरामः काजिनो भग्नस्ततस्तैरुद्धतैर्जनैः ।
श्रीवृन्दावनदासेन वर्णितं तत् सविस्तरम् ॥
ततो महाप्रभुस्तस्य गृहद्वार उपाविशत् ।
कञ्चिद् भद्रजनं प्रेष्य तत्र काजिनमाह्वयत् ॥
दूरादानतमूर्द्धासौ काजी तत्र समागतः ।
प्रभुरध्यासयामास तं सम्मानपुरःसरम् ॥
प्रभुणोक्तमहं त्वाद्य स्वयमभ्यागतोऽस्मि भोः ।
दृष्ट्वा मां त्वं निलीनोऽसि धर्मोऽयं कीदृशस्तव ॥
ततः प्रत्यवदत् काजी कुपितस्त्वं समागतः ।
अहं निलीन एवासं तव कोपप्रशान्तये ॥१४०॥
त्वमिदानीं प्रशान्तोऽसि तेनाहं सङ्गतस्त्वया ।
अहं प्राप्तोऽस्मि सौभाग्यादतिथिं हि भवादृशम् ॥

Vrindavan Das

पितृव्यो ग्रामसम्पर्काच्चक्रवर्त्ती भवेन्मम ।
श्रेयान हि ग्रामसम्बन्धो देहसम्बन्धतः स्फुटम् ॥
नीलाम्बरचक्रवर्त्ती तव मातामहो यतः ।
तस्य सम्बन्धतो नूनं भागिनेयोऽसि मे ततः ॥
सहेत मातुलोऽवश्यं भागिनेयस्य रोषणम् ।
मातुलस्यापराधश्च भागिनेयः क्षमेत हि ॥
एवमेवमुभौ तौ च ससङ्केतमजल्पताम् ।
तयोरन्तर्गतं भावं न बोद्धुं कोऽप्यपारयत् ॥
प्रभुणोक्तमहं त्वाद्य किञ्चित् प्रष्टुमिहागतः ।
प्रत्यूचे स यथास्वेच्छं त्वमाज्ञापय मामिति ॥
प्रभुः प्रोचे तवाम्बा गौस्तद्दुग्धं पीयते त्वया ।
वृष उत्पादयत्यन्नं ततोऽसौ च पिता तव ॥
त्वमम्बापितरौ हत्वा भुङ्क्षे धर्मः क एष ते ।
एतादृशं विकर्म त्वं कया शक्त्या करोषि भोः ॥
प्रत्युक्तं काजिना वेदपुराणानि यथा तव ।
तथा केतावकोराणं शास्त्रञ्च मम वर्त्तते ॥
प्रवृत्तिश्च निवृत्तिश्च शास्त्रे मार्गौ पृथक् पृथक् ।
निवृत्तिमार्गिभिर्जीववधः शास्त्रे निषिध्यते ॥१५०॥
बधो विधीयते तद्वत् प्रवृत्तिमार्गिभिर्गवाम् ।
नास्ति पापभयं शास्त्रादेशेनाचरतां वधम् ॥
आदेशो गोवधस्यापि तव वेदेषु वर्त्तते ।
गोवधं कृतवन्तो हि महान्तो मुनयः पुरा ॥
प्रभुः प्रत्यवदद् वेदा निषेधन्त्येव गोवधम् ।
अतएव न कुर्वन्ति गोवधं हिन्दुजातयः ॥
स हन्याद् यो हि शक्नुयाज्जीवं जीवयितुं हतम् ।
इति वेदपुराणेषु विधिवाक्यं हि विद्यते ॥

अतएव वृषा वृद्धा निहता मुनिभिः पुरा ।
वेदमन्त्रेण तेषान्तु ते प्राणानुदजीवयन् ॥
निहता वृषभा वृद्धाः पुनर्यौवनमाप्नुवन् ।
तस्मात्तेषां वधो नैव प्रत्युतोपकृतिः परा ॥
कलिकाले तथा शक्तिर्ब्राह्मणानां न विद्यते ।
न करोति ततः कश्चिद् गोवधं साम्प्रतं कचित् ॥

"तथाहि मलमासतत्त्वे सन्न्यासनिषेधविचारे धृतो ब्रह्मवैवर्त्तीयकृष्ण-जन्मखण्डस्य पञ्चाशीत्यधिकशततमाध्यायस्याशीत्यधिकशततमः श्लोकः—

अश्वमेधं गवालम्भं सन्न्यासं पलपैतृकम् ।
देवरेण सुतोत्पत्तिं कलौ पञ्च विवर्जयेत् ॥७॥"
यूयं जीवयितुं नार्हाः सारो वः केवलं वधः ।
नरकान्नैव युष्माकं निस्तारः सम्भविष्यति ॥
गोरङ्गे लोमसंख्यायाः सहस्रगुणवत्सरान् ।
रौरवे परिपच्यन्तेऽनारतं घातका गवाम् ॥
युष्माकं शास्त्रकर्ता यः सोऽपि भ्रान्तोऽभवत् खलु ।
अज्ञात्वा शास्त्रमर्मार्थमादिदेश तथाविधम् ॥१६०॥
श्रुत्वा स्तब्धोऽभवत्काजी वचनं तस्य नास्फुरत् ।
प्रोक्तवांश्च विचार्यासौ मन्यमानः पराजयम् ॥
तदेव सत्यं मन्येऽहं पण्डित त्वं यदुक्तवान् ।
विचारं सहते नैव शास्त्रमर्वाग्भवं मम ॥
कल्पितं शास्त्रमस्माकमिति जानामि निश्चितम् ।
तच्च जात्यनुरोधेन तथापि मानयाम्यहम् ॥
स्वतो यवनशास्त्रेषु युक्तयः सन्ति दुर्बलाः ।
इति श्रुत्वा हसन् भूयः प्रभुः पप्रच्छ काजिनम् ॥
पृच्छाम्येकं पुनः प्रश्नं शृणु त्वमयि मातुल ।
प्रतिब्रूहि यथा सत्यं मा वञ्चय मिषेण माम् ॥

तवास्मिन्नगरे नित्यं कीर्तनं हि प्रवर्त्तते ।
सकोलाहलसङ्गीतवादित्रञ्च सनर्तनम् ॥
काजी त्वं हिन्दुधर्मस्य विरोधेऽधिकृतिस्तव ।
न निषेधसि कस्मात्त्वमिति बोद्धुं न शक्यते ॥
प्रत्युक्तं काजिना गौरहरिः सत्रैस्त्वमुच्यसे ।
तव सम्बोधनं तेन नाम्नैव विदधाम्यहम् ॥
शृणु गौरहरे वक्ष्ये तदवारणकारणम् ।
तदा निवेदयिष्यामि निभृतं यदि गच्छसि ॥
उवाच प्रभुरेते मेऽन्तरङ्गाः सकला जनाः ।
प्रकाशं ब्रूहि सर्वं त्वमाशङ्कां मा कृथा वृथा ॥१७०॥
ततः प्रत्यवदत् काजी यदा हिन्दुगृहं गतः ।
मृदङ्गं भग्नवानस्मि कीर्तनञ्च निषिद्धवान् ॥
तस्यां रात्रौ महासिंहः कश्चनैको भयङ्करः ।
नरदेहश्च सिंहास्यो गर्जन्नुच्चैर्मुहुर्मुहुः ॥
मद्देहोपरि शय्यायामुत्प्लुत्यारूढवानसौ ।
अट्टाट्टमहसद् घोरं दन्तान् दन्तैरघर्षयत् ॥
मम वक्षसि संस्थाप्य नखानि क्रूरमुक्तवान् ।
मृदङ्गपरिवर्तेन वक्षस्ते दारयाम्यहम् ॥
त्वामहं नाशयिष्यामि कीर्तनं मे निषेधसि ।
तं दृष्ट्वा मीलिताक्षोऽहं कम्पिताङ्गोऽभवं भयात् ॥
सिंहो मां भयसन्त्रस्तं पश्यन् सदयमब्रवीत् ।
पीड़ितोऽसि मयाद्य त्वं शिक्षणायैव केवलम् ॥
तदा महान्तमुत्पातं यस्त्वं न कृतवानसि ।
मया तस्मात् कृता क्षान्तिर्न ते प्राणा विनाशिताः ॥
तथा करोषि चेद्भूयो न सहिष्ये कथञ्चन ।
यवनान्निहनिष्यामि त्वां सवंशं विनाशयन् ॥

इत्युक्त्वा च गते सिंहे मम भीतिरुपस्थिता ।
नखराघातचिह्नानि पश्येमानि ममोरसि ॥
इतीयत कथयन काजी स्वं वक्षः समदर्शयत् ।
श्रुत्वा दृष्ट्वा च तत्रत्याः सर्वे विस्मयमागताः ॥१८०॥
काजी प्रोचे मया वृत्तमिदं नोक्तस्तु कश्चन ।
तस्मिन्नेव दिने ग्रामरक्षिणागत्य केनचित् ॥
उक्तोऽहं यद् गतेनाद्य निषेद्धुं कीर्त्तनं मया ।
उल्कावह्निमयज्वाला प्राप्ताऽकस्मान्मुखे मम ॥
तथा श्मश्रूणि दग्धानि मुखे जाता व्रणा इति ।
एवमेव प्रयातानां विवृतिर्ग्रामरक्षिणाम ॥
तथा दृष्ट्वा महाभीत्या तानहं समुपादिशम ।
तिष्ठत स्वगृहे यूयं कीर्त्तनं मा निषेधत ॥
प्रवृत्तं नगरे तस्मात स्वच्छन्दं नामकीर्त्तनम् ।
तच्छ्रुत्वा निखिला म्लेच्छा मह्यमेवं न्यवेदयन ॥
नगरे हिन्दुधर्मोऽयं निःसोमं वर्द्धतेऽनिशम् ।
नापरं श्रूयते किञ्चिद् विना हरिहरिध्वनिम् ॥
कोऽप्यूचे कृष्णकृष्णेति हिन्दुरुच्चैर्वदन्मुहुः ।
हसन क्रन्दन्नटन गायंस्तथा लुठति धूलिषु ॥
हिन्दुर्हरिहरीत्युक्त्वा सदा कोलाहलायते ।
म्लेच्छसम्राट् शृणुयाच्चेत स ते दण्डं विधास्यति ॥
तदाहं यवनान् सर्वानेवं प्रश्नांश्च पृष्टवान ।
जाने स्वभावतो हिन्दुः करोत्येव हरिध्वनिम् ॥
यूयं किं यवनाः सन्तो गृह्णीथैवमनुक्षणम् ।
हिन्दूनां देवतानाम ब्रूहि किं तस्य कारणम ॥१९०॥
म्लेच्छः कोऽप्युक्तवान हिन्दुर्मयेत्थं पर्यहस्यत ।
कोऽप्युक्तः कृष्णदासश्च रामदासस्तथापरः ॥

रामदासश्च कोऽप्युक्तो ब्रूते हरिहरि सदा।
मन्येऽहं कस्यचिद् गेहे धनान्येष हरिष्यति ॥
तदा प्रभृति जिह्वेयं ब्रूते हरिहरि सदा।
अनिच्छायामपि ब्रूते कमुपायं करोम्यहम् ॥
अब्रवीदपरो म्लेच्छः श्रूयतां वचनं मम।
उपहासे मयाप्येवं हिन्दूनां विहिते ततः ॥
कुरुते कृष्णनामासौ जिह्वा नैव निवार्यते।
न जाने हिन्दवो मन्त्रौषधीर्जानन्ति काश्चन ॥
इत्याकर्ण्य मया गेहं प्रेरितेष्वेव तेष्वथ।
पञ्चसप्ताश्च पाषण्डा हिन्दवो मामुपागताः ॥
तेऽब्रुवन्नाशितो धर्मो हिन्दूनां हि निमाइना।
अस्माभिरश्रुतं जातु कीर्तनं तत् प्रवर्तितम् ॥
पुरा मङ्गलचण्ड्याश्च पूजा विषहरेः कृता।
अस्माभिर्निशि जाग्रद्भिर्नृत्यसङ्गीतवादनैः ॥
सोऽभूद् योग्यः सदाचारो निमाइः पण्डितोऽधुना।
प्रत्यावृत्य गयाधाम्नो विपरीतं चरत्यसौ ॥
उच्चैर्गायति गीतानि करतालिकया समम्।
मृदङ्गकरतालानां शब्दैः कर्णौ रुणद्धि नः ॥२००॥
न जाने स किमास्वाद्य मत्तो नृत्यंश्च गायति।
हसन् क्रन्दंस्तथोत्तिष्ठन् पतंश्च लुठति क्षितौ ॥
तेन चोन्मादिताश्चक्रुर्नागराः कीर्तनं सदा।
रात्रौ निद्रां न गच्छामो जागृमः सर्वदा वयम् ॥
निमाइनाम हित्वाभूत् ख्यातो गौरहरिः स्वयम्।
मतं प्रचार्य पाषण्डं हिन्दुधर्ममनाशयत् ॥
भूयोभूयः प्रकुर्वन्ति नीचाः कृष्णस्य कीर्तनम्।
निःशेषं हि नवद्वीपं पापेनानेन नङ्क्ष्यति ॥

ईशनाम महामन्त्रो ज्ञायते हिन्दुशास्त्रतः ।
सर्वैः श्रुतस्य मन्त्रस्य वीर्यहानिः प्रजायते ॥
ग्रामस्यास्य नियन्ता त्वमत्रत्याः स्वजनास्तव ।
अतो निमाइमाहूय कीर्तनात्तं निवारय ॥
इत्याकर्ण्य च तान सर्वान् प्रियं वाक्यमवादिषम् ।
यूयं सर्वे गृहं यात वारयिष्याम्यहञ्च तम् ॥
योऽयं नारायणो नाम हिन्दूनामीश्वरो महान् ।
सोऽयं खलु त्वमेवासीत्येवं मन्ये सुनिश्चितम् ॥
इत्थमाकर्णयन् हास्यं कुर्वंश्च श्रीमहाप्रभुः ।
किञ्चिद् वदितुमारेभे स्पृशन् हस्तेन काजिनम् ॥
महद्विचित्रमेतद्धि कृष्णनाम मुखे तव ।
क्षीणानि तव पापानि सुपवित्रोऽसि साम्प्रतम् ॥२१०॥
हरिर्नारायणः कृष्ण इति नाम त्रयं यतः ।
कृतवांस्त्वं ततो भाग्यं महत् पुण्यं महच्च ते ॥
एवं शृण्वन्नसौ काजी गलदश्रुविलोचनः ।
अवदन्मधुरं वाक्यं स्पृष्ट्वा पादौ महाप्रभोः ॥
भवतोऽनुग्रहेणैव कुमतिर्मे विलोपिता ।
कुरु त्वं मे कृपामेवं भक्तिर्मे तिष्ठतु त्वयि ॥
उवाच प्रभुरेकं हि दानं याचे तवान्तिकम् ।
यथा न स्यान्नवद्वीपे सङ्कीर्त्तननिवारणम् ॥
काजी प्रत्यवदद् वंशे जनिष्यन्ते च ये मम ।
तेभ्यो दिव्यं प्रदास्यामि न निषेत्स्यन्ति कीर्त्तनम् ॥
इति शृण्वन् हरीत्युक्त्वा प्रभुरुत्थितवान् स्वयम् ।
उत्थिता वैष्णवाः सर्वे कुर्वन्तश्च हरिध्वनिम् ॥
ततः सङ्कीर्त्तनं कर्त्तुं प्रयातः श्रीमहाप्रभुः ।
काजी तेन सहागच्छत् समुल्लसितमानसः ॥

काजिने गमनादेशं श्रीशचीनन्दनो ददौ ।
आययौ च ततो नृत्यं कुर्वन्नात्मनिकेतनम् ॥
एवमेवानुजग्राह काजिनं श्रीमहाप्रभुः ।
इदं वृत्तं श्रृणुयाद् योऽपराधस्तस्य खण्ड्यते ॥
एकदा किल गोस्वामी श्रीवासस्य निकेतने ।
नित्यानन्देन सङ्गत्य नृत्यन्नासीन्महाप्रभुः ॥२२०॥
श्रीवासस्य सुतस्तत्र तदा पञ्चत्वमागतः ।
तथापि नाभवच्छोकः श्रीवासस्य तु चेतसि ॥
दिशन्तौ तत्त्वबोधं तौ मृतपुत्रमुखात् पुनः ।
भ्रातरौ द्वौ स्वयं तौ तु जातौ श्रीवासनन्दनौ ॥
ततोऽसौ दत्तवान् सर्वभक्तेभ्यो वरमीप्सितम् ।
भुक्तोच्छिष्टप्रदानेन नारायणीममानयत् ॥
श्रीवासस्य च वस्त्राणि योऽसीव्यन्म्लेच्छसौचिकः ।
स्वयं महाप्रभुस्तस्मै निजरूपमदर्शयत् ।
दृष्टं दृष्टं मयेत्युक्त्वा स उन्मत्तोऽभवत्तदा ।
प्रेम्णा च कृतवान्नृत्यं सोऽभवद् वैष्णवाग्रणीः ॥
आवेशात् प्रभुणा वंशीं श्रीवासो याचितो यदा ।
सोऽप्यवोचत गोप्यस्तेऽचोरयन् मुरलीमिति ॥
तदाकर्ण्य वचो ब्रूहि ब्रूहीत्यकथयत् प्रभुः ।
श्रीवासोऽवर्णयद् वृन्दावनलीलारसात्मिकाः ॥
स वृन्दावनमाधुर्यं प्रथमं समवर्णयत् ।
तदाकर्ण्य प्रभोश्चेतस्यानन्दः समवर्द्धत ॥
तदावादीत् प्रभुर्ब्रूहि ब्रूहीत्येवं मुहुर्मुहुः ।
श्रीवासोऽप्यवदत् सर्वं वारं वारं सविस्तरम् ॥
आकर्षणं हि गोपीनां मुरलीध्वनिना वने ।
विहारं गोपीभिः सार्द्धं सर्वाभिः कानने यथा ॥२३०॥

तत्र षड्ऋतुलीलानां सर्वासामपि वर्णनम् ।
मधुपानं जलक्रीड़ास्तथा रासमहोत्सवम् ॥
श्रोतुमुत्कण्ठितो ब्रूहि ब्रूहीत्यूचे महाप्रभुः ।
तदा रासरसोल्लासं श्रीवासोऽवर्णयत्तदा ॥
एवं रात्रिः प्रभाताभूद् वदतोः शृण्वतोस्तयोः ।
तदा श्रीवासमाश्लिष्य तोषयन् श्रीमहाप्रभुः ॥
आचार्यस्य गृहे कृष्णलीलामभ्यनयत् प्रभुः ।
तत्रासौ परिजग्राह रुक्मिणीभूमिकां स्वयम् ॥
क्वचिद्दुर्गा क्वचिल्लक्ष्मीश्चिच्छक्तिर्लीलयाभवत ।
भक्तेभ्यः स ददौ प्रेमभक्तिं खट्वामधिष्ठितः ॥
एकदा ब्राह्मणी काचिन्नृत्यान्ते श्रीमहाप्रभोः ।
अगृह्णाच्चरणाम्भोजद्वयं तत्र समागता ॥
सा तच्चरणयोर्धूलिमगृह्णाच्च मुहुर्मुहुः ।
तदालोक्य प्रभोर्दुःखमपारं हृद्यजायत ॥
तस्मिन्नेव क्षणे धावन् गङ्गायामपतत् प्रभुः ।
ततोऽसौ हरिदासेन नित्यानन्देन चोद्धृतः ॥
विजयाचार्यगेहेऽसौ तां निशामत्यवाहयत ।
प्रभाते सकलान् भक्तान्नीतवांश्च निजालयम् ॥
गोपीभावसमाविष्टः कदाचित् स्वगृहे स्थितः ।
गोपी गोपीति नामासौ सविषादमुदैरयत् ॥२४०॥
तदा महाप्रभुं द्रष्टुं छात्रः कश्चित् समागतः ।
गोपी गोपीति नामासौ श्रुत्वा वक्तुं प्रचक्रमे ॥
न कथं कृष्णनाम त्वं गृह्णासि धन्यमेव तत् ।
गोपी गोपीति नाम्न्युक्ते किन्ते पुण्यं भविष्यति ॥
तदाकर्ण्य प्रभुः क्रुद्धः कृष्णदोषानघोषयत् ।
यष्टिमादाय तं छात्रमाहन्तुं स समुत्थितः ॥

भीत्या पलायमानं तमन्वधावन्महाप्रभुः ।
प्रभुं व्यरमयन सर्वे भक्तास्तत्र ससम्भ्रमम ॥
शमयित्वा प्रभोश्चित्तमानिन्युस्तं निजालयम् ।
छात्रः पलायमानोऽसौ मिलितश्छात्रसंसदि ॥
अधीतवन्त एकत्र यत्र च्छात्राः सहस्रकम् ।
गत्वा तत्र प्रभोर्वार्त्तां स विप्रः स्पष्टमब्रवीत् ॥
यथा छात्रसमाजोऽसौ श्रुत्वा क्रोधवशं गतः ।
युगपन्मिलितस्तत्र प्रभोर्निन्दां चकार च ॥
निःशेषं भ्रंशितो देश एकेनैव निमाइना ।
नास्ति धर्मभयं तस्य ब्राह्मणं स जिघांसति ॥
पुनश्चेत् स करोत्येवमस्माभिः पीड्यते तदा ।
क इवायं मनुष्यो वा कां क्षतिं कर्त्तुमर्हति ॥
नष्टा बुद्धिस्तु सर्वेषामनया प्रभुनिन्दया ।
स्वधीताप्यस्फुरद्विद्या न कस्यापि कथञ्चन ॥२५०॥
तथा सत्यपि दम्भेन न च्छात्रा नम्रतां गताः ।
निनिन्दुः सोपहासं ते तत्र तत्र महाप्रभुम् ॥
ज्ञात्वा सर्वज्ञगोस्वामी तेषामेवमधोगतिम् ।
तेषामपि परित्राणं गृहे तिष्ठन्नचिन्तयत् ॥
यावन्तोऽध्यापकाः शिष्यास्तेषां यावन्त एव हि ।
धर्मी कर्मी तपस्वी च मां ते निन्दन्ति दुर्जनाः ॥
मम निन्दापराधिभ्यो नाहं भक्तिं ददामि चेत् ।
न कथञ्चन ते सर्वे मद्भक्तिं लब्धुमीशते ॥
उद्धर्त्तुमहमायातो जातस्तस्य विपर्य्ययः ।
एतेभ्यो दुर्जनेभ्यस्तु हितं केन भविष्यति ॥
यदा मां ते नमस्यन्तो भवन्ति क्षीणकल्मषाः ।
तदैव लम्भितां भक्तिं लब्धुमर्हन्ति ते पुनः ॥

अवश्यमेव सन्न्यासं ग्रहीष्याम्यत एव हि ।
ततः सन्न्यासिबुद्धया मां ते नमस्यन्ति निश्चितम् ॥
मामेवं नमतां तेषामपराधक्षयो भवेत् ।
जनयामि ततो भक्तिं तथैषां निर्मले हृदि ॥
पाषण्डिनां तदैवैषां समुद्धारो भविष्यति ।
नास्त्युपायान्तरं किञ्चिद् युक्तिसारोऽयमेव मे ॥
प्रभौ सुदृढ़युक्त्यैवं कृतबुद्धौ गृहस्थिते ।
केशवो भारती स्वामी नवद्वीपं समागतः ॥२६०॥
प्रभुणा तं नमस्कृत्य कृतं भिक्षानिमन्त्रणम् ।
तेनैवं ग्राहयन भिक्षां प्रभुस्तस्मै न्यवेदयत् ॥
ईश्वरो हि भवांस्तावत् साक्षान्नारायणो भवान ।
करोतु कृपया देवः संसारान्मम मोचनम् ॥
भारतीस्वामिना प्रोक्तमन्तर्यामी त्वमीश्वरः ।
यत् कारयसि तत् कुर्यां न ममास्ति स्वतन्त्रता ॥
इत्युक्त्वा भारतीस्वामी कण्टकं नगरं गतः ।
सन्न्यासं परिजग्राह तत्र गत्वा महाप्रभुः ॥
नित्यानन्दप्रभुश्चन्द्रशेखराचार्यसङ्गतः ।
तथा मुकुन्ददत्तश्च तस्याकुर्वन सहायताम् ॥
इत्येवमादिलीलायाः सूत्रं विरचितं मया ।
श्रीवृन्दावनदासेन वर्णितैषा सविस्तरम् ॥
यशोदानन्दनो भूत्वा श्रीशचीनन्दनः स्वयम् ।
सम्यगास्वादयामास भक्तभावं चतुर्विधम् ॥
राधाप्रेम-स्वमाधुर्य-रसास्वादनलोलुपः ।
सम्यगङ्गीचकारासौ राधाभावं महाप्रभुः ॥
गोपीभावं स एकान्तं यदा स्वीकृतवान स्वयम् ।
व्रजेन्द्रनन्दनं कृष्णं निजकान्तममन्यत ॥

सुदृढ़ं दृश्यते ह्येतद् गोपीभावस्य लक्षणम् ।
नान्यस्मिन स भवेद्भावो विना व्रजेन्द्रनन्दनम् ॥२७०॥
गुञ्जमाली शिखापीड़ः किशोरः श्यामसुन्दरः ।
गोपवेशस्त्रिभङ्गश्च मुरलीशोभिताननः ॥
इत्याकारं यदि त्यक्त्वा कृष्णः स्याद्भिन्नविग्रहः ।
कदाचिद् गोपिकाभावस्तत्-समीपं न गच्छति ॥

"तथाहि ललितमाधवे षष्ठाङ्के चतुर्दशश्लोके विशाखावाक्यम्—

गोपीनां पशुपेन्द्रनन्दनजुषो भावस्य कस्तां कृती
विज्ञातुं क्षमते दुरूहपदवीसञ्चारिणः प्रक्रियाम् ।
आविष्कुर्वति वैष्णवीमपि तनुं तस्मिन भुजैर्जिष्णुभि-
र्यासां हन्त चतुर्भिरद्भुतरुचिं रागोदयः कुञ्चति ॥८॥"
रासलीलां मधौ कुर्वन कृष्णो गोवर्द्धने गिरौ ।
सङ्केतं ज्ञापयन राधां तत्रैवान्तर्दधे स्वयम् ॥
तस्मिंस्तत्पथमुद्वीक्ष्य रहःकुञ्जमधिष्ठिते ।
सर्वास्तत्रागता गोप्यस्तदन्वेषणतत्पराः ॥
दूरात् कृष्णं समालोक्य प्रोक्तवत्यश्च ताः पुनः ।
व्रजेन्द्रनन्दनोऽयं भोः कुञ्जान्तर्दृश्यतामिति ॥
आयान्तीर्गोपिका दृष्ट्वा कृष्णः साध्वससमागतः ।
सङ्गोपयितुमात्मानं नाशक्नोद् भयविह्वलः ॥
ततश्चतुर्भुजां मूर्तिं गृह्णंस्तत्रैव स स्थितः ।
गोप्यः समीपमागत्य कृष्णं पश्यन्त्य ऊचिरे ॥
नायं कृष्णो भवेत्तावदयं नारायणः स्वयम् ।
इत्युक्त्वा तुष्टुवुः सर्वास्तं प्रणेमुश्च गोपिकाः ॥
नारायण नमस्तुभ्यं देव प्रसीद नः प्रति ।
विलोपय विषादं नः कृष्णसङ्गं समर्पय ॥

इत्युक्त्वा च नमस्कृत्य गोपिकासु गतास्वथ ।
राधा तत्र समायाता कृष्णस्याक्षिपथं गता ॥२८०॥
राधिकां वीक्ष्य कृष्णस्तु कौतुकं कर्त्तुमुद्यतः ।
तां स्वां चतुर्भुजां मूर्त्तिं संरक्षितुमचेष्टत ॥
राधिकायास्तु सान्निध्यान्निलीनं तद्भुजद्वयम् ।
कृत्वाप्यसौ बहून यत्नान् रक्षितुं न शशाक तत् ॥
राधायाः शुद्धभावस्याचिन्तनीयप्रभावता ।
यः कृष्णं कारयामास द्विभुजं विग्रहं निजम् ॥

"तथाह्युज्ज्वलनीलमणौ श्रीरूपगोस्वामिवाक्यम्—

रासारम्भविधौ निलीय वसता कुञ्जे मृगाक्षीगणै-
र्दृष्टं गोपयितुं स्वमुद्धरधिया या सुष्ठु सन्दर्शिता ।
राधायाः प्रणयस्य हन्त महिमा यस्य श्रिया रक्षितुं
सा शक्या प्रभविष्णुनापि हरिणा नासीच्चतुर्बाहुता ॥६॥"

सोऽयं व्रजेश्वरो नूनं जगन्नाथः पिता पुनः ।
सा च व्रजेश्वरी साक्षाच्छचीदेवी प्रसूरियम् ॥
स्वयं नन्दसुतः सोऽयं श्रीचैतन्यमहाप्रभुः ।
असौ श्रीबलदेवश्च नित्यानन्दोऽयमग्रजः ॥
दास्यं सख्यञ्च वात्सल्यमिति भावत्रयात्मकः ।
नित्यानन्दप्रभुः सोऽयं कृष्णचैतन्यसङ्गतः ॥
जगतीं प्लावयामास प्रेमभक्तिं समर्पयन ।
नैव तस्य चरित्राणि बोद्धुमर्हन्ति मानवाः ॥
अद्वैताचार्यगोस्वामी भक्तावतार एव सः ।
भक्तिं प्रचारयामास कृष्णमेषोऽवतारयन् ॥
सख्यं दास्यमिति द्वौ च भावौ तस्य स्वभावजौ ।
आचचार प्रभुस्तस्मिन गुरुव्यवहृतिं क्वचित ॥

श्रीवासाद्याश्च यावन्तो भक्ता आसन् महाप्रभोः ।
ते पुनः स्वस्वभावेन श्रीचैतन्यं सिषेविरे ॥२९०॥
गोस्वामिपण्डितादीनां यो यः स्वाभाविको रसः ।
तेन तेन रसैनैव प्रभुस्तेषां वशं गतः ॥
मुरलीवदनः श्यामकान्तिर्गोपविलास्यसौ ।
गौरकान्तिरयं जातु सन्न्यासी वा द्विजोत्तमः ॥
गोपीभावमुरीकुर्वन्नत एव प्रभुः स्वयम् ।
व्रजेन्द्रनन्दनं स्वस्य प्राणनाथमवोचत ॥
यः कृष्णः सैव गोपीति विरोधः परमो ननु ।
अचिन्त्यं प्रभुचारित्रमतिदुर्बोधमुच्यते ॥
अत्र प्रतीपतर्केण संशयीत न कश्चन ।
कृष्णस्याचिन्त्यशक्तित्वात सर्वं तत्रैव युज्यते ॥
कृष्णचैतन्यलीलासावचिन्त्या परमाद्भुता ।
चित्रा भावा गुणाश्चित्राश्चित्राण्याचरणानि च ॥
यस्तर्केण दुराचारो मतमेतन्न मन्यते ।
तस्य नास्त्येव निस्तारः कुम्भीपाके स पच्यते ॥

"तथाहि भक्तिरसामृतसिन्धौ स्थायिभावलहर्यामूनपञ्चाशत्तमाङ्कधृत-प्रभासखण्डवचनम्—

अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत ।
प्रकृतिभ्यः परं यत्तु तदचिन्त्यस्य लक्षणम् ॥१०॥"
चैतन्याद्भुतलीलायां विश्वासो यस्य वर्त्तते ।
चैतन्यश्रीपदप्रान्तं स एव प्रतिपद्यते ॥
सर्वसिद्धान्तसारोऽयं कथितोऽत्र प्रसङ्गतः ।
आकर्णयति य एतं शुद्धभक्तिं स विन्दति ॥
मया चेल्लिखितो ग्रन्थः संक्षेपात पुनरुच्यते ।
ग्रन्थार्थस्य तदा तस्य रसास्वादोऽनुभूयते ॥३००॥

ग्रन्थे भागवते दृष्टं व्यासस्याचरणं तथा ।
कथयित्वा कथां व्यासः संक्षेपात् पुनरुक्तवान् ॥
आदिलीलापरिच्छेदा गण्यन्तेऽत्र ततो मया ।
प्रथमे हि परिच्छेदे मङ्गलाचरणं कृतम् ॥
द्वितीये कृष्णचैतन्यतत्त्वस्य च निरूपणम् ।
व्रजेन्द्रनन्दनः कृष्णो य एव भगवान् स्वयम् ॥
स एव कृष्णचैतन्यः श्रीशचीनन्दनः प्रभुः ।
तृतीये जन्मनस्तस्य कृतं सामान्यलक्षणम् ॥
नामप्रेम्णोश्च कृष्णस्य प्रचारो युगधर्मयोः ।
विशेषकारणं तस्य प्रेमदानं तदन्तरा ॥
चतुर्थं जन्मनस्तस्य प्रोक्तं मूलप्रयोजनम् ।
आस्वादनं स्वमाधुर्यप्रेमानन्दरसस्य च ॥
नित्यानन्दस्य तत्त्वञ्च पञ्चमेऽत्र निरूपितम् ।
रोहिणीनन्दनो रामो नित्यानन्दोऽभवत् प्रभुः ॥
विचारोऽद्वैततत्त्वस्य षष्ठे च विवृतो मया ।
अवतारो महाविष्णोरद्वैताचार्य इत्ययम् ॥
व्याख्यानं पञ्चतत्त्वानां परिच्छेदे च सप्तमे ।
मिलितैः पञ्चभिस्तत्त्वैः प्रेमदानं कृतं यथा ॥
कृष्णचैतन्यलीलाया वर्णनार्थमथाष्टमे ।
एकस्य कृष्णनाम्नो हि माहात्म्यं कथितं महत् ॥३१०॥
भक्तिकल्पमहावृक्षो वर्णितो नवमे मया ।
चैतन्यमालिकेनैष वृक्ष आरोपितो यतः ॥
मूलस्कन्धस्य शाखानां गणना दशमे कृता ।
सर्वाभिः खलु शाखाभिर्यथा फलसमर्पणम् ॥
नित्यानन्दस्य शाखानां वर्णनैकादशे पुनः ।
अद्वैतस्कन्धशाखानां विवृतिर्द्वादशे कृता ॥

कृता महाप्रभोर्जन्मविवृतिश्च त्रयोदशे ।
यथा जन्माभवत्तस्य कृष्णनाम्ना समं प्रभोः ॥
संक्षेपाद्वर्णिता तस्य बाल्यलीला चतुर्दशे ।
तथा पञ्चदशे लीला पौगण्डस्य प्रदर्शिता ॥
कृतः कैशोरलीलायाः समुद्देशश्च षोड़शे ।
तस्य यौवनलीला च प्रोक्ता सप्तदशे मया ॥
आदिलीलाप्रबन्धेऽस्मिन् विधाः सप्तदशेरिताः ।
ग्रन्थस्य मुखबन्धश्चाप्रथमाद्द्वादशावधिः ॥
पञ्चानां वयसां तस्य चरितं शेषपञ्चके ।
संक्षेपेण मया प्रोक्तं नातिविस्तृत्य वर्णितम् ॥
श्रीवृन्दावनदासेन कृतं चैतन्यमङ्गले ।
श्रीनित्यानन्दनिर्देशबलेनैतत् सविस्तरम् ॥
कृष्णचैतन्यलीलेयमनन्ता परमाद्भुता ।
ब्रह्मा शिवश्च शेषश्च यस्या अन्तं प्रयान्ति न ॥३२०॥
योऽंशं कञ्चन लीलानां कथयेच्छृणुयादथ ।
स धन्यः कृष्णचैतन्यमचिरादेव विन्दति ॥
कृष्णचैतन्यमद्वैतं नित्यानन्दं नमाम्यहम् ।
भक्तान् श्रीवासमुख्यांश्च श्रीगदाधरवर्यकान् ॥
यावन्तः सन्ति भक्ताश्च श्रीवृन्दावनवासिनः ।
नम्रेण शिरसा तेषां गृह्णामि श्रीपदाम्बुजम् ॥
श्रीस्वरूपस्य रूपस्य श्रीसनातनजीवयोः ।
श्रीरघुनाथदासस्य श्रीमत्पादाम्बुजान्यहम् ॥
शिरसा धारयन् वन्दे नित्यमाशां वहन् हृदि ।
इत्याह कृष्णदासः श्रीचैतन्यचरितामृतम् ॥

इति श्रीचैतन्यचरितामृते आदिखण्डे यौवनलीलासूत्रवर्णनं नाम सप्तदशः परिच्छेदः । इत्यादिलीला समाप्ता ।

चैतन्यस्यादिलीला स्वयमवतरणे युक्तिमाधुर्य्यवीर्य्या
नित्यानन्दादि-धुर्य्यानुचर-सुचरिताख्यान-मुख्यावलम्बा।
जन्नाद्याश्चर्य्यवृत्त-प्रकटन-मुखरा तीक्ष्ण-पण्डित्य-शौर्य्या
नाम-प्रेम-प्रचार-व्रतचरण-परा भ्राजतां भक्तचित्ते॥

गौरेन्दोश्चरितामृतं विरचितं श्रीकृष्णदासेन यत्
पद्यैर्वङ्गवचोमयैरतिपुरा, तस्यादिलीला-मिमाम्।
ज्ञानानन्द-सरस्वती-परमहंसाचार्य्यचूड़ामणेः
शिष्यः संस्कृतभाषयानुकृतवान् पद्यात्मना भास्करः॥

Bhaja Nitai Gour Radhe Syam, Japa Hare Krishna Hare Ram.

प्रथम संस्करणे मुद्रण दोषविशेषाणां संशोधन पत्रम् ।

पत्राङ्कः	पङ्क्तिः	अशुद्धम्	शुद्धम्
२१	६	ब्रतीत्यपि	ब्रवीत्यपि
२३	८	मर्ईति	मर्हति
३१	२६	जल गणषं	जल गण्डूषं
४७	२३	सिद्धान्त	सिद्धान्तो
५४	६	प्रचारोक्ता	प्रचारोह्या
५५	२	प्रष्टुं	स्प्रष्टुं
५६	१५	बुद्धया	बुद्ध्या
,,	२१	ताम्बुल केलां	ताम्बूल-फेलां
७२	१७	वालघवः	वा लघवः
७३	११	कनिष्ठन्मन्यता	कनिष्ठम्मन्यता
७४	२३	इत्युक्ता	त्युक्त्वा
८८	१२	तद्भक्तमान्यता	तद्भक्तम्मन्यता
८९	२	सुम्वोन्मत्ता	सुखोन्मत्ता
९०	१४	तच्छ्यतां	तच्छ्रूयतां
१०१	१३	वृत्ता	वृत्त्या
१०३	१०	प्रभुर्लीला	प्रभुर्नीला
१०५	३	मतास्तथा	मता यथा
१०६	१७	गात्रहहेषु	गात्ररुहेषु
११८	६	सर्वदा	सर्वथा
११९	६	मदं	पदं
१२० (ग)	९	समुद्धतं	समुद्धृतं
,, ,,	१८	भृगुपातेव	भृगुपातेन
,, ,,	१९	निश्चस्य	निश्चित्य

पत्राङ्कः	पङ्क्तिः	अशुद्धम्	शुद्धम्
१२० (घ)	३	राधाकृष्णो द्विवा	राधाकृष्णौ दिवा
१२४	१५	नालाचलं	नीलाचलं
,,	१६	तस्म	तस्मै
,,	२२	निदश्यते	निदिश्यते
१२६	२४	द्रवोमूता	द्रवीभूता
१२७	२२	कृष्णप्रम	कृष्णप्रेम
१२९	२	चाएरम्	चापरम्
,,	१४	नृं सिंहो	नृसिंहो
१३१	१८	तस्थान्यो	तस्यान्यो
१४३	३	ताम्	तान्
१४७	१६	लब्ध्वा	लब्ध्वा
१६१	११	भावतेति	भवितेति
,,	१७	इथ्थं	इत्थं
,,	२६	प्राग्लभ्य	प्रागल्भ्य
१७५	४	सुखं	मुखं
१७८	१८	कणर्षं	कर्षणीं
१८०	१३	लूकायितो	लुकायितो
१९१	६	कदादिदू	कदाचिदू
१९६	७	तरस्वती	सरस्वती